संस्कृतविद्यापीठग्रन्थमालायाः प्रथमं पुष्पम्

# पुराणपारिजातः

म. म. गिरिधरशर्मा चतुर्वेदी

*संस्कृतविद्यापीठग्रन्थमालायाः प्रथमं पुष्पम्*

# पुराणपारिजातः

भूमिकालेखकः

**अनन्तश्रीविभूषितः स्वामी करपात्रमहाराजः**

लेखकः

**म. म. गिरिधरशर्मा चतुर्वेदी**

प्रधानसम्पादकः

**डॉ. मण्डनमिश्रः**

सम्पादकः

**श्रीशिवदत्तशर्मा चतुर्वेदी, एम.ए., साहित्यव्याकरणाचार्यः**

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्,**

**(मानितविश्वविद्यालयः) नवदेहली-110016**

प्रकाशकः
**कुलपतिः**
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालयः)
कटवारियासरायः, नई दिल्ली-110016



द्वितीयं संस्करणम्-2005 ई.

ISBN : 81-87987-20-0

मूल्यम् : रु. 120.00

मुद्रक : विकास कम्प्यूटर एण्ड प्रिण्टर्स, नवीन शाहदरा, दिल्ली-110032

# भूमिका

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्,
बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति।
पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम्,
आज्ञासिद्धानि चत्वारि न हातव्यानि हेतुभिः॥

पुराणपारिजातस्य विद्यास्कन्धो नाम द्वितीयं प्रकरणं मम सम्मुखमुपस्थितम्। अस्य प्रणेता महामहोपाध्यायो गिरिधरशर्माचतुर्वेदः। अनेन च विदुषा व्याकरणमधीतं, मन्त्रब्राह्मणात्मकेषु समग्रेषु वेदेषु नितान्तं परिश्रान्तम्, षडङ्गान्यालोडितानि, दर्शनानि गुरुभ्यः स्वयं च सुशिक्ष्यावगतानि आगमा निभालिता आचरिता चायं धर्माणाम्। 'चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति' इति पारमर्षं वचनं समन्वेत्यमुम्। पुराणानि भगवतो वेदस्य प्रहरिणः। श्रीकृष्णद्वैपायनस्य, 'अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः। अभाललोचनः शुम्भुर्भगवान् बादरायणः' इत्येवं विश्रुतस्य व्यासस्य तपांसि, ज्ञानविवर्त्तानि, व्याकृतो ब्रह्मणो विश्वनिर्माणरहस्यस्य किलैतानि। निखिलपुमार्थ-साधनेषु, ग्रथितधार्मिकतत्त्वेषु, विस्तृतदर्शनव्याख्यानोपव्याख्यानेषु, प्रतिपदं विविधचमत्कारपरिपूर्णेषु समुन्मीलितजगत्सृष्टिस्थितिसंहारविधानवैभवेषु खल्वेषु पुराणमहाग्रन्थराशिषु आपाततो विलसदनेकवैमत्येषु येषु विप्रतिपद्यन्ते सांख्या वैतानिकाश्च सर्वज्ञस्य परमेश्वरस्य सृष्टिकर्तृत्वे, विरुन्धन्ति ज्यौतिषिका धराया आदर्शरूपतायां सूर्यस्य मेरुसन्निकर्षविप्रकर्षाभ्यां संजायमानत्व उत्तरायण-दक्षिणायनयोः, विवदन्ते दार्शनिकाः परमतत्त्वसमीक्षायां, मुह्यन्ति वैदिकम्मन्याः प्रामाणिकत्वे, ग्लायन्ति भौगोलिका द्वीपादिसंस्थासमुद्भावने। नात्र साधारणा-नामल्पज्ञानामश्रद्धालूनामपरिशीलितभारतीयविवेचनापरिपाट्यानां प्रवेशः सफलः सम्भवति। स्वर्णसौरभसंयोग इव गिरिधरशर्माऽत्र समुपलब्धः। अस्य महीयानयं संरम्भः ध्रुवं फलेग्रहीस्यादिति सुदृढो मे विश्वासः। परिहृताः स्यु सर्वे विरोधाः, समाहिताः स्युर्निखिलाः शङ्काः, मार्जितानि भवेयुः समस्तानि वैमत्यानि। यत्परः शब्दः स शब्दार्थ इति न्यायेन निष्कले निरञ्जने सर्वभेदातीतेऽद्वितीये ब्रह्मणि परमं चरमं चैदम्पर्यं पुराणानाम्। 'हरिः सर्वत्र गीयत' इति हि तेषां डिण्डिमघोषः।

सर्वत्रैव तेषां समन्वयः परस्परं वेदैश्च। विवृतमेतत्सनातनधर्मोद्धारादिनिबन्धेषु विवरीष्यते चात्र निबन्धेऽपि बहुत्र। क्वचिदाध्यात्मिकप्रक्रियया अन्यत्राधिभौतिकप्रकारेण, इतस्तवाधिदैविकप्रसङ्गेन, कुत्रचन वैध्यादिभक्तिपारवश्येन सर्व एवाक्षेपा समाहिताः समाधायिष्यन्ते च।

अस्मिंश्च पुराणपारिजातस्य द्वितीयेऽवयवे सृष्टिप्रक्रिया विस्तरश उपवर्णिता। तत्र सांख्यं, वेदान्तः, भगवान् शंकराचार्यः, श्रीरामानुजाचार्यः, श्रीवल्लभाचार्यः, शैवागमः, विद्यावाचस्पतिरेतदीय आचार्यः, विभिन्नानि पुराणानि च समुपष्टब्धानि। वैज्ञानिकीश्च चर्चाः समुत्थाप्य तत्र पौराणिकं टिप्पणमुट्टङ्कितम्। विद्यावाचस्पतेर्विशेषाः समृद्धिशान्त्यानन्दादिभिः प्रकरणैर्गूरिता रमणीयतामावहन्ति। आशासे विश्वेरस्य भगवत अन्नपूर्णाजानेरकम्पयानुकम्पया संपूर्णतामचिरेणासादयन्निबन्धोऽयं पारिजातोऽपारिजातः स्यात्, पुराणबद्धपरिकरायाः सनातनधर्मश्रद्धाममोघामाभजन्त्या आर्यजनतायाः सर्वकामजायाः पूरयिता कल्पवृक्ष एव प्रादुःष्यात्।

श्रावणशुक्लः 3 —करपात्रस्वामी
संवत् 2015 वि.

# सम्पादकीयम्

अखिलभारतीयसंस्कृतविद्यापीठस्य प्रकाशनमालायाः प्रथमपुष्पतया पुराणपारिजातस्येमं भागं प्रकाशयत् तत् किमपि गौरवमिवात्मन्यनुभवति। इदं संस्कृतविद्यापीठम् अखिलभारतीयसंस्कृतसाहित्यसम्मेलनस्यैका महिमशालिनी प्रवृत्तिरस्तीति नाविदितं विदितवेदितव्यानाम्। सम्मेलनस्य संस्थापकेषु महामहोपाध्यायश्रीगिरिधरशर्मचतुर्वेदानां किमपि गरिमाञ्चितं पदं विद्यते। संस्कृतविद्यापीठयोजनाया अपि तत्रभवन्तः प्रमुखप्रवर्तका एवाभवन्। इत्थं विद्यापीठ-सम्मेलनाभ्यामुभाभ्यामपि साकमेतेषां विद्वद्गरिष्ठानां घनिष्ठाऽऽत्मीयतास्तीति प्रथितचरम्। अस्यां स्थितौ विद्यापीठप्रवर्तितायाः प्रकाशनमालायाः समुपक्रमोऽपि तैरेव लिखितेन पुस्तकेन सम्पद्येतेत्यस्मादधिकतरः कतरः सौभाग्यावसरः स्याद् विद्यापीठस्य।

एतामात्मीयतामन्तरापि नूनमस्मारकं गौरवान्वयस्य प्रचुराणि कारणानि सन्ति। महामहोपाध्यायश्रीगिरिधरशर्मचतुर्वेदा भारतस्य तेषु विख्याततमेषु विद्वत्स्वन्यतमा वर्तन्ते, यैरयं देशो गर्ववान् भवितुमर्हति। सहस्राधिकैः शिष्यैः, शताधिकैः संस्थानैः भूयोभिर्लेखैः, प्रभूतैश्च व्याख्यानैरस्य राष्ट्रस्य भारतीययोः संस्कृतेः संस्कृतस्य च जागरणे महत्त्वशाली योगस्तैः प्रदत्तः, यः सर्वथाऽतुलनीय एव वर्तते। तेषामिमाः सेवा राष्ट्रस्य विभिन्नैर्वर्गैः काले काले सविशेषं सममान्यन्त। ब्रिटिशशासनकाले भारतसर्वकारेणैते महामहोपाध्यायपदवीप्रदानेन, स्वतन्त्रे च भारते राष्ट्रपतिना विशिष्टेन सम्मानपत्रेण, 'साहित्य एकादमी' संस्थानेन च संस्कृतविद्वत्सु सर्वप्रथमतया पञ्चसहस्ररुप्यकात्मकेन सर्वोच्चेन साहित्यकार-पुरस्कारेण व्यभूष्यन्त। काशीस्थहिन्दूविश्वविद्यालयेन 'वाचस्पति'पदेन प्रयागस्थेन हिन्दीसाहित्यसम्मेलनेन च 'साहित्यवाचस्पति' पदव्या चतुर्वेदमहाभागाः सदक्रियन्त। एवं विधानां सुप्रतिष्ठतां विदुषां कृतिर्विद्यापीठेन प्रकाशनार्थं प्राप्येतेत्यतो महतो हर्षस्य विषयः को नामान्यः सम्भवति।

प्रस्तुता कृतिः श्रीचतुर्वेदचरणैः कृतस्य पुराणानां गम्भीरस्य माहात्म्य-शालिनश्च चिन्तनस्य परिणतिर्वरीवर्ति। गतेभ्यः पञ्चदशाधिकेभ्यः संवत्सरेभ्यः

पुराणानामनुशीलनं विधाय तैरासन्नसहस्रद्वयेषु पृष्ठेषु किमप्यगाधं विवेचनं समुपन्यस्तमस्ति। तस्य प्रथमो भागः 'काशिराजन्यासे' प्रकाशनार्थं प्रदत्तः, द्वितीयस्तावदयम्। अस्मिन् भागे सृष्टेः, शक्तेः, सच्चिदानन्दलक्षणस्याऽऽत्मनः स्थापनायाः, सत्त्वरजस्तमसां गुणानां च विवेचनादिकैर्विषयैर्गूढगूढतराणि रहस्यानि वैज्ञानिक्या समन्वयात्मिकया च सरण्या प्रस्तूय महामहोपाध्यायैः काचिन्नूतना दृष्टिः संस्कृतजगतः समक्षमुपस्थापिता विद्यते।

विशेषतः पुराणानां सम्बन्धे एतादृशं विवेचनं भृशमपेक्ष्यते। 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।' इत्यादिसूक्तैः प्रतिपादितं पुराणानां महत्त्वं कतिभ्यश्चिद् शताब्दीभ्यो मलिनयितुं दुर्मेधसः प्रायतन्त। नूनमिदमास्माकीनस्य राष्ट्रस्य कृतेऽपशकुनमेवाजायत। वैदिके ज्ञानविज्ञाने लौकिकस्वरूपप्रदानेन पुराणैर्मानवजीवनस्य सान्निध्यमानेतुं यन्महनीयं कर्म सम्पादितम्, तस्य निष्क्रयमिदं राष्ट्रं कदाचिदपि दातुं न पारयिष्यतीति सत्यम्। वस्तुतो भारतीयायाः संस्कृतेर्यत् स्वरूपं वयमद्य निरूपयामः, तस्य प्रतिष्ठापकानि पुराणान्येव। पुराणान्येव शताब्दीर्यावदास्माकीनानां काव्यानाम्, शास्त्राणां चिन्तनानां वा प्रेरणास्रोतांस्यवर्तन्त। इत्थम्भूतस्य शाश्वतजीवनीयस्य स्रोतसः सम्बन्धो यदि कुतश्चन राष्ट्रात् कस्माच्चन वा साहित्याद् विच्छिद्यते, तदा ततोऽधिकं किमपीतरद् अपशकुनं न सम्भाव्यते। अनया दृष्ट्या पुराणानां चिन्तनमनेन तदीयतत्त्वानाञ्च प्रकाशनमस्मिन्युगे कियन्महत्त्वमाधत्त इति लेखनमनपेक्षितम्।

ममैष हर्षप्रकर्षहेतुर्यद् विद्यापीठेनेदं मूलसत्यमङ्गीकृतम्। तेनात्मनः शारदीयज्ञानमहोत्सवस्य शुभारम्भो वैदिकतत्त्वज्ञानव्याख्यानद्वारा प्रकल्पितः अस्मिंश्च वर्षेऽस्याः प्रकाशनमालाया समारम्भोऽपि तेन पौराणिकविवेचनद्वारा सम्पादितः। वयमिह कामयामहे यदियं वेदपुराणानुशीलनपरम्पराऽनुदिनं प्रैधतामिति।

अस्या परम्परायाः समुपक्रमे पूज्यपादैः स्वामिश्रीकरपात्रमहाभागैरस्य ग्रन्थस्य भूमिकात्मनाऽऽशीवदिनास्मासु कस्यचन शक्तिविशेषस्य सञ्चार इव, प्रेरणातिशयस्य च प्रचार इवानुष्ठितः भारतप्रशासनस्य शिक्षामन्त्रालयः 'केन्द्रीयसंस्कृतमण्डलम्, तत्सचिवः प्राच्यपाश्चात्यविद्याविशेषज्ञः सुहृद्वरो ड्राक्तरश्रीरामकरणशर्मा चास्माकं शाश्वताभिनन्दनभाजनानि विद्यन्ते। तन्माध्यस्थ्येनैव भारतप्रशासनद्वारा प्रदत्तेनार्थिकसाहाय्येनास्माकम् विचारस्य साकारतालाभे भूय एवोपकृतम् महामहोपाध्यायचरणानां सुपुत्रः श्रीशिवदत्तचतुर्वेदोऽपि सस्नेहमस्माभिरत्र

सभाजनीयः, येन महाभागेन अस्य सम्पादने मुद्रणालय-सम्बन्धिषु कार्येषु च तत्परतयोत्तरदायित्वं निर्व्यूढम्।

अस्माकं शासननिकायस्याध्यक्षाणां भारतप्रधानमन्त्रिणां श्रीलालबहादुर-शास्त्रिमहाभागानां वयं भृशं कृतज्ञाः स्मः, यैरेतस्य समर्पणं स्वीकृत्यास्य शोभा, गरिमा च सुतरां परिवर्धितौ। वस्तुतस्तु यद्येष ग्रन्थः पुराणानामाध्ययनाध्यापनयोर्दिशि काञ्चिन्नूतनां जागर्तिमानेष्यति, तदैव वयं स्वप्रयत्नानां साफल्य-साकल्यं कलयिष्यामः।

गुरुपूर्णिमा 2022 वि. **डॉ. मण्डनमिश्रः**

॥ श्रीः ॥

# पुराण-पारिजातः

## विद्यास्कन्धः

यदीय - करुणाद्भुतस्फुटकटाक्षलक्ष्मीलवं
जनः सुखमुपाश्रितस्त्रिविधमेव तापं तरेत्।
अशेषभुवनोद्भवस्थितिलयाश्च यल्लीलया-
वृतं कमलया मुदा कुवलयाक्षमीडे हरिम्॥1॥

जयति स भगवान् शम्भुर्भुवनोदयलालनप्रलयलीलः।
गिरिजातपःफलं किल येन शरीरार्द्धमपि दत्तम्॥2॥

विविधशास्त्ररहस्य बुभुत्सया गुरुपदं सुचिरं समुपासितम्।
तदवलम्ब्य विवेकमधुप्रदं किमपि साहसमद्य चिकीर्ष्यते॥3॥

आशास्य वचसां देव्याः कटाक्षं करुणाप्लुतम्।
प्रयत्यते दर्शयितुं पुराण-सृष्टि-बैभवम्॥4॥

# सृष्टि-वल्ली

## [ सृष्टि-भेदाः ]

सर्गप्रतिसर्गवंशवंश्यानुचरित-मन्वन्तराख्येषु पञ्चसु पुराणविषयेषु सर्ग एव मुख्यो विषयः। सोऽयं सर्गः सृष्ट्यपरपर्यायः पुराणेषु नवधा प्रस्तूयते। तदुक्तं पाद्मे सृष्टिखण्डे तृतीयाध्याये—

प्रथमो महतः सर्गो द्वितीयो ब्रह्मणस्तु यः॥76॥

तन्मात्राणां द्वितीयस्तु भूतसर्गो हि स स्मृतः।
वैकारिकस्तृतीयस्तु सर्गश्चैन्द्रियकः स्मृतः॥77॥

इत्येष प्राकृतः सर्गः संभूतो बुद्धिपूर्वकः।
मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः॥78॥

तिर्यक्स्रोतास्तु यः प्रोक्तस्तिर्यग्योन्यः स उच्यते।
ततोर्ध्वस्रोतसां षष्ठो देवसर्गस्तु स स्मृतः॥79॥

ततोऽर्वाक् स्रोतसां सर्गः सक्षमः स तु मानुषः।
अष्टमोऽनुग्रहः सर्गः सात्विकस्तामसस्तु यः॥80॥

पञ्चैतै वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः।
प्राकृतौ वैकृतश्चैव कौमारौ नवमः स्मृतः॥81॥

एते तव समाख्याता नवसर्गाः प्रजापतेः। इति।

एवमेव वैष्णवे प्रथमेंऽशे 5 अध्याये, अन्यत्रान्यत्र च।

अयं भावः—पूर्वं सर्गस्त्रिविधः प्राकृतः, वैकृतः, मिश्रश्च। सांख्यदर्शने हि एका मूलप्रकृतिः, सप्त प्रकृतिविकृतयः, षोडशविकाराः, एकस्तु पुरुषोऽप्रकृति-विकृतिः—इति चत्वारो वर्गाः सर्वेषां तत्त्वानां कृताः। तत्र मूलप्रकृतिः प्रकृति-विकृतिरित्युभयमपि प्रकृतिशब्देन गृहीत्वा तैरुत्पादितः सर्गः प्राकृत उच्यते। विकृतिशब्देनोक्तैर्महाभूतैरिन्द्रियैश्चोत्पादितः प्राणिसर्गो वैकृत उक्तः। यद्यप्नुग्रह-सर्गो वक्ष्यमाणः प्राकृत एवं वक्तुं युक्तः, परं भूतानीन्द्रियाणि चाश्रित्य तुष्टिसिद्ध्यादीनां स्वरूपसंघटनात्स वैकृतेषु गण्यते। यत्र तु विकृतिसहकृतायाः

प्रकृतेः कर्तृत्वम्, सोऽयं मिश्रः प्राकृतवैकृत इति। तत्र महत्सर्गो ब्रह्मसर्गो वा प्रथमः, (अत्रैवाविद्यासर्गोप्यन्तर्भवतीति वैष्णवे उक्तम्) भूतसर्गो द्वितीयः, ऐन्द्रियकस्तृतीयः, इति त्रयः प्राकृताः सर्गाः। वृक्षादीनाम्, पश्वादीनां देवानां मनुष्याणामिति चत्वारः प्राणिसर्गाः। बुद्धिभेदानां तुष्टिसिद्धिशक्तीनां सात्विकस्तद्विपरीतानामतुष्ट्यसिद्ध्यशक्तीनां च तामस-इत्येषोऽनुग्रसर्ग इति पञ्चवैकृताः। कौमारः सर्गस्तु प्राकृतवैकृतः, योहि—

**भूतादिकानां भूतानां षष्ठः सर्गः स उच्यते,**
**ते परिग्राहिणः सर्वे सविभागतरास्तु ते।**
**चोदना-जाप्यशीलाश्च ज्ञेया भूतादिकास्तु ते।**

इत्येवं विवृतः; तदिदमग्रे स्फुटीभविष्यति। त एते नवसर्गविभागाः केषुचित्पुराणेषु स्मृताः। श्रीमद्भागवते तृतीयस्कन्धे दशमाध्याये तु वैलक्षण्यं दृश्यते। तत्र हि महतः सर्गः, अहंकारसर्गः, भूतसर्गः, इन्द्रियसर्गः, वैकारिको देवसर्गः, तमसः सर्गश्चेति षट् प्राकृताः सर्गा उक्ताः। मुख्यपदवाच्यो वृक्षादिसर्गः, तिर्यक्सर्गः मनुष्यसर्गश्चेति त्रयो वैकृताः, इत्येवं नवसर्गाः। उभयात्मकस्य कौमारसर्गस्यापि योजने तु दशसर्गा भवन्तीति। एषामवान्तरभेदा अपि तत्र निरूपिताः। श्रीभगवद्वल्लभाचार्यचरणानुगामिभिः श्रीगोस्वामिपुरुषोत्तमैस्तु प्रस्थानरत्नाकरे पूर्वं कारणकार्यस्वरूपभेदेन त्रिविधत्वं सृष्टेः प्रतिपाद्य ब्रह्मस्वरूपम् 'बहुस्याम्' इतीच्छा-इति द्विविधं स्वरूपम्, सच्चिदानन्दाविर्भावः कारणसृष्टिरेका, ततः सदंशाः प्राण-लोकदेव-भूतानि, चिदंशौ जीवान्तर्यामिणौ, कार्यान्तरसृष्टिश्च नामरूपात्मिकेति त्रिविधां कार्यसृष्टिं व्याकृत्य षोढा सृष्टिर्व्यवस्थापिता भागवताधारेण। तत्र च नामरूपसृष्टेरपि बहुविभागाः प्रदर्शिताः—द्रव्यम्, कर्म, कालः, स्वभावः, जीवः, इति पञ्चधा रूपसृष्टिः, एका च नाम सृष्टिरिति। श्रीगुरुचरणैर्विद्यावाचस्पतिमहाभागैस्तु वेदाः, यज्ञाः, प्रजाः, लोकाः धर्माश्चेति पञ्चानां स्रष्टव्यानां भेदात् पञ्चधा सृष्टिः स्वग्रन्थेषु प्रतिपादिता। भूतसृष्टिं लोकसृष्टावेव तेऽन्तर्भावयन्ति। तदित्थं वक्तुरिच्छया वर्गीकरणमनेकधा संभवति। सर्वतत्त्वसृष्टिप्रतिपादन एवं सर्वेषां तात्पर्यम्, वर्गीकरणं सौकर्याय यथा तथा वा भवतु, तत्र न कोऽपि विरोधः। तदिह वयमपि प्रतिपादनसौकर्याय प्रकरणमिदं पञ्चधा विभजामहे (1) 'आदिसृष्टिः' भूतोत्पत्तेः तन्मूलभूततन्मात्रा-सृष्टेश्च प्राक् सर्वमत्र समावेश्येत। प्राणानाम् वैज्ञानिकवेदानां प्राणभेदानामृषिपितृ-देवादीनां महदहंकारादीनां सृष्टिरत्रैवान्तर्भूता पुराणोक्तकौमारसर्गाद्यपि चात्रैव संगृह्येत।

2—भूतसृष्टिः (मूलभूतानां तन्मात्राणां सृष्टिरप्यत्रैव संगृहीता स्यात्)

3—लोकसृष्टिः।

4—प्राणिसृष्टिः।

5—धर्मसृष्टिरिति। पुराणोक्तोऽनुग्रहसर्गोऽत्रैव संगृह्येत वेदशास्त्रादीनां सृष्टिरप्यैत्रवान्तर्गता स्यात्।

आसां सर्वासामपि सृष्टीनां तात्त्विकं विवरणं श्रुतिषु तु मूलभूतमस्त्येव, श्रुतिमूलकत्वात् सर्वेषां शास्त्राणाम्। यदि परोक्षविषयः श्रुतिषु न श्रुतोऽभविष्यत्, तर्हि शास्त्रान्तरेषु केनाधारेण प्रत्यपादयिष्यत। परं श्रुतिषु यज्ञाङ्गभूतकर्मणामुपपत्तये यज्ञाङ्गप्रशंसारूपेण वा सर्गा इमे तत्र तत्र ब्राह्मणेषु प्रतिपादिता इति उपक्रमेण सुस्पष्टं सृष्टिविवरणं नैकत्र सुलभम्। उपनिषत्सु यद्यपि भूतसृष्टिः प्राणिसृष्टिश्च तत्र तत्र प्रकरणे संबद्धा श्रूयते। परमतिसंक्षिप्ता। तत्राप्यात्मतत्त्वमेव मुख्यतया विवेच्यम्, सृष्ट्यादिकमङ्गभूतमेवेति। मन्त्रभागे द्वित्राणि सूक्तानि अन्यत्रापि केचन मन्त्राश्च सृष्टिप्रतिपादकानि सन्ति, परं तत्राप्यतिसंक्षेपेणैव श्रवणम्। दर्शनेषु तु केवलमादिसृष्टेर्धर्मसृष्टेश्च केचिदंशा-विव्रियन्ते। लोकसृष्टिः प्राणिसृष्टिर्वा न तत्र विचार्यते।

स्मृतिषु भगवता मनुना प्रथमाध्याये लोकसृष्टिः प्राणिसृष्टिश्च विवृता। परं साप्यतिसंक्षिप्ता। आगमशास्त्रेषु तन्त्रयामलादिष्वप्यस्ति सृष्टिविवरणं प्रधानप्रतिपाद्योपासनाङ्गरूपेण। तस्मात् सर्वविधानां सृष्टीनां सोपक्रमं सोपसंहारं क्रमबद्धं विस्तृतं वर्णनं प्रधानरूपेण पुराणेष्वेव लभ्यत-इति नात्र कस्याप्यालोचकस्य संशयः स्यात्। तस्मात् पुराणानामत्र विषये संक्षेपेण सिद्धान्तं दिङ्मात्रं प्रदर्शयितुमुद्यता वयमादिसृष्टिमेव प्रथमं प्रस्तुमः। श्रुत्या शास्त्रान्तरैश्चाप्येकवाक्यतां सम्पादयितुं यथाशक्ति प्रयत्येत। अयन्तु श्रीमद्भगवद्वल्लभाचार्याणां सुबोधिनीबोधितः सृष्टिशब्दार्थः सततं सर्वैः स्मृतौ स्थाप्यः—

**अनित्ये जननं नित्ये परिच्छिन्ने समागमः।**
**नित्यापरिच्छिन्नतनौ प्राकट्यञ्चेति सा त्रिधा ॥** इति।

अर्थात्—यानि तत्त्वानि नित्यान्यपरिच्छिन्नानि च, तत्राविर्भावापरपर्यायं प्राकट्यमेव सृष्टिशब्दार्थः। नित्येषु परिच्छिन्नेषु च परस्परम्, एकस्येतरेण वा संगमनं सृष्टिपदाभिधेयम्। अनित्येषु तु उत्पत्तिरेव सृष्टिः। यद्यपि सत्कार्यवादे शास्त्रसम्मते उत्पत्तिरप्याविर्भावान्नातिरिच्यते तत्त्वतः, परं व्यवहारदशायां तत्रोत्पत्तिरेव सर्वैरभ्युपगम्यत इति पृथगेवाचार्यैः सोक्ता। अनयैव रीत्या प्रकरणेऽस्मिन्नुपात्तः सृष्टिशब्दः सर्गशब्दो वा नाक्षेपयोग्य इति। □

# आदिसृष्टिः

## (मूलतत्त्वनिरूपणम्)

तत्र तावत् सर्वस्याप्यनेकब्रह्माण्डविस्तीर्णस्य मनसाप्याकलयितुमशक्यस्यानन्तभेदस्य स्थावर-जङ्गम-जडचेतनादिरूपस्य प्रपञ्चस्य मूलमेकवाद्वितीयं सद्-ब्रह्म-ज्ञान-रसादिपदैरुपलक्षणीयं किमपि तत्त्वमिति श्रुत्यनुगामिनां पुराणानामैकमत्येनोद्घोषितः सिद्धान्तः। यथा हि पाद्मे स्वर्गखण्डनाम्ना प्रसिद्धे सर्गखण्डे द्वितीयेऽध्याये सूतस्योक्तिः—

आदिसर्गमहन्तावत् कथयामि द्विजोत्तमाः।
ज्ञायते येन भगवान् परमात्मा सनातनः॥1॥

जगतः प्रलयादूर्ध्वं नासीत्किञ्चिद्द्विजोत्तमाः।
ब्रह्मसंज्ञमभूदेकं ज्योतिर्वै सर्वकारकम्॥2॥

नित्यं निरञ्जनं शान्तं निर्मलं नित्यनिर्मलम्।
आनन्दसागरं स्वच्छं यत्काङ्क्षन्ति मुमुक्षवः॥3॥

सर्वज्ञं ज्ञानरूपत्वादनन्तमजमव्ययम्।
अविनाशि सदा स्वच्छमच्युतं व्यापकं महत्॥4॥

तस्मात्प्रधानमुद्भूतमित्यादि।

पाद्मे सृष्टिखण्डेऽपि द्वितीयेऽध्याये पुलस्त्यो भीष्ममाह—

परः पराणां परमः परमात्मा पितामहः।
रूपवर्णादिरहितो विशेषेण विवर्जितः॥85॥

अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः।
गुणैर्विवर्जितः सर्वैः समस्तीति हि केवलम्॥86॥

सर्वत्रासौ समश्चापि वसन्ननुपमो मतः।
भावयन् ब्रह्मरूपेण विद्वद्भिः परिपठ्यते॥87॥ इत्यादि।

विष्णुपुराणे प्रथमेंशे द्वितीयेऽध्याये–

ज्ञानस्वरूपमत्यन्तं निर्मलं परमार्थतः।
तदेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम्॥6॥

विष्णुं ग्रसिष्णुं विश्वस्य स्थितौ सर्गे तथा प्रभुम्।
प्रणम्य जगतामीशमजमक्षयमव्ययम्॥7॥

कथयामि यथापूर्वं दक्षाद्यैर्मुनिसत्तमैः।
दृष्टः प्रोवाच भगवानब्जयोनिः पितामहः॥8॥

परः पराणां परमः परमात्मात्मसंस्थितः।
रूपवर्णादिनिर्देशविशेषेण विवर्जितः॥9॥

अपक्षयविनाशाभ्यां परिणामर्धिजन्मभिः।
वर्जितः शक्यते वक्तुं यः सदास्तीति केवलम्॥10॥

सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः।
ततः स वासुदेवेति विद्वद्भिः परिपठ्यते॥11॥

तद्ब्रह्म परमं नित्यमजमक्षयमव्ययम्।
एकस्वरूपं तु सदा हेयाभावाच्च निर्मलम्॥12॥

तदेवसर्वमेवैतद् व्यक्ताव्यक्तस्वरूपवत्।
तथा पुरुषरूपेण कालरूपेण च स्थितम्॥13॥

श्रीभागवते द्वितीय-स्कन्धे पञ्चमेऽध्याये ब्रह्मणः पद्मयोनेरुक्तिर्नारदं प्रति–

तस्यापि स्रष्टुरीशस्य कूटस्थस्याखिलात्मनः।
सृज्यं सृजामि सृष्टोहमीक्षयैवाभिचोदितः॥17॥

उपसंहारेऽपि षष्ठेऽध्याये–

ए एष आद्यः पुरुषः काले काले सृजत्यजः।
आत्मात्मन्यात्मनात्मानं संयच्छति च पाति च॥38॥

विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितम्।
सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम्॥39॥

ऋषे विदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः।
यदातदेवासत्तर्कैस्तिरोधीयेत विप्लुतम्॥40॥

तृतीयस्कन्धे पञ्चमेऽध्यायेऽपि मैत्रेयविदुरसंवादे—

**भगवानेक आसीदमग्र आत्मात्मनां विभुः।**
**आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः॥23॥**

**स वा एष तदा द्रष्टा नापश्यद्दृश्यमेकराट्।**
**मेने सन्तमिवात्मानं सुप्तशक्तिरलुप्तदृक्॥24॥**

त्रिकालाबाध्यतया सदैव सद्रूपोऽपि द्रष्टृत्वाद् दृश्याभावे निर्विषयं दर्शनासंभवात् स्वरूपमप्यसदिव मन्यत इत्यर्थः। अतएव क्वचित् सदसत्पदेनाप्ययमात्मा व्यवहृत इति स्मर्तव्यम्। उपसंहारेपि—

**यतो प्राप्य न्यवर्तन्त वाचश्च मनसा सह।**
**अहं चान्य इमे देवास्तस्मै भगवते नमः॥40॥**

एवं पुराणान्तरेष्वपि सर्वत्र विज्ञेयम्—

अत्र सर्वत्र 'नासदासीन्नो सदासीत्तदानीं नासीद्रजो न व्योमापरो यत्' (कृ.सं.)। 'सदेवसोम्येदमग्र आसीदेकमेवाद्वितीयम्', (छान्दोग्य)।' यतो वा इमानि भूतानि जायन्ते—' (तैत्तिरीये)। 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इत्याद्या मूलतत्त्वप्रतिपादिकाः श्रुतय एवानूदिताः।

**आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।**
**अप्रतर्क्यमविज्ञेयं प्रस्तुप्तमिव सर्वतः॥** (मनुस्मृतिः अ. 1)

इत्यादिना भगवता मनुनाप्येवमेव तत्त्वमिदं प्रतिपादितम्। आगमशास्त्राणि च परशिवनाम्ना मूलतत्त्वमेवंविधिमेव विवृण्वते। दर्शनेष्वन्तिमं वेदान्तदर्शनमपि ब्रह्मैवमेव जगन्मूलं दर्शयति। अन्यानि तु दर्शनानि स्थूलारुन्धतीन्यायेन, शाखाचन्द्रन्यायेन वा सूक्ष्मतत्त्वे क्रमेण बुद्धिं प्रवेशयितुं प्रवृत्तानीति दार्शनिके निबन्धे प्रतिपादयितुमर्हं नात्राप्रकृततया विवेच्यम्।

□

# मूलतत्त्वे दार्शनिकी प्रक्रिया

एकम्, एव, अद्वितीयम्, इति पदत्रयेण श्रुत्या सजातीयविजातीय–स्वगतभेदास्त्रयोपि तत्र निरस्यन्ते, यथा हि घटस्य घटान्तरेभ्यो भेदः सजातीयभेदः, स नास्मिन् परतत्त्वे संभवति, मूलतत्त्वद्वयकल्पनायां प्रमाणाभावात्, केनापि प्रमाणेन द्वितीयस्य मूलतत्त्वस्याप्रसिद्धेः। आरम्भवादं परिगृह्णन्तो नैयायिका यद्यपि मूलतत्त्वभूतेषु परमाणुषु सजातीय-भेदमभ्युपगच्छन्ति, परं न तच्छ्रुतिस्मृत्यादिषु क्वाप्यनुमोद्यते। युक्तयश्चापि तेषां वेदान्तभाष्यादिष्वाभाष्यन्त इति न तत्प्रमाणकोटौ प्रवेशयितुमर्हम्। न च परमाणवः सर्वस्यापि मूलतया तैरभ्युपगताः, आत्माकाशादीनां नित्यद्रव्याणां पृथक् स्वीकृततत्त्वादिति श्रुतिसमन्वयस्य गन्धोऽपि तत्र न संभवति। प्रत्यक्षं परिदृश्यमानो विज्ञानसिद्धश्च भूतानामन्योन्यविनिमय एकमूलकतां सर्वेषां ख्यापयन्न तत्पक्षे उपपादयितुं शक्यते। स्फुटं हि वृष्टिजलेन तृणान्महावृक्षादीनामुत्पत्तिर्दृश्यते। तत्र वृष्टिजलस्य निमित्तमात्रत्वं प्रकल्प्यकुतश्चिदागतानां पार्थिवपरमाणूनां समवायित्वप्रकल्पनं विज्ञानविरुद्धकल्पनामात्रमिति क्रमेण सूक्ष्मतत्त्वं निरूपयितुमारम्भिकी प्रक्रियैव संप्राप्ता तैरनुसृतेत्युक्तमनुपदमेव। एवं घटादिभ्यो पटस्य भेदो विजातीयभेदः, सोऽपि मूलतत्त्वे निराक्रियते–उत्पत्तेः प्राक्तत्त्वान्तराणां केनापि प्रमाणेन साधयितुमशक्यत्वात्–इति प्रतियोग्यप्रसिद्ध्या मूले विजातीयभेदस्यासिद्धेः। प्रकृतेर्मूलतत्त्वतावादिभिः सांख्यैर्यद्यपि तद्विजातीयः पुरुषोऽभ्युपगम्यत इति प्रकृतौ विजातीयभेदस्तन्मते संभवति, तथापि श्रुतिपुराणादिषु मूलत एव प्रकृतिपुरुषभेदो नाभ्युपगत एवं, तेषामपि च युक्तयो वेदान्तभाष्यादिषु सपरिकरं खण्डिताः। न च मूलत एव भेदे बुद्धिपुरुषयोः सम्बन्धोऽनुभूयमानः शक्यसंभव इति सोऽपि पक्षो न प्रमाणम्। दर्शनानां क्रमे एकं मूलतत्त्वं बुद्धौ प्रवेशयितुं साप्येका शाखेति तदुपयोगोऽपि न्यायवदेव समर्थनीयः। अथ घटे 'मुखोदराधोभागादीनां परस्परं भेदः स्वगतभेदः, सोऽपि मूलतत्त्वे नास्ति, तस्य सावयवत्वासंभवात्, सावयवस्य नित्यत्वाप्रसिद्धेः, अनित्यत्वे च मूलान्तरकल्पनायामनवस्थाप्रसंगात्। यद्यपि सांख्यैर्गुणत्रितयात्मिकायाः प्रकृतेर्मूलत्वकल्पनात्सत्वादीनां परस्परं भेदे मूले स्वगतभेदः संभवति, परं न सोऽपि तेषां पक्षः परिग्राह्यः। वस्तुत्रयसमुदायस्य नित्यतायाः साधयितुमशक्यत्वात्। स्वयमपि च तैरव्यक्तस्य सावयवत्वं नाभ्युपगम्यते इति विचित्रैव सा प्रक्रिया। वस्तुतस्तु तदभ्युपगता

प्रकृतिर्न द्रव्यरूपा अपितु शक्तिरूपेत्यग्रे स्पष्टीकरिष्यामः, शक्तिश्च न सावयवा भवतीति न तत्रापि स्वगतभेदकल्पनावकाशः। सोऽयं, भेद-त्रय-निरासः पुराणेष्वपि "एकं वै ज्योतिः" "निरञ्जनम्" "निर्मलम्" "नित्यनिर्मलम्" "स्वच्छम्" "अविनाशि" "व्यापकम्" "विशेषणविवर्जितः" "गुणैः सर्वैर्विवर्जितः" "विशुद्धम्" "केवलं" "निर्गुणम्" इत्यादिभिः पदैः पुनः पुनरभ्यस्तैरुक्तेषु पद्येषु स्फुटीकृत एव।

## शाङ्करवेदान्तप्रक्रिया

निर्गुणं निर्धर्मकं तत्त्वं शब्देन केनापि न प्रतिपादयितुमर्हम्, शब्दानां गुणधर्मपुरस्कारेणैव प्रवृत्तत्वात्, न च मनसापि चिन्तनीयम्, मनसोऽपि धर्मविशेष-पुरस्कारेण इतरभेदपुरस्कारेण च चिन्तनस्वाभाव्यादिति वाङ्मनसातीतं तदुच्यते। श्रुतिभिस्तटस्थलक्षणमार्गेण तत्कथमप्युपलक्ष्यते, तत्तद्धर्मनिषेधपूर्वकं वा निषेधाधिकरणरूपेण शेषतया बुद्धावारोप्यते। यत्रापि "सत्यं ज्ञानमनन्तं ब्रह्मे" त्यादौ भावबोधकैः शब्दैः प्रतिपादनं श्रूयते, तत्रापि वाङ्मनसातीतत्त्व-बोधकश्रुत्येकवाक्यतया निषेधमुखेन प्रतिपादन एव तात्पर्यमवसेयम्। सत्पदं सत्यपदं वा न तत्र सत्ताधर्मित्वमाह अपितु असत्त्वावस्तुत्वाद्यभावम्, त्रिकाल-बाध्यत्वाभावं च। अतएव नासदीयसूक्ते "नासदासीन्नोसदासीत्तदानीम्" इति सृष्टेः पूर्वं सदपि प्रतिषिद्धम्। सत्ताश्रयत्वेन सम्भाव्यमानस्य सतः प्रतिषेधः, असद्वस्तु विलक्षणस्य सतस्तु आसीत् पदेन पूर्वभावोपनिबन्धनमित्युभयमप्युपपद्यते। भगवद्गीतास्वपि च 'न सत्तन्नासदुच्यते' इति यदुक्तं तदप्येवमेव संगमनीयम्। सत्ताश्रयत्वाभावेन न सत्, अवस्तु वैलक्षण्येन च नासदिति। ज्ञानपदमपि अचेतनत्वाज्ञानित्वाद्यपरपर्यायस्य जडत्वस्याभावमाह, अनन्तपदन्तु नञ्घटित्वेन स्पष्टमेव परिच्छिन्नत्वाभावबोधकम्। एवम् 'आनन्दो ब्रह्मेति व्यजानात्' आनन्दं ब्रह्मे'त्याद्यपि भयकम्पादिरूपदुःखाभावं श्रावयति, न तु सुखधर्मिताम्। 'रसो वै सः' इत्यादौ रसपदमपि भयकम्पदुःखाभावापरपर्यायशान्त्यानन्दबोधकम्। ब्रह्मपदमपि बृंहणार्थकं जगदुत्पादकत्वं तटस्थलक्षणमेव बोधयति, न तु स्वरूपलक्षणम् इदं च जगदुत्पत्यनन्तरं ज्ञातुं शक्यते—इति मूलतत्त्वं न केनापि शब्देनाभिधीयते। अतएव "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इत्याद्या श्रुतिः संगच्छते। श्री भागवते च दशमस्कन्धे वेदस्तुतिप्रकरणे "अनिर्देश्ये ब्रह्मणि श्रुतयः कथं चरन्ति" अर्थात् यदा ब्रह्म वागगोचरं तदा श्रुतिभिः कथं प्रतिपाद्यत इति परीक्षितः प्रश्नं वेदानां मुखेनैव समादधता श्रीशुक्राचार्येण वेदकृता स्तुतिः "त्वयि हि फलन्त्यतन्निरसनेन भवन्निधना" इत्युपसंहता। अथ "भवन्निधना त्वयि हि फलन्ति" इत्यादिना

अवसाने ब्रह्मण्येव श्रुतीनां तात्पर्यमिति स्पष्टीकृतम्, परं तत्र प्रतिपादनप्रकारः 'अतन्निरसनेन' इति तृतीया विभक्त्या, 'अतन्निरसनम्', अर्थात् बुद्ध्युपारूढ-तत्तद्धर्माभावबोधनमेवेति स्पष्टमुक्तम्। शिवमहिम्नस्तोत्रे— श्रीपुष्पदन्ताचार्येणापि—

**"अतद्व्यावृत्त्या चकितमभिधत्ते श्रुतिरपि"**

इत्यभिधानप्रकारः, अतद्व्यावृत्तिरूप एव स्वीकृतः। तस्मात्तटस्थ-लक्षणेन अभावमुखेन वा श्रुतिपुराणादिषु निर्गुणनिर्धर्मकमूलतत्त्वप्रतिपादनमिति जगद्गुरु श्रीशंकराचार्यचरणसिद्धान्तमनुसरतां पन्थाः।

## अन्येषामपि समन्वयः

उपासनामार्गमेव प्रधानतयाऽभ्युपयन्तः श्रीमद्भगवद्रामानुजाचार्यचरणास्तु सर्वजगन्मूलकारणं भगवन्तं परमात्मानं प्राकृतगुणदोषलेशशून्यमप्यलौकिका-प्राकृतानन्तकल्याणगुणनिधिं मन्यन्ते। श्रीभगवद्वल्लभाचार्यचरणाश्च निर्गुणसगुणत्वे कार्पाससूत्रन्यायेन समावेशयन्ति। तथा हि कार्पासं पूर्वं न सूत्राधारम्, किन्तु तदेव सूत्राणि सृजति, अनन्तरं च वेष्टनेन स्वयमपि सूत्रवत् संभवति, तथा—परं ब्रह्मापि मूले न गुणवत्, किन्तु सर्वेषां गुणानामुत्पादकं, उत्पादनानन्तरं च तान् गुणान् गृह्णत् सगुणं भवत्येवेति। चिदानन्दावपि तदिच्छया तत एव मूलादाविर्भवतः सोऽविकृत एव चिदानन्दरूपेण परिणमतीति यावत्। आगमशास्त्रेण च निर्गुणेऽपि परमशिवे स्वातन्त्र्यं नाम धर्मोऽभ्युपगम्यते, तेन स्वेच्छया स सर्वं कर्तुं सर्वरूपेण वा भवितुं शक्नोतीति। सूक्ष्मरूपेण क्रियमाणे विमर्शे नैतेषु सिद्धान्तेषु कश्चन विरोधः, केवलं प्रतिपादनप्रक्रियाभेदमात्रम्, वयं हि जीवाः प्राकृतैरेव गुणैः परिचिताः, तानेव तत्तच्छब्दबोध्यान् जानीमहे, नत्वप्राकृतानलौकिकान् गुणान् परिचिनुमः, तदा कथं तत्तच्छब्दवाच्यतां तेषां गृह्णीमहि, तथा चालौकिकाप्राकृता-नन्तगुणगणनिधिरपि स भगवानस्मद्दृष्ट्या निर्गुण एव, अस्मत्परिचितानां प्राकृतानां गुणानामभावात्, सृष्टौ सर्वगुणोत्पादकस्तु सर्वैरपि स्वीकृत एवेति वस्तुनि न किमपि वैलक्षण्यम्, प्रतिपादन-प्रक्रिया-भेदमात्रम्। इमं च शब्दभेदमेव लक्ष्यीकृत्य स्वस्वपणसाधने बहुपराक्राम्यन्ति सूरय इति न तस्मिन् विवादक्षेत्रे वयमवतरामः। भवतु नाम, पुराणानि तु श्रुत्यनुगामीनि निर्गुणं निर्धर्मकमखण्डं मूलतत्त्वमेव प्रतिपादयन्तीति निदर्शितं प्राक्। □

# शक्तिनिरूपणम्

एवं विधात् सततमेकरूपादविक्रियात् कथं सृष्टिः संभवतीत्याशङ्क्य अस्ति तत्रालौकिकी शक्तिरिति पुराणानि समादधति। तथाहि वैष्णवे पुराणे—

मैत्रेयः— **निगुर्णस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः।**
**कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते॥ इति प्रश्नः।**

उत्तरयति पराशरः—

**शक्तयः सर्वभावानामचिन्त्या ज्ञानगोचराः।**
**यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः॥**
**भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता॥2॥**

**(प्र. अंश., अध्यायः 3)**

सर्वेष्वेव पदार्थेषु यत्किञ्चित्कार्यजननशक्तिरुपलभ्यते, यथाग्नावुष्णताशक्तिरस्ति, यया दाहादौ कारणत्वमग्नेर्विज्ञायते। एताश्च शक्तयस्तत्र तत्र कार्यदर्शनेनैवानुमीयन्ते, न तु कार्योत्पत्तेः प्राग्विज्ञायन्ते, तस्मादचिन्त्या इमाः अनिर्वाच्या दृशा कल्पयितुमशक्याः। एकैकस्मिन् तृणविशेषेऽपि कियदस्ति रज्जुनिर्माणरोगापहरणदुग्धोत्पादनादिविविधसामर्थ्यमिति कस्तादृक् तृणदर्शनमात्रेण परिचेतुं शक्नुयादर्वाग्दृक् पुरुषः, कार्यदर्शनेनैव ता अनुमीयन्ते। एते च शक्तिविशेषास्तृणेऽनुमीयमाना अपि तृणाद्यभिन्नाः, उत भिन्नाः, अग्नेरुष्णता अग्नेरभिन्न उत भिन्नेत्यपि निर्धारयितुं न शक्यते इत्यचिन्त्याः शक्तयः। तथैव ब्रह्मण्यपि जगदुत्पादनपरिरक्षणसंहरणादिशक्तयः सन्ति, याभिस्तानि तानि कार्याणि क्रियन्ते-इत्युत्तरस्याभिप्रायः। कार्यभेदाच्छक्तिभेदमुपगम्य शक्तय इति बहुवचनमत्रोपात्तम्। एकैवशक्तिर्विभिन्नानि कार्याणि संपादयतीति लाघवेनैकत्वमपि शक्तेरन्यत्रान्यत्र व्यवह्रियते। एवमेव पाद्मे सृष्टिखण्डे तृतीयाध्यायस्यारम्भे भीष्मपुलस्त्ययोः प्रश्नोत्तरे, तत्रापि प्रायेण तान्येवाक्षराणि। अन्ते तु तत्र 'उत्पन्नः प्रोच्यते ब्रह्मान्नित्य एवोपचारतः' इति भगवता पुलस्त्येन विशेष उक्तः। श्रीभागवते च विषयोऽयं विस्तृत्य प्रतिपादितः, तत्र हि तृतीये स्कन्धे पञ्चमेऽध्याये—

**सा वा एतस्य संद्रष्टुः शक्तिः सदासदात्मिका।**
**माया नाम महाभाग ययेदं निर्ममे विभुः॥24॥**

इति पूर्वं मैत्रेयोक्तं श्रुत्वापि विदुरः पृच्छति–

**ब्रह्मन्? कथं भगवतश्चिन्मात्रास्याविकारिणः।**
**लीलया चापि युज्येरन् निर्गुणस्य गुणाः क्रियाः॥** (अ. 3-1)

लीलामात्रेणापि कुतो न युज्येरन् इत्युपपादयति विदुरः–

**क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषान्यतः।**
**स्वतस्तृप्तस्य च कथं निवृत्तस्य सदान्यतः॥2॥**

अयं भावः–किमर्थं भगवान् सृष्टिं करोतीति प्रयोजनानुयोगे बालो यथा निष्प्रयोजनमेव क्रीडादिकं करोति तथा प्रयोजनमनपेक्ष्यापि भगवतः सृष्टिः। कश्चिद्राजा धनिको वा यथा तिष्ठन् विनोदाय स्वकरस्थं पुष्पं भ्रामयति, न तत्र प्रयोजनापेक्षा, तथैव भगवतोऽपि विनोदमात्रमेतत् सृष्ट्यादिकम्। अस्माभिरिदं दुष्करं प्रतीयते, अनन्तशक्तेर्भगवतस्तु विना श्रमेणैव विनोदोऽयं संभवतीत्यादि यदुच्यते, तदपि न यतिः मद्वचः। बालस्य चित्तेऽस्ति चाञ्चल्यम्, तत एव तस्य मनोविनोदयितुमिच्छा भवति, विभिन्नान् बाह्यान् पदार्थान् सोऽभिवाञ्छति, अन्येभ्य एव बाह्येभ्यः पदार्थेभ्यः इच्छामुपशमयितुं तस्येहा भवति। राजा धनिको वापि रत्यरतिभ्यां मानस आक्रान्त एवेत्यरतिमपाकर्तुं विनोदं करोति। भगवांस्तु नित्यतृप्तः, न च तस्मात् किमप्यस्ति बाह्यं येन स विनोदमिच्छेत्, आत्मारामोऽपि कथं बाह्यं स्रष्टुमिच्छेदिति शंका नोक्तदृष्टान्तेन निवर्तत इति। जीवानां सुकृतदुष्कृतफलानि दातुं प्रभुरेव स जगत्सृजतीति दर्शनान्तररीत्यापि नोपपद्यते प्रयोजनम्। प्रभुर्हि स्वशासनं व्यवस्थापयितुं कर्मफलानि ददाति, न त्वाप्तकामस्य शासनव्यवस्था कामोप्युपपद्यते। जीवानां बन्धनस्यैव प्रागभावेन कारुण्यात्तन्मोचनेच्छापि न संभवति। यदप्युच्यते अस्ति तस्य मायाख्या शक्तिः, तया स सृजतीति, तदपि निराकरोति विदुरः–

**अस्राक्षीद्भगवान् विश्वं गुणमत्यात्ममायया।**
**तया संस्थापयत्येतद्भूयः प्रत्यपिधास्यति॥3॥**

**देशतः कालतो योऽसाववस्थातः स्वतोऽन्यवद्।**
**अविप्लुतावबोधात्मा स युज्येताजया कथम्॥4॥**

अर्थात्—मायाख्य-शक्त्या सम्बन्ध एव तावद् भगवतो नोपपद्यते, भगवतो देशकालावस्थाभिरपरिच्छिन्नता कोऽसौ भगवत्सत्ता विरहितो देशो यत्र सा शक्तिर्मायाख्या तिष्ठेत्? सृष्टिश्च कदाचिद् भवति, कदाचित्प्रलयोभवति, पुनः सृष्टेरुद्घाटनम्, तदेष कालकृतो विपर्ययो मायायां दृश्यते, तस्मात् कदाचित्सा सिसृक्षा शक्तिर्भगवति तिष्ठति, कदाचित्तदन्या जिहीर्षाशक्तिरिति भगवतोप्य-वस्थाभेदः स्यात्। ततश्चावस्थाभिरपरिच्छिन्नत्वं छिन्नम्। मायाविशिष्टस्य च प्राप्तः कालसम्बन्धोऽपीति कथमपरिच्छिन्नता स्यात्? ननु मायया भिन्नत्वे सर्वमिदं शङ्क्येत, अभिन्नैव तु भगवता मायेति चेदुच्येत, तदपि न संभवति, भगवान् सदा निरवच्छिन्नज्ञानरूप उपपाद्यते, माया तु ज्ञानविरोधिनीति कथं तादात्म्यं संभवेत्? तस्मात् कोऽपि सम्बन्धः आधाराधेयभावो वा तादात्म्यं वा नोपपद्यत इति सम्बन्धस्यैवाभावे कथं सा भगवतः शक्तिः?

किञ्च जीवरूपेण भगवानेव सर्वशरीरेष्वनुप्रविष्टः, ततश्चैक एव क्वचिद् दुःखमनुभवति, क्वचित्सुखम्, क्वचिदीश्वरभावम्, क्वचिच्च दीनतामिति विरुद्धा धर्मा एकत्र कथमुपपद्येरन्नित्याह—

**भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः।**
**अमुष्य दुर्भगत्वं वा क्लेशो वा जन्मभिः कुतः॥इति॥5॥**

उत्तरयति भगवान् मैत्रेयः—

**सेयं भगवतो माया यन्न येन विरुद्ध्यते।**
**ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम्॥8॥**

**यदर्थेन विनामुष्य पुंस आत्मविपर्ययः।**
**प्रतीयत उपद्रष्टुः स्वशिरच्छेदनादिकः॥9॥**

**यथा जले चन्द्रमसः कम्पादिस्तत्कृतो गुणः।**
**दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः॥10॥**

**स वै निवृत्तिधर्मेण वासुदेवानुकम्पया।**
**भगवद्भक्तियोगेन तिरोधत्ते शनैरिह॥11॥** इत्यादि

अयमभिप्रायः—उपपत्या यद्यपि शक्त्या मायया सम्बन्धो, निर्गुणाज्जगदुत्पत्तिः, एकस्यैव विभिन्नेषु क्षेत्रेषु सुखदुःखयोगित्वं चेत्यादिसर्वविरुद्धमिवाभाति, नयेन तर्केण नोपपद्यते, तथापि तदेतत्सर्वं भवत्येवेति किमत्र वदामः। अतएव सा शक्तिर्माया-पदेनाभिधीयते। 'अघटितघटनापटीयसी' हि माया भवति, उपपत्ति-

विरुद्धमपि सा दर्शयति। अनुभूयते च प्रत्यहमघटितघटना जीवैः। स्वप्ने हि खड्गादिविरहेऽपि, छेत्तुरभावेऽपि स्वशिरसश्छेदादिकं जनः पश्यति। तत्र केन शिरश्छिन्नम्, केन वा दृष्टम्, शिरसैव सह चक्षुणो निर्गमनेन दर्शनसाधनाभावादिति सर्वं नोपपद्यते, तथापि दृश्यत एव। मूलभूतात्मन्यसदपि च दुःखादिकमनुभूयत एव। यथा जलप्रतिबिम्बितस्य चन्द्रस्य जलकम्पे कम्पः प्रतीयते, तथाऽन्तः-करणप्रतिबिम्बित आत्मन्यन्तःकरणधर्मप्रतीतिः। कथं नीरूपस्यात्मनः प्रतिबिम्ब इत्यादि तु उपपादयितुमशक्यमपि माया बलादेव स्वीकर्तव्यमापतति।

लोकेप्यैन्द्रजालिकाः कथं क्षणेन विशालं प्रासादं निर्मिमते विना सामग्रीम्, कथं वा कैश्चित् क्षणैरेव वृक्षादिकमुत्पाद्य तत्फलान्यपि पक्वानि जनैः खादयन्ति, कथं वा निरवलम्ब आकाशे विहरन्ति, सर्पशिरस्यपि सुन्दरीं स्त्रियमुत्पादयन्तीत्यादि न शक्यत उपपादयितुम्, तदा किमु वक्तव्यमचिन्त्यविभवस्य लीलयैव जगत्सृजतो भगवतो मायाविषये। सर्वं प्रलयादिकं कुतः स करोतीति प्रयोजनानुयोगोपि न तत्र युक्तः।

**'विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः'**

इति न्यायेन स्वतन्त्रेच्छतयैव तस्य समाधेयत्वात् अतएव ब्रह्मसूत्रकृतापि—

**'लोकवत्तु लीलाकैवल्यम्'**

इत्येव समाहितम्। आप्तकामस्यापि स्वातन्त्र्येणैव विनोदेच्छा संभवतीति न तस्य प्रयोजनविषयेऽतितुच्छा अज्ञा वयं किमपि विवेक्तुं प्रभवामो जीवाः। यथा-ह्यस्मच्छरीररुधिरं मासाद्यवयवभूता वैज्ञानिकैः स्फुटं साध्यमानाः कृमिकीटाणु-प्रभृतयोऽस्मत्कार्याकार्य-प्रयोजनं विवेचयितुं न समर्थाः तथैव वयमपि तुच्छा ईश्वरब्रह्माण्डस्य कृमिकीटाणुभूता नेश्वरप्रयोजनं चिन्तयितुं प्रभवामः। अतएव 'नैषातर्केण मतिरापनेया' इत्यादिभिः श्रुतिभिः—

**अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्।**
**प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम्॥**

इत्यादिभिर्भूयोभूयः समुद्घुष्टैः पुराणवचनैश्च तद्विषये तर्कप्रयोगः सर्वथा निवारितः। न तत्रास्मद्बुद्धिव्यापारः संभवतीत्यशक्यत्वादेव निवारणम्, न तु स्वाभिमतमस्मदादिबुद्धौ हठादारोपयितुम्। ननु भो! अविचाररम्यमेव पक्षं कथं गृह्णीमहि? न चेदुपपद्यते त्यज्यतामयं पक्षः, 'न कदाचिदनीदृशं जगत्' इति 'स्वभावादेव सर्वं जायते' इत्यनीश्वरवादपक्षस्तार्किकाभिमतः परमाणुवादः प्रकृतिवादो

वा परिगृह्यतामिति चेद्धन्त भवेदेतदेवम्—यदि ते पक्षाः सम्यगुपपद्येरन्। तेष्वपि तु पर्यालोच्यमानेष्वनुपपत्तिः पुरस्तात्स्फुरति, किमत्र क्रियताम्। सावयवस्य नित्यं दृष्टपरिवर्तनस्य प्रत्यक्षं नवनवोत्पद्यमानपदार्थघटितस्य विनश्यत्तत्तदर्थस्य च जगत एकरूपत्वं कथं बुद्धावुपारोहेत्? स्वभावश्च कथं निश्चीयताम्, कुतश्च कार्यकारणभावापरिज्ञाने कार्यार्थिनः कारणसमग्रीं संघटयितुं प्रवृत्तिः सर्वत्र परिदृश्यमानोपपाद्यताम्? गृहकारणव्यापारमन्तरेण गृहोत्पत्तिं क्वाप्यदृष्टवद्भिः पृथिव्यादिसावयवपदार्थोत्पत्तिः कर्तारमन्तरेणैव कथं बुद्धावारोप्यताम्? किमन्यत्-निरीश्वरवादिभिरपि—

**बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते।**
**ततो निरभिलप्यास्ते निःस्वभावाश्च दर्शिताः॥**
**इदं वस्तुबलायातं यद् वदन्ति विपश्चितः।**
**यथा यथार्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा॥ (बौद्धदर्शने)**

इति जगतः पदार्थानामनिर्वचनीयतैव शरणीकृता। सर्वे च नास्तिकवादाः परमाणु-प्रकृत्यादिवादाश्च ब्रह्मसूत्रभाष्येषु परीक्षिता अनुपपन्नतामेवापादिताश्चेति नात्र तद्विस्तरावसरः। आधुनिका वैज्ञानिका अपि, 'अस्मादेतदेवं जायते' इति कार्यकारणभावमात्रबोधने पाटवं प्रदर्शयन्त उपपत्तावुदासत एव, का कथा तु मूलतत्त्वविनिश्चयस्य? तस्मान्न मूलतत्त्वान्वेषणे तर्काभिनिवेशः संभवतीत्यभ्युपगम्यापौरुषेयैराध्यात्मिकीं दिव्यामृतम्भरां प्रज्ञामासाद्य महर्षिसमुपादिष्टैर्वा वेदैर्यद् बोध्यते तदेव शरणीकरणीयम्, नान्यः पन्थाः। अतएव—

**को अद्धावेद क इह अवोचत्।**
**कुत आजाता कुत इयं विसृष्टिः॥**
**अर्वाग्देवा अस्य विसर्जने नाथाः,**
**को वेद यत आबभूव।**
**इयं विसृष्टिर्यत आबभूव,**
**यदि वा दधे यदि वा न।**
**यो अस्याध्यक्षः परमे व्योमन्,**
**सो अङ्ग वेद यदि वा न वेद॥**
**(ऋ. सं. १०।१२९।६, ७)**

इत्याद्या मन्त्राः "यदि मन्यसे सुवेदेति दम्भमेवत्वं वेत्थ ब्रह्मणो रूपम् अविज्ञातं विजानताम्, विज्ञातमविजानताम्", इत्याद्या उपनिषदश्च दुरवगाहतामस्य

विषस्य बोधयन्तः, अज्ञेयत्वमेव वा जगन्मूलस्य ब्रह्मणः मायास्वरूपस्य च बोधयन्तः सर्वथैव निरवलम्बं बुद्धिव्यापारं निष्प्रयोजनं तत्र मन्यन्ते। तामेव दुरवगाहतामनुवदति पुराणमपि—

**अतो भगवतो माया मायिनामपि मोहिनी।**
**तत्स्वयं वात्मवर्मात्मा न वेद किमुतापरे॥**

**(श्रीभा. स्क. ३, अ. ६-३६)**

'औपनिषदं पुरुषं पृच्छामि', 'प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ' इत्याद्याः श्रुतयः—

**पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम्।**
**आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः॥**

इत्याद्याः स्मृतयश्च शास्त्रगुरूपदेशमेव तत्त्वज्ञाने शरणं वदन्ति। श्रीपुष्पदन्ताचार्यश्चापि स्वीये शिवमहिम्नस्तोत्रे—

**किमीहः किं कायः स खलु किमुपायस्त्रिभुवनम्**
**किमाधारो धाता सृजति किमुपादान इति च।**
**अतर्क्यैश्वर्ये त्वय्यनवसर-दुस्थो हतधियः**
**कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः॥**

**अजन्मानो लोकाः किमवयववन्तोऽपि जगता-**
**मधिष्ठातारं किं भवविधिरनादृत्य भवति।**
**अनीशो वा कुर्याद् भुवनजनने कः परिकरो**
**यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे॥**

इति मूलतत्त्वविषये तर्कस्यानवसरदुःस्थतां वदन्, निरीश्वरवादमपि तर्केणोन्मथ्नाति। अहो! कोऽपि वादस्तत्र नोपपद्यते चेद्, अज्ञेयवादमेव शरणीकृत्य सुखं सुप्यताम् किमनेन दन्तघर्षणेनेति यदि कश्चिद्वदेत्, तत्र दोषं व्यनक्ति भगवान् मैत्रेयः पूर्वोपदर्शितेनैकादशेन श्लोकेन यद्येवमौदासीन्यमलभ्येत तर्हि त्रिविधदुःखानुभवनिवृत्तिर्नस्यात्, सततं च प्रातिकूल्यपराहतैर्विकलैरेव याप्येत जीवनम्, नहि माया बन्धनच्छेदमन्तरेण दुःखनिवृत्तिः संभवति, तस्मात्सच्छास्त्रसद्गुरूपदेशमनुसृत्य भगवति विश्वस्य तद्भक्त्या मायाबन्धननिवृत्तिः संपाद्येत।

किञ्च—कथमिदं जगज्जातम्, किमस्य मूलम् इति चेतनस्य स्वभावादेवोत्तिष्ठते जिज्ञासा। या यदि शान्तिं न नीयते, व्यथामेव चेतस्युत्पादयतीति तदपनयनाय यत्न आस्थेय एव। अयमेव हि पाश्चात्यदार्शनिकानामज्ञेयवादस्यास्माकमनिर्वचनीयवादस्य च महान् विशेषो यत्ते आरम्भादेव सर्वमविज्ञेयं मत्वा

विचारादेवोदासते। वयन्तु यावती मनसो गतिस्तावद् विचार्य यत्र सर्वथा मनोगतिनिरोधस्तदनिर्वचनीयं मत्वा तत्र शास्त्रं शरणीकुर्मः। तेन जिज्ञासाजनितं दुःखमस्मन्मार्गे न स्थिरीभवति। तेषां तु स्वाभाविकी जिज्ञासा कदाचिदुदिता चेतो विप्लावयत्येवेति। तथा च भगवच्छक्त्या मायया सर्वं जगदुत्पाद्यते, न वस्तुत उत्पाद्यते अपि तु अनुपपन्नमसदेव स्वप्नादिवज्जीवान् प्रति प्रदर्श्यत इति श्रीभागवतश्लोकैर्मैत्रेयोक्तैः स्फुटीभूतम्। एतदेव च—'उत्पन्नः प्रोच्यते ब्रह्मन् नित्य एवोपचारतः' इति पूर्वोक्तेन पद्मपुराणवचनेनापि संक्षेपेण व्यज्यते। श्रीभागवते द्वितीयस्कन्धेऽपि स्पष्टा श्रीशुकोक्तिः,

**आत्ममायामृते राजन् परस्यानुभयात्मनः।**
**न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसा॥**

(अ. ९-१) इति।

सेयं माया शक्तिर्भेदाभेदाभ्यां सदसत्वरूपेण वा न निर्वर्त्तुं शक्यते। न हीयं मूलतत्त्वाद् ब्रह्मणो भिन्ना, पार्थक्येन कदापि कुत्राप्युपलब्धेरभावात्। नापि सर्वथा अभिन्ना, ब्रह्मणि जगत्कर्तृत्वं नोपपद्यत इति प्रश्नस्य समाधानायेयं-कल्प्यते। सा यदि सर्वात्मना तेनाभिन्नैव स्यात्, तत्तर्हि अनुपपत्तिप्रश्नः पुनरप्यसमाहित एव तिष्ठेत्, ब्रह्मणि प्रश्नस्योत्थितत्त्वात्, तदतिरिक्तस्य चास्वीकरणात्। नापि भिन्नाभिन्ना, भेदाभावो ह्यभेद उच्यते- यद्यस्ति भेदः, तर्हि कथमभेदो व्यवह्रियताम्, यदि च अभेदो नाम भेदाभावोऽस्ति, तर्हि भेदः कथं प्रतीतिपथामारोहेत्, तस्माद् भिन्नाभिन्नेति शब्दकल्पनैव नोपपद्यते। ततश्च भेदेन अभेदेन वा न निर्वक्तुं शक्येत्यनिर्वचनीयवाद एव गतिः। जडा, चेतना वेति, जाड्यचैतन्याभ्यामपि न निर्वक्तुं शक्यते। चितौ ह्यात्मभूतेति कथं जडा कथ्यताम्, परिणामस्त्वस्या जगद्रूपो जड एव दृश्यते, न चेतनस्य परिणतिरिति कथं सर्वात्मना चेतनापि स्यात्। ततश्चानिर्वाच्यैव। एवमेव सतीयमित्यपि न वक्तुं शक्यते, श्रुति विरोधापत्तेः, श्रुतिर्हि 'सदेवसोम्येदमग्र आसीद् एकमेवाद्वितीयम्', इति मूलतत्त्वस्य सजातीय-विजातीयभेदस्य, ब्रह्मात्मन्येव सत्वे स्वगतभेदस्य च प्रसक्त्या श्रुतिविरोधः स्फुट एव। न च पार्थक्येन सोपलभ्यते, सत्वे तु पार्थक्येनोपलब्धिर्दुष्परिहरा प्रसज्येतैव। न वा असती, सृष्ट्युत्पत्तिप्रश्नस्यासमाधेयत्वप्रसङ्गात्। न वा सदसती, सत्वस्य सत्वाभावरूपस्यासत्वस्य चात्यन्तं विरुद्धत्वेनैकत्र कथनस्यासमञ्जसत्वात्। तस्मात् सत्वासत्वाभ्यामनिर्वाच्यैवेयं स्वीकर्तव्या भवति। पुराणेषु तत्र तत्र सदसदात्मिकेति यदुक्तं तस्याप्यनिर्वचनीयतायामेव तात्पर्यम्। सत्वासत्वयोरेकत्रासंभवादिति। तदुक्तं देवीभागवते—

न सती सा नासती सा नोभयात्मा विरोधतः।
अतो विलक्षणा काचिद् वस्तुभूतास्ति सर्वदा॥
(स्क. 7, अ. 33, श्लोक. 4)

श्रुतिविरोधतो न सती, सृष्ट्युपपत्तिविरोधतो नासती, उक्तिविरोधतश्च नोभयात्मा, अतस्त्रितयविलक्षणा, किन्तु सृष्ट्युपपत्ते स्वीकार्यैव। न चाभावरूपैव, स्वरूपेणैवासतोऽभावस्य जगदुत्पादकत्वासंभवादिति वस्तुभूता सर्वदा चास्ति नित्यैवेत्यर्थः। शक्तिविरहितस्य परतत्त्वस्य कदापि कुत्रापि चासंभवादिति पद्यार्थः। अनिर्वचनीयेन च स्वीकृतेनापि न मूलतत्त्वस्यैकता विरुद्ध्यते। सत एव द्वितीयस्य तत्त्वस्य श्रुतावभावबोधनात्, अनिर्वचनीयस्य निस्तत्त्वस्य तत्त्वरूपतया अस्वीकृतत्वाच्च।

## शक्तौ श्रुतिः प्रमाणम्

इयं चैवंविधा शक्तिः श्रुत्यापि श्राव्यते। तथा हि सृष्टिप्रतिपादके नासदीयसूक्ते—

नासदासीन्नोसदासीत्तदानीम् नासीद्रजो न व्योमापरो यत्।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्॥1॥

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न् आसीत् प्रकेतः।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परं किञ्चनास॥2॥
(ऋ. सं. 10।129)

इह सृष्टेः पूर्वं संभाविताः कैश्चिदार्शनिकैरभ्युपगम्यमानाश्च सद् (सत्तानामकं तत्त्वम्) असद् (अभावः) रजः (परमाणवः) व्योम (आकाशम्) अपरः (परत्वापरत्वव्यवहार-हेतुभूता दिक्) आवरणम् (सांख्याभ्युपगता सर्वकार्याच्छादिका प्रकृतिः) अम्भः (पृथिव्यवसानेऽनन्तं जलम्), मृत्युः, (सर्वसंहारकत्वेनान्ते परिशिष्टतया संभाव्यमानः) अमृतम्, (मरणादिरहितं किमपि संभाव्यमानम्) रात्र्यहनी (एतदुपलक्षितः कालः) इति सर्वे पदार्थाः प्रतिषिद्धाः। श्रीगुरुचरणानां दशवादर-हस्योक्तदिशा तु पूर्वं साध्ययुगे प्रचलिताः सदसद्वादः, रजोवादः, व्योमवादः, वाय्वादिवादः, (अपरवादः) आवरणवादः अम्भोवादः अमृतमृत्युवादः, अहोरात्रवादः, इत्यष्टौवादाः पार्थक्येन प्रत्याख्याताः। सन्देहवादो दैववादश्चेति द्वावग्रे 6, 7 मन्त्रयोः प्रत्याख्येयौ इति दशवादाः प्रतिक्षिप्ताः। द्वितीये तु मन्त्रे 'आनीदवातमिति'

सिद्धान्त उक्तः। एकमेव सृष्टेः परं तत्त्वम् मूलतत्त्वमित्यर्थः। नान्यत्तस्मादस्ति, तदेव तु 'आनीत' प्राणिति स्म, जगद्रूपेण विकसति स्मेति यावत्। स्वयं स्वरूपादप्रच्यवतोत्पन्नानां जगद्रूपताप्रदर्शनम्, सोऽयं विकास एवं शक्यते वक्तुम्, न तु परिणामः, परिणामे स्वस्वरूपे विकारप्रसक्तेः। यद्यपि विकासेप्यस्ति रूपान्तरप्राप्तिः, मुकुलितस्य विकसितस्य च कुसुमस्यैकरूपताया अदर्शनात्, तथापि स्वरूपाप्रच्युतेः कथञ्चिद्विकासशब्दः शक्यते प्रयोक्तुम्। वस्तुतस्तु न कोऽपि शब्दप्रयोगस्तत्र संभवतीति वाङ्मनस्यातीतत्वं प्रागेवावोचाम, परं शब्दप्रयोगमन्तरेण बोधयितुमशक्यत्वात् कथञ्चित्तामवस्थामुपलक्षयितुं समर्थः कश्चिच्छब्दः परिग्राह्य एव, तत एवागमशास्त्रे विकासशब्दः परिगृहीतः, श्रुतिस्तूक्ता तत्र आनीदिती प्राणनशब्दमाह। अन्तर्गतस्य बहिर्निःसारणं हि प्राणनम्, एकस्यापि तस्यान्तरे सर्वं वर्तत एवास्फुटमिति स्वान्तर्भूतं जगदेव बहिर्निःसारयति इति सर्वाः श्रुतयः स्मृतश्च व्याचक्षते, सत्कार्यवादसिद्धान्ते अन्यस्योत्पादनस्य वक्तुमशक्यत्वादिति स्थाने प्राणनमभिहितं श्रुत्या। प्राणनं त्वस्मद्देहादिषु वायोजनिते लोकाः, ततश्च वायुरूपमेव मूलतत्त्वं स्यादिति संभावनामपाकर्तुम्, 'अवातम्' इति वातरूपता प्रतिषिद्धा, प्रतिषेधप्रकारमनाश्रित्य न मूलतत्त्वं व्याख्यातुं शक्यमित्येतदप्यनेन सूचितम्। तत्र च प्राणनरूपे जगदुत्पादने शक्तिरेव हेतुरिति 'स्वधया' इति तृतीयान्तेन शक्तिबोधकेन स्वधापदेनाम्नातम्। स्वधापदं हि अन्ननामसु जलनामसु च निघण्टुषु पठ्यते, 'स्वधे' अति द्वितीयान्तं द्यावापृथिवीनामस्वपि पठितम्। एषां च सर्वेषामत्र पूर्वमेव प्रतिषेधः कृत इत्येषां कारणावस्थारूपाशक्तिरेवात्र ग्राह्या। यथा हि ब्रह्मसूत्रेषु प्रथमाध्यायचतुर्थपादारम्भे—

**इन्द्रियेभ्यः पराह्यर्थाः अर्थेभ्यश्च परं मनः।**
**मनसस्तु पराबुद्धिर्बुद्धेरात्मा महान्परः॥**
**महतः परमव्यक्तमव्यक्तात्पुरुषः परः।**
**पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः॥**

इति कठश्रुतिं स्वपक्षे योजयतां सांख्यानां मतमपाकर्तुम्, 'आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्त गृहीतेर्दर्शयति च' इति सूत्रेण कठोपनिषदेव—

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥

इति रथरूपके ये पदार्था विन्यस्ताः, त एवात्र गृह्यन्ते न तु तत्र प्रकृतितत्त्वं विन्यस्तम्, तस्मान्न तदिह ग्रहीतुमुचितम्-इति प्रदर्शिते सिद्धान्ते किं तर्हि अव्यक्तशब्देन ग्राह्यम्, न तु तदव्यक्तशब्देन ग्रहीतुं शक्यत इत्युत्थितायां शङ्कायां शरीरस्य पूर्वावस्था अव्यक्तशब्देन ग्रहीतव्या, अन्यथा श्रुत्योः समन्वयो न स्यादिति समाधीयते। तद्वदेवात्रापि अन्नजलादीनां द्यावापृथिव्यादीनां वा अव्यक्तावस्था मायाशक्तिरेव ग्रहीतुमुचिता भवति। 'स्वस्मिन् मूलतत्त्वे धीयते, स्वं मूलतत्त्वं दधाति पोषयतीति' वा व्युत्पत्तिरपि मायाशक्तौ युज्यते। ततश्च स्वधया माययातां हेतूकृत्येति यावत्-प्राणनम् जगदुत्पादनेमेकस्य श्रुत्या निर्दिष्टम्। ततश्च असदेव जगत् कथमुत्पाद्यते इति शङ्कां निराकर्तुमव्यक्तरूपेण जगतः सत्ता पूर्वमप्यासीदित्यग्रिमेण मन्त्रेणाम्नायते–

**तम आसीत्तमसा गूढमग्रे प्रकेतं सलिलं सर्वमा इदम्।**
**तुच्छेनाभ्वपिहितं यदासीत्तपसस्तन्महिम्ना जायतैकम्॥3॥**

आ समन्ताद् दृश्यमानं सर्वमिदं जगत् तमोरूपम्-अव्यक्तरूपम्, मायान्तः प्रविष्टत्वात्-तमःपदवाच्यमायारूपमेव वा तमसा अज्ञानेन मायासंभूतेन तमोगुणेन वा तिरोहितम्, अग्रे-सृष्टेः पूर्वमासीत्। तच्च अप्रकेतम्, तस्यानुमितये लिङ्गमपि नासीदित्यर्थः। तत्रोपमामाह सलिलमिति। यथा सलिले निमग्नं न किमपि दृश्यते। सलिलस्य तरङ्गा अपि तत्राव्यक्ता न प्रतीयन्ते, तथैव जगत्तमसि लीनमासीदित्यर्थः। भाष्यकारस्तु अस् धातोर्लटि आसीदित्यस्य स्थाने छान्दसमा इति क्रिया-पदं व्याचष्टे। लुप्तोपमेयम् आ इति निपातो वा अनेकार्थत्वादुपमावाचकोस्तु।

कीदृशी सा माया यया जगत्तिरोहितमिति तस्याः स्वरूपमाह आभुव्याप्तं महदपीदं जगत्, तुच्छेन-अनिर्वचनीयेन केनापि मायापदार्थेन अपिहितम्, निगूहितम् आसीत्। आभु सर्वव्यापकं तन्मूलतत्त्वं वा तुच्छ्येन मायापदार्थेन अपिहितम् आवृतमिवासीत्। यद्यपि तस्य स्वयं प्रकाशस्यावरणं न संभवति, तथापि–

**घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्यते निष्प्रभं चातिमूढः।**
**तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा॥**

इत्युक्तदिशा अस्मदादिदृष्ट्या आवृतत्वं श्रुत्यानूदितम् इत्यपि संभवति व्याख्या। अनेन तुच्छपदेन मायाया अनिर्वचनीयता स्फुटीकृता। पूर्वमन्त्रे स्वधा-शब्देनानिर्वचनीयमायैवाभिप्रेतेत्यपि तुच्छपदेनानेन व्यञ्जितम्। मनुनाप्येतदनूदितम्–

**आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।**
**अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः॥**

अत्रापि प्रसुप्तम्—इतिपदेन निबोधकेन तन्मूलभूततमोगुणविशिष्टा मायैवोपलक्षिता। इव पदेन च तस्या अवस्तुत्वम्-अनिर्वचनीयत्वं व्यञ्जितमिति। अनया श्रुत्या सत्कार्यवादोऽपि स्पष्टं व्यञ्जितः। यत्सदपि कारणावस्थया आवृत्तं तदेव प्रादुर्भवति, यत्तु नास्त्येव तन्नैव जायते।

**"नासतो विद्यते भावो नाभावो विद्यते सतः"**

इति भगवद्गीताप्रतिपादिताद् दृढतमसिद्धान्तात् सिद्धमिदम्। यदि हि असदेव जायते इत्युक्तं स्यात्, तर्हि को नाम जनिक्रियायाः कर्ता? असतः कर्तृत्वासंभवात्। अकर्तृकायाश्च क्रियाया असंभवादित्यादिप्रपञ्चः सांख्यदर्शनादौ द्रष्टव्यः। तदनन्तरं कथमेतदाविर्भूतमित्याह एकमेव तन्मूलभूतं ब्रह्म तपसः महिम्ना—

**"यस्य ज्ञानमयं तपः"**

इत्युक्तदिशा द्वैतज्ञानरूपेण तपसा अजायत्-व्यजायत इति स्पष्टमेव। इदं द्वैतज्ञानमपि मायाशक्तेर्वृत्तिरूपमेव भाव्यम्, मायाशक्तेः पूर्वं निरूपितत्वात्। तत्रापि सर्वभवने किमुद्देश्यम्, इति चेत् कामरूपाया इच्छापरनामधेयाया मनःपदवाच्याया मायाया वृत्तिरेव तत्र कारणमित्युच्यते—

**कामस्तदग्रे समवर्तताधि मनसोरेतः प्रथम यदासीत्।**
**सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवया मनीषा॥4॥**

मनसः—मनःपदवाच्याया मायाया एव रेतः सारः—, प्रथमम्, प्रधानवृत्तिरूपः स कामः इति स्पष्टमत्र श्रावितम्—इतिभाष्यकृन्माधवाचार्यः। अयं पूर्वभागोऽग्रे पुरुषनिरूपणप्रसङ्गेऽस्माभिः श्रीगुरुचरणरीत्यापि स्फुटं व्याख्यास्यते। सर्वभवनानन्तरं कामो निर्दिष्ट इत्यग्रे जनिष्यमाणः कोऽपि कामोऽत्र विवक्षितः स्यादिति संभावनामपाकर्तुमग्रे पदमत्र श्रुत्या श्रावितम्। अग्रे पूर्वमेवेत्यर्थः। ब्राह्मणोपनिषदादिष्वपि सर्वत्र 'स ऐक्षत' इतीच्छैव पूर्वमुच्यते, इच्छापूर्विकैव सृष्टिः सर्वत्रोक्ता। पुनरपि द्रढीकर्तुं मायाया अनिर्वचनीयता श्राव्यते—यत् सतः सत्वेन प्रतीयमानस्य जगतो बन्धुम्-बन्धनम्-नित्यसम्बन्धम् असति—अतत्त्वभूतायां मायायां निरविन्दन्-लब्धवन्तः, के? इत्याह-कवयः-बुद्धिमन्तो महानुभावा ऋषयः, कथमित्याह-हृदि प्रादुर्भूतया परमात्मप्रेरितया बुद्ध्या प्रतीष्य विचार्य इति। यदा सत्वेन प्रतीयमानस्य जगतः तस्यां नित्यसंबन्ध ऋषिभिर्दृष्टः, तदा सा असती सर्वथा कथं स्यात्? तस्मादनिर्वचनीयतायामेव पर्यवसानम्। सतः परमात्मनो बन्धुम्-सहचारिताम्-नित्यसम्बन्धम्-असति पूर्वोक्तायां मायायां दृष्टवन्तो महर्षय इति वा व्याख्येयम्। तेन मायाया नित्यसम्बन्धः सद्धयति, कदाचित्, प्रसुप्तावस्था, कदाचिच्च

कार्यकरणावस्थेति। भाष्यकारस्तु असति मायायाम्, बन्धुम्-बन्धकम् पूर्वकल्पकृतं कर्म दृष्टमिति व्याचष्टे। प्राणिकर्मपरिपाकेन भगवतः सिसृक्षा जातेत्यर्थः। तेन अविद्या कामकर्माणि सृष्टिहेतव उक्ताः। अनन्तरं तु सृष्टेर्विस्तार आम्नायते—

**तिरश्चीनो विततो रश्मिरेषामधःस्विदासीदुपरि स्विदासीत्।**
**रेतोधा आसन् महिमान आसन् स्वधा अधस्यात् प्रयतिः परस्तात्॥**

अत्र रेतोधा इति अक्षरपुरुषकलाः, जीवा वा उच्यन्ते इत्यप्यग्रे पुरुष निरूपणे विशदीकार्यम्। तेषां च व्याप्तिः पूर्वार्द्धे मन्त्रेऽभिहिता। तेषां रश्मयो अध उपरि तिर्यक् च वितता इति त एव रश्मयो महिमान उच्यन्ते, क्षरपुरुषकला वा महिमत्वेन व्याख्येयाः।·

सर्वेषामेषामधस्ताद्-आधारभूतापूर्वभवा स्वधा-माया, इयं प्रयतिः—प्रयत्न-परिणामभूता सृष्टिः प्रयत्नोत्पादिका इच्छा वा परस्ताद्भवतीति पुनः स्मारितम्। गम्भीरेषु हि विषयेषु पुनः पुनः कथनेनैव ग्रहणं भवतीति पुनरुक्तिर्न दोषाय मन्यते। भाष्यकारश्रीमाधवाचार्यस्तु सर्वमिदं शीघ्रमुत्पद्यत इति शीघ्रताबोधन- परत्वेन मन्त्रमिमं व्याख्यातवान्। एषां-पूर्वोक्तानां कामकर्मादीनाम् रश्मिरिव रश्मिः, यथा सूर्यस्य रश्मिः सर्वं जगत् त्वरितं व्याप्नोति तथा विततः, आकाशादि- प्रपञ्चं शीघ्रमुत्पाद्य तत्र प्रविष्टः। अयं चाकाशादिः प्रपञ्चः, तथा शीघ्रतया उत्पन्नः यथास्वित् कस्तत्र अधः पूर्वमासीत्, स्वित्-किं वा उपरि पश्चादासीत्, को वा तिरश्चीनः-तिर्यग्भूतः-मध्ये आसीद् इत्येतन्नावधारयितुं शक्यम्। इदं सर्वं मायायामन्तः-तिरश्चीनः-तिर्यङ्निहितमासीत्, अधः-नीचैः-उपरि वा निहितमासीदिति न ज्ञायते इति वा व्याख्येयम्। तेन मायाया दुरवगाहता स्फुटीकृता। तत्रोत्पद्यमाने जगति-रेतोधाः-जीवा आसन्-प्रादुर्भूता-जीवभावेन विज्ञाता इति यावत्। भोक्तारो जाता इत्यर्थः। महिमानः तद्भोग्याः वियदाद्याः शब्दाद्याश्च विषया आसन्-उत्पन्नाः। तत्र स्वधा अन्नाद्याः भोग्यतया अधस्तात्-अपकृष्टाः भवन्ति, प्रयतिः-प्रयत्नवन्तो जीवास्तु परस्तात्-उत्कृष्टा भवन्तीत्यर्थसात्संमतः। महामहिमसु मन्त्रेषु विविधा अर्थाः संनिविष्टा इति कथञ्चिदपि बुद्ध्यताम्। विरोधस्तु व्याख्यायां कोऽपि नास्ति-विपरीतार्थाप्रतिपादनादिति। विषयस्य दुरवगाहत्वं पुनर्मन्त्रद्वयेन प्रतिपादितम्—

**को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टि।**
**अर्वाग् देवा अस्य विसर्जने नाथा को वेद यत आबभूव॥6॥**

**इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।**
**यो अस्याध्यक्षः परमे व्योमन् सो अङ्ग वेद यदि वा न वेद॥7॥**

इति सप्तमस्योत्तरार्धेन अविज्ञेयता रूपानिर्वचनीयतात्यन्तं स्फुटीकृता। अन्यथा सर्वज्ञस्याध्यक्षस्य परमात्मनः कथमज्ञानं संभाव्यते। वस्तुतस्तु तत्तत्त्वमेवाविज्ञेयम् ततः परमात्मापि ज्ञेयतां कथं तत्रोत्पादयदित्याशयः। श्रीगुरुचरणानां दशवादरहस्योक्तरीत्या तु साध्यदेवतासु प्रचलितो नवमो देववादः। दशमः संशयवादश्चायमन्त उपन्यस्तः। स च सिद्धान्तबोधनेन पूर्वमेव प्रत्याख्यात इत्यन्ते निर्दशनमात्रमिति। तदित्थं मन्त्रभागे शक्तिविवरणं स्पष्टं प्रदर्शितम्। श्वेताश्वतरोपनिषद्यपि—

**तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम्।**
**पतिं पतीनां परमं परस्ताद् विदाम देवं भुवनेशमीड्यम्॥**

इति मूलतत्त्वं प्रकृत्य—

**न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।**
**परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च॥**
(अध्या. 6, म. 7-8)

इत्येवं शक्तिः श्राविता। उपनिषदारम्भ एव—**किं कारणं ब्रह्म कुतश्च जाताः**—इत्यादिना कारणं ब्रह्मेव प्रस्तुत्य 'भूतानां योनिम्' इति सर्वकारणतया च तन्निर्धार्य यदिह कारणत्वम् तस्य प्रतिषिध्यते, शक्तिसम्बन्धेनारोप्यमाणं कारणत्वं त्वनुज्ञायते। तदेव च क्रमेण बुद्धावारोपयितुमारम्भेनूदितम्, एकवाक्यतया स्वाभाविकी ज्ञानबलक्रियापि च शक्तिविशिष्टस्यैव श्राविता इति।

**ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्।**
**यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः॥ (1।3)**

इति शक्तिविशिष्टस्यैव कारणाद्यधिष्ठानमाम्नातम्। अग्रेऽपि—

**स एको वर्णो बहुधा शक्तियोगात्।**
**वर्णाननेकान् निहितार्थो दधाति॥ (4।1)**
**स एको जालपानीशत ईशनीभिः।**
**एको हि रुद्रो न द्वितीयाय तस्थुर्य।**
**इमान् लोकानीशतईशनीभिः॥**

ईशनोभिः—शक्तिभिरित्यर्थः

**मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।**
**तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्॥ (4।10)**

इत्यादिना बहुधा शक्तिविशिष्टस्यैव कर्तृत्वं श्रावितम्। शक्तेश्च मायारूपताप्याम्नाता।

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजामानां सरूपाः।**
**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥ (3।5)**

इति तस्या बन्धकत्वमप्युक्तम्। यद्यपि मन्त्रेऽस्मिन् ब्रह्मसूत्रेषु भगवता व्यासेन प्रकृतिप्रतिपादनम् प्रत्याख्यातम्, तथापि स्वतन्त्रप्रकृतिप्रतिपादनस्यैव निषेधे तत्र तात्पर्यम्, तेजोऽबन्नानां पूर्वावस्थारूपा ब्रह्मपरतन्त्रा शक्तिरत्र प्रतिपाद्यत इति तु स्वीकृतमेवेति स्पष्टं भाष्ये। तदेवं श्वेताश्वतरोपनिषदि शक्तेः पूर्णमेव विवरणमुपलभ्यते। केनोपनिषद्यपि—चेन्द्राग्निवायूनां स्वस्यैव शक्तिमत्वम-भिमन्यमानानां मदोपघाताय महाशक्तिः प्रादुर्भूता, तया च ब्रह्मण एव युष्मासु अंशभूता शक्तिरिति ते देवा अनुशिष्टाः, तस्याश्च उमा हेमवतीति नामेत्याद्याम्नातम्। अन्यत्रापि सर्वत्र सृष्टिप्रक्रमे 'स ऐक्षत' 'सोऽकामयत' इत्यादिना ईक्षणकामादिशब्दैः शक्तेरेव कामादिवृत्तय आम्नाता। त्रिविधभेदरहिते कूटस्थे ब्रह्मणिवृत्तीनामसंभवात्, ततश्च वृत्तिवृत्तिमतोरभेदप्रक्रियया शक्तिः सर्वत्राभ्युपगतैव, 'मायीसृजति' इत्यादिना मायापदेन तस्या अनिर्वचनीयतापि चोक्तप्राया।

**ज्ञानस्वरूपमत्यन्तं निर्मलं परमार्थतः।**
**तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम्॥ (ब्रह्मपु. 1।26)**

इत्यादिना पुराणेषु बहुधा जगतो मायिकत्वं भ्रान्तिकल्पितत्वं वा निरूप्यते। तस्मादनिर्वाच्या भ्रान्तिमूलभूता मायाख्या शक्तिः सर्वश्रुतिपुराणादि प्रसिद्धा, तस्या मायाया एव परिणतिभूताः सर्वे कर्तृत्व-पालकत्वसंहर्तृत्वाद्या धर्माः इति वस्तुतो निर्धर्मकं निर्गुणमपि ब्रह्म माया शबलितं विशिष्टब्रह्मरूपतां गतं सर्वधर्मोपपन्न-मनन्तगुणाढ्यं तत्तदाकारं विशिष्टं च प्रतीयते, तत्रैव ब्रह्मादिस्तम्बपर्यन्तं सर्वं जगदध्यस्यते इति श्रीशङ्करभगवत्पादक्षुण्णो व्याख्यामार्गः। अन्येषामाचार्याणां प्रक्रिया कथञ्चिद् भिद्यते।

## शक्तिविषये आचार्याणां मतानि

श्रीमद्भगवद्वल्लभाचार्यचरणा 'एकमेवाद्वितीयम्' इति श्रुतिं मूर्ध्नि दधतः परतत्त्वे काञ्चिदपिशक्तिं सृष्टेः पूर्वं नाभ्युगच्छन्ति। निर्गुणादविकुर्वाणान्मूलतत्त्वात् सृष्टिः कथमिति प्रश्नं तु तस्यालौकिकेन स्वरूपभूतेन सर्वभवनसामर्थ्येन समादधते। यदा हि कल्पतरु-चिन्तामणिप्रभृतीनां जगदन्तर्गतानामपि स्वरूपेणाविकुर्वाणानामेव

विचित्रपदार्थोत्पादकत्वं भगवदिच्छैव वर्ण्यते, तदा किं नाम दुष्करं स्वेच्छामात्रेण जगदुत्पादयतो भगवत इति। तदेतत्सर्वभवनसामर्थ्यमेव शक्तिपदेन वर्ण्यते चेत्कामं वर्ण्यताम्, परं तद्भगवतः कथमपि भिन्नमपि तु स्वरूपमेव। यास्तु मायाप्रकृत्यादयः शक्तयो व्याख्यायन्ते ता एतास्तत एव भगवत आविर्भवन्ति, भगवानेव तत्तच्छक्तिरूपेणाविर्भवतीति यावत्। पूर्वं हि निर्धर्मको भगवान् कार्पायासूत्रन्यायेन पूर्वोक्तेन धर्मरूपो भवन् ज्ञानानन्दकामेच्छाक्रियामायाप्रकृतिरूपेण भवति। तत्र कासाञ्चिच्छक्तीनां सर्वदैकरूपतां भगवानेव स्थापयति, कासाञ्चित्तु परिवर्तन-शीलताम्। तत्र 'बहुस्याम्' इति अभिध्यानरूपयेच्छया भेदोऽपि परस्परं धर्माणामुत्पादितानां जन्यते, तेन सच्चिदानन्दा अपि परस्परं भिन्नरूपा भवन्ति। एतैश्चाश्रयोऽपि क्रियावान्, ज्ञानवान्, आनन्दी च भेदेनैव प्रतीयते। एभिर्धर्मैरेव च स भगवत्पदवाच्यो भवति, सर्वतः पाणिपादः सर्वतोऽक्षिशिरोमुखः सर्वतः श्रुतिमान् सर्वावरकश्च भवति। धर्मरूपतां गतस्य भगवतः सदंशादव्यक्तम्, बाह्या जीवबन्धकाः प्राणाद्याः चिदंशाद्दशविधप्राणसम्बन्धमापद्य जीवाः, आनन्दांशाच्च तन्नियामका अन्तर्यामिणो जायन्त इतीयमाविर्भावरूपास्वरूपसृष्टिप्रक्रिया। तदित्थं श्रुतिपुराणादिषु या शक्तिरेकरूपानेकरूपा वा व्याख्याता, सा सर्वापि सृष्टिकाले मूलतत्त्वादाविर्भवति, न तु मूल एव सा मन्तव्या। मूले तु स्वरूपभूतं सामर्थ्यमेव शक्तिपदेन क्वचिदभिहितम्। 'एकं वा इदं विबभूव सर्वम्' 'पुरुष एवेदं सर्वम्' इत्यादिश्रुतिशतैरेतदेवाम्नायते। अत्रैव पुराणानामप्यनुकूलता। विष्णुपुराणे हि—

**परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज।**
**व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथा परम्॥**
**प्रधानपुरुषा व्यक्तकालानां परमं हि यत्।**
**पश्यन्ति सूरयः शुद्धं तद्विष्णोः परमं पदम्॥ (अध्याय 1/15-16)**

इति स्फुटं त्रिगुणात्मिकाया अव्यक्तरूपायाः शक्तेर्विष्णुरूपत्वम्, शुद्धं तु तस्य परमं रूपमिति वदता भगवता पराशरेण परतत्त्वाद्विष्णोः प्रधानस्योत्पत्ति-रभिव्यञ्जिता। पाद्मेऽपि च स्वर्गखण्डनाम्ना मुद्रिते सर्गखण्डे (2, अध्याये) निर्गुणं ब्रह्म प्रतिपाद्य—

**'तस्मात् प्रधानमुद्भूतं ततश्चापि महानभूत्'**

इत्यादिना प्रधानपदवाच्यायाः प्रकृतेर्ब्रह्मण उत्पत्तिः स्पष्टमाख्याता। एवं ब्रह्मवैवर्ते च ब्रह्मखण्डे द्वितीयतृतीयाध्याययोर्मूलतत्त्वात् कृष्णात् सिसृक्षावशेन पूर्वं गुणत्रयोत्पत्तिं प्रतिपाद्य, नारायणशिवब्रह्मणां धर्मस्य च तत्तदङ्गेभ्यः प्रादुर्भावमुक्त्वा सरस्वती-लक्ष्मी-

मूलप्रकृतिरूपदुर्गाणामन्यासां च वरूणानी-प्रभृतीनां तत्तत्त्वशक्तीनां प्रादुर्भावो व्याख्यातः। सेयं प्रक्रिया पूर्वप्रतिपादितप्रक्रियानुकूलैव। सच्चिदानन्दानामेव साकारतया नारायणादिरूपता वर्णनात्। श्रीभागवते च–

**'सा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका माया नाम'**

इति यत् तृतीयस्कन्धे पञ्चमाध्याय उक्तम्–तत्र संद्रष्टृपदेन जीव एवाभिप्रेतः। तेन जीवानामुत्पत्तिमभिव्यज्य तन्मोहिका सदसदात्मिका माया व्याख्याता–इति तस्या मूलतत्त्वादाविर्भूतत्वमनुक्तमपि स्पष्टं सिद्ध्यत्येव। मयेति अस्मदर्थकं विभक्तिप्रतिरूपकमव्ययम्! तत्संबन्धित्वादियं मायोच्यत इति मायानिर्वचनमपि जीवसंबन्धितामेव ख्यापयति। इयं यत्प्रत्याययति जीवम्, तज्जगद्ववस्तुतो ब्रह्मरूपतया सत्, तद्भिन्नत्वेन च प्रत्याययतीत्यसत्, आत्मापि चास्यामन्यरूपेण भासत इति त्रिरूपेयं सदसदात्मिका प्रोच्यते। यद्वा मोहिका मायास्वरूपेण सती, अन्यथा सन्तमर्थमन्यथा बोधयतीति बोधनांशे वसती। एवं सदसद्रूप आत्मा स्वरूपमस्या इति सदसदात्मिका सा उक्ता। तत एव च द्वितीयस्कन्धे पूर्वोक्ते (5/17) पद्ये ईक्षामात्रेण स्वस्य प्रेरणा ब्रह्मणाभिहिता, न तु काचिदन्या शक्तिस्तत्र व्याख्याता। ईक्षा न तत्र प्रादुर्भवतीति न कोऽप्यत्र विवदेत्।

**स एष आद्यः पुरुषः काले काले सृजत्यजः।**
**आत्मात्मन्यात्मनात्मानं संयच्छति च पाति च॥**

इति (5/38) पद्ये द्वितीये स्कन्धे च आत्मन एव स्रष्टात्वं सृष्टत्त्वं करणत्वमाधारत्वं चोद्घुष्टमिति मूलतत्त्वे शक्त्यादिसम्बन्धो प्रत्याख्यात एव। सृष्टिप्रतिपादिकाः श्रुतयश्चापीक्षामात्रमभिदधति, नत्वीक्षावृत्युत्पादिका काचिच्छक्तिस्तत्राभिहिता। ईक्षा तु आधारभूत आत्मन्येव प्रादुर्भवतीति सर्वसंवेद्योऽयमर्थः। न चोपपत्यापि शक्त्या परतत्त्वस्य सम्बन्धः संभवतीति स्वमेव शक्तिवादिभिः स्वीकृतम्। श्रुतिरेवात्र प्रधानं प्रमाणमिति तर्केणोपपत्यापि न किञ्चिद्धीयते। ततश्च मूलभूतस्य सामर्थ्यतादात्म्यम्, अनन्तरोत्पन्नानां शक्तीनां चाश्रयाश्रयिभाव एतस्यां प्रक्रियायां स्पष्टं भवति।

अथ श्रीमद्भगवद्रामानुजाचार्याः चिदचितोरव्यक्तपदाभिधेयां सूक्ष्मावस्थामेव परमात्मनः शक्तिं मन्यन्ते, मूलतत्त्वस्य परमात्मनोऽनन्तकल्याणगुणगणाश्रयतया सर्वधर्मोपपन्नत्वेन सृष्ट्यनुपपत्तिप्रश्नस्तेषां सिद्धान्ते नैवाविर्भवति, कूटस्थे सर्वथा परिणामशून्ये कथं सृष्टिकर्तृतेत्येव प्रश्नोऽवशिष्यते, अनया च शक्त्या शरीर-शरीरिरूपः परमात्मनः सम्बन्धः, इयं सूक्ष्मावस्था शरीरं परमात्मनः, तस्या

आत्मभूतश्च परमपुरुषः, सूक्ष्मावस्थामेव स्वप्रेरणया स्थूलरूपतां प्रापयतीत्येषैव जगदुत्पत्तिः। नामरूपविभागानर्हं सूक्ष्मदशावत्प्रकृतिपुरुषशरीरं ब्रह्म कारणावस्थम्, नामरूपविभागविशिष्टस्थूलचिदचिच्छिरीरं तु कार्यावस्थम्। उभयविधः परमात्मा एक एवेति विशिष्टयोरद्वैतपदार्थः।

**'तदनन्यत्वमारम्भणशब्दादिभ्यः'**

**(ब्र. सू., अ. 2, पा. 1, सू. 14, अधि. 6)**

इति सूत्रकृतापि कार्यकारणयोरभेद एवाद्वैतरूपः। यथा लोके देवदत्तोऽयम्, मैत्रोऽयम्, बलिष्ठो विद्वान् परमानन्दो देवदत्त इत्यादिना शरीरशरीरिणोरैक्यमेव व्यवह्रियते तथैव शक्तिशक्तिमतोरैक्यं श्रुतिस्मृत्यादिषु व्यवहृतम्। बहुषु पुराणेष्वव्यक्ताभिधायाः प्रकृतेरेव सृष्टिः प्रतिपाद्यते, परमात्मनश्चाधिष्ठातृता प्रेरकता च प्रोच्यते यथा सर्वादिभूते ब्रह्मपुराणे—

**अव्यक्तं कारणं यत्तन्नित्यं सदसदात्मकम्।**
**प्रधानं पुरुषस्तस्मान्निर्ममे विश्वमीश्वरः॥** (अ. 1/33)

**तं बुध्यध्वं मुनिश्रेष्ठा ब्रह्माणममितौजसम्।**
**स्रष्टारं सर्वभूतानां नारायणपरायणम्॥ (1/14)** इत्यादिः।

पाद्मे सृष्टिखण्डे (2 अ.) भीष्मपुलस्त्यसंवादे च सृष्टिकथनारम्भे—

**पूर्वं तु पद्मशयनादुत्थाय जगतः प्रभुः।**
**गुणव्यञ्जनसंभूतः सर्गकाले नराधिपः॥ (2।90)**

**सात्विको राजसश्चैव तामसश्च त्रिधा महान्॥** इत्यादि।

एवमादौ परमात्मनः प्रेरकत्वमव्यक्तभूतायाः प्रकृतेश्चोपादानत्वं स्पष्टं वर्ण्यते। तस्या सदसदात्मकत्वं तु परिणामित्वेनैकरूप्याभावाद् व्यवहृतम्। पुरुषपदेन च जीवोऽपि ब्रह्मपुराणेऽभिहित एव सृष्टेः पूर्वावस्थायाम्। तस्मात् प्रकृतिर्जीवश्चेत्युभयमपि शरीररूपेण नित्यसंबद्धं ब्रह्मणेति स्फुटीभवति। वायुपुराणे तु सर्वकारणत्वेन प्रकृतेरेव ब्रह्मशब्दवाच्यताप्युपचारेण प्रतिपादिता—

**अव्यक्तं कारणं यत्तु नित्यं सदसदात्मकम्।**
**प्रधानं प्रकृतिं चैव यमाहुस्तत्त्वचिन्तकाः॥** (वा. पु. 4।17)

**जगद्योनिमहद्भूतं परं ब्रह्म सनातनम्।**
**विग्रहं सर्वभूतानामव्यक्तमभवत् किल॥** (4।18)

अनाद्यन्तमजं सूक्ष्मं त्रिगुणात्मकमव्ययम्।
असाम्प्रतमविज्ञेयं ब्रह्माग्रे समवर्तत॥ (4।20)

तस्यात्मना सर्वमिदं व्याप्तमासीत्तमोमयम्।
गुणसाम्ये तदा तस्मिन् गुणभावे तमोदये॥ (21)

सर्गकाले प्रधानस्य क्षेत्रज्ञाधिष्ठितस्य वै।
गुणभावाद् वाच्यमानो महान् प्रादुर्बभूवह॥ (22)

अत्र विशेषणैः प्रकृतिवर्णनं स्फुटमेव प्रतीयते। तस्मादेव ब्रह्मत्वमप्युक्तम्। क्षेत्रज्ञाधिष्ठानं च तस्योक्तमेव—क्षेत्रज्ञश्च पुरुषः ईश्वरः। ततश्च ब्रह्मपदमत्रौपचारिकमेव। प्रधानमेव तु सृष्टिकर्तृतयात्रोक्तमिति पूर्वोक्ता प्रक्रियैव शरीरशरीरिरूपा लभ्यते।

एवं पुराणान्तरेष्वप्यव्यक्तादेव सर्गप्रतिपादकेषु प्रक्रियेयमनुसंधातव्या। प्रकृतिस्वातन्त्र्यं न प्रतिपादयन्ति पुराणानि इति यत् मूलतत्त्वप्रतिपादके प्रकरणे सुस्थिरीकृतम् तत्त्वत्रापीष्टमेव। शरीरभूतायाः प्रकृतेर्ब्रह्मप्रेरणयैव प्रवृत्युपगमात् स्वातन्त्र्यासिद्धेः। केषुचित् पुराणेषु ब्रह्मण एव सृष्टेरभिधानमपि नास्माकं विरुद्धम्। विशिष्ट एव ब्रह्मत्वव्यवहारात्। चिदचिच्छरीर-ईश्वर एवं ब्रह्मपदाभिधेय इति अचितो ब्रह्मांशभूतायाः प्रकृतेर्जाता सृष्टिर्ब्रह्मणो जातेत्युचितमेवोक्तम्। 'सदेवसोम्येदमग्र आसीत्' इत्यादि श्रुतिषु सत्पदेनापि शरीरविशिष्टमेव ब्रह्माभिधीयते, तदेवं ईक्षया स्वेच्छया स्ववृत्यलौकिकगुणरूपया प्रकृत्यंशेन जीवांशेन च बहुत्वमापद्यते विभिन्ननामरूपावस्था भवतीति न किञ्चिदनुपपन्नम्।

'यः पृथिव्यां तिष्ठन् पृथिवीमन्तरो यमयति-यं पृथिवी न वेद यस्य पृथिवी शरीरम्। योऽप्सु तिष्ठन्नपोऽन्तरो यमयति' इत्याद्यन्तर्यामिब्राह्मणन्त्वस्य सिद्धान्तस्य जीवातुभूतमेव। साक्षान्नारायणप्रोक्तः पाञ्चरात्राभिधस्तन्त्र-ग्रन्थश्चास्य सिद्धान्तस्य मूलभूतः। सर्वे च शब्दास्तं तं पदार्थमभिदधानास्तच्छरीरकं ब्रह्मैव प्रतिपादयन्तीति 'सर्वे वेदाः यत्पदमामनन्ति' इत्यादिना स्फुटमुच्यते। तस्य मनो वागतीतत्त्वं तु न निर्धर्मकतया, अपि तु अनन्तगुणतया प्रतिरोमानन्तब्रह्माण्डानां सन्निवेशान्मनसि वाचि वा सर्वेषां समावेशासंभवेन बोध्यम्। सूक्ष्मावस्थायां नामरूपविभागाभावे मनो वाग्वा न प्रसरतीति वा प्रसराभावः शक्यते व्याख्यातुम्। चिदचितोः प्रसुप्तत्त्वादेव च सूक्ष्मावस्थायाम् 'एकमेवाद्वितीयम्' इत्याद्युच्यते, तदेतत् 'प्रसुप्तमिव सर्वतः' इति मन्वादिषु 'सुप्तशक्तितरलुप्तदृक्' इति भागवतादिषु च स्पष्टीकृतमेव।

**सत्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः।**
**स्थितिसर्गनिरोधेषु गृहीता मायया विभोः॥ (श्रीभाग. 2/4)**

इति श्रीभागवते गुणानां ग्रहणं नाम प्रसुप्तानां सूक्ष्मावस्थानां प्रबोधनम्-कार्यक्षमतासम्पादनमेव। 'कार्यकारणकर्तृत्त्वे द्रव्यज्ञानक्रियाश्रयाः' इत्यग्रे कार्यजनकत्वन्तु गुणानामेव स्पष्टमुक्तम्। एवमग्रे–

**कालं कर्मस्वभावं च मायेशो मायया स्वधा।**
**आत्मन् यदृच्छया प्राप्तं विबुभूषुरिवाददे॥**
**(श्रीभाग. 2/5/21)**

इत्यग्रे कालादीनामुपादानमपि कार्यकरणे तत्प्रेरणरूपतयैव पर्यवस्यति। ब्रह्मव्यतिरिक्तस्य कस्याप्यस्वीकारेण स्वाव्यतिरिक्तस्य ग्रहणासंभवात्। 'आत्मन् यदृच्छया प्राप्तम्' इति शरीरत्वं स्पष्टमेवाभिव्यज्यते। माया चात्रोक्ता विचित्रार्थ-सर्गकर्त्री भगवच्छक्तिरेव, नत्वनिर्वचनीया काचित्। अन्यत्रासुरादिमायासु अवितर्कितार्थजननशक्तेरेव मायाशब्देन कथनात्। ततश्च शक्तिपदेन यदि भगवतो लौकिकानन्तगुणान्तर्गतं सामर्थ्यमभिधीयते तदा तया शक्त्या भगवतो गुणगुणिभावः समवायः, स्वरूपं तादात्म्यं वा तत्तद्दर्शनेषु गुणगुणिनोरभ्युपगतः सम्बन्ध आस्थेयः। यदि तु स्थूलजगज्जनयित्री चिदचितोः सूक्ष्मावस्था शक्तिपदेन व्याख्यायते तदा शरीरशरीरिणोरिव तस्या अभेदः, भेदः, उभयं वा सम्बन्धतया स्वीकर्तुं युज्यते। ईश्वरं व्यतिरिच्य सा कदापि नोपलब्धुं शक्यत इति तद्गुणीभूततया तत्परतया अभेद उच्यताम्। ईश्वरः प्रेरकः—तस्याः परिणमयिता, सात्ववस्था परिणम्यत इति प्रेर्यप्रेरकभावेन भेदोऽप्युच्यताम्। उभयरूपेण विवक्षया च भेदाभेदाविति सिद्धान्तेऽस्मिन् सिद्धा प्रक्रिया। या क्वचित् पुराणादिषु ब्रह्मणः प्रकृतेर्मायया वा उत्पत्तिरभिहिता, सा प्रसुप्तावस्थायास्तस्य प्रेरणया कार्यक्षमत्वसंपादन एव पर्यवसन्नेति सर्वमत्र सामञ्जस्यमुपपाद्यमिति।

एवं श्रीनिम्बार्काचार्यभगवत्पादा अपि प्रपञ्चेन सह भगवतो भेदा-भेदौ व्याचक्षणाः प्रपञ्चमूलभूतया प्रकृत्याख्यशक्त्यापि भेदाभेदावेवाभ्युपगच्छन्ति। पूर्वमेकोऽपि सर्गानन्तरमनेकधा भिन्नो भवतीति हि तेषां प्रक्रिया। शक्तिरपि प्रसुप्ता तावद् ब्रह्मणा सहाभिन्नैव, जाग्रद्दशायान्तु भिद्यते इति भेदाभेदौ व्याख्येयौ। द्वैतवादिनः श्रीपूर्णप्रज्ञभगवत्पादास्तु प्रकृत्याख्यशक्तेः सर्वथा भिन्नत्वमेव निर्धारयन्ति, केवलं भगवदधीना सा भगवत्प्रेरणया प्रवृत्ता जगत्सृजतीत्येव स्वस्वामिभावः

प्रकृत्या सह भगवतः सम्बन्धः। स्वतन्त्रो हि भगवान्, तस्येच्छैव महामाया, अविद्या, प्रकृतिरित्यादिभिः पदैरुच्यते। मायाशब्दः प्रकृष्टवाची।

तच्छाखारूपेणैव स्वसिद्धान्तं स्थापयन्तः श्रीचैतन्यमहाप्रभुपादाश्चाचिन्त्य-भेदाभेदसिद्धान्तमुपयन्तो निर्वचनीयतामनुसरन्तीव। तदित्थमुपासनाप्रधानतया आगमसिद्धान्तं बहुष्वंशेष्वनुवर्तमानानामपि श्रुत्याधारेण ब्रह्मसूत्राधारेण च स्वसिद्धान्तं प्रतिष्ठापयतां वैष्णवसंप्रदायानां प्रक्रिया दिङ्मात्रं दर्शिता। शैवशाक्त-संप्रदायदर्शनप्रक्रिया तु आगमप्रक्रियायामग्रे प्रदर्शयिष्यते। एषां च विभिन्नत्वेन प्रतिभासमानानामाचार्यसिद्धान्तानां समन्वयोऽप्यग्रे वैज्ञानिकप्रक्रियायां प्रदर्श्येत।

## दर्शनान्तरेषु शक्तिविचारः

अन्यत्रापि दर्शनेषु शक्तिस्वरूपादिकं चिन्त्यते। तत्र पूर्वमीमांसकाः सर्वेषु पदार्थेषु कार्यकरणानुकूलां शक्तिं पृथगेव मन्यन्ते। पृथक् पदार्थत्वं च तस्या एवं व्यवस्थापयन्ति-तस्यैव पदार्थस्य कदाचित्कार्यजनकत्वं दृश्यते, कदाचिच्च न। यथा वह्नेः सुप्रसिद्धं दाहकत्वम्, परं चन्द्रकान्तमणिसमवधाने न तत् फले पिधायकं भवति। आम्रादिषु च कदाचिदेव मञ्जरी-फलाद्युत्पद्यते न सदा। यदि वह्नि-वृक्षादिकमेव दाहफलादि-कारणं स्यात्, तदा सदैव स्वकार्यं कुर्यात्। अन्वयव्यतिरेकाभ्यां विना न कार्यकारणभावः सिद्ध्यति, स्फुटं चात्रान्वयव्यभिचारो दृश्यते इति तत्तत्कार्यकारणीभूता शक्तिः पृथगेव मन्तव्या, सा च कदाचित् स्वहेतुभिरुत्पाद्यते, कदाचिच्च नश्यति, तिरोभवति वा। यथा ऋतुसलिलादिसंपदा आम्रादिषु फलजननशक्तिरुत्पाद्यते, तद्वियोगेन च नश्यति। घृतेन्धनादिसमवधानेन वह्नौ दाहानुकूला शक्तिरुत्पाद्यते, वृद्धिं च नीयते, मण्यादिसमवधानेन तु नाश्यते, आव्रियते वा। कदाचित् प्रचुरकार्यकरणेन कार्यपाटवेन वा शक्तेरुत्कर्षाप-कर्षावप्यनुमातुं शक्येते। द्रव्यस्यैव कारणत्वे तु प्रचुराल्पकार्यजननम्, कार्यपाटवे न्यूनाधिकतापि च नोपपद्येताम्, कारणस्यैकरूपस्यैव प्रत्यक्षेणोपलम्भादिति तेषां युक्तिः। एवं शक्तेर्वृद्धिह्रासानुत्पत्ति-विनाशौ च कार्यगम्यौ यत्र किञ्चित्कालं कार्यं न जायते, पुनस्तत्रैव जायते, तत्र शक्तेस्तिरोभावः, अग्रे त्वाविर्भाव उन्नेयः। यत्र तु पुनस्तत्र कदाचिदपि तत्कार्यं न दृश्यते तत्र तु विनाश एवोन्नेय इत्याविर्भावातिरोभावावपि क्वचिद् व्याख्यायेते। एवं कार्यपाटवापाटवाभ्यां वृद्धिह्रासावनुमेयावित्यादि तन्मतसारः। अत्रेदं विचार्यम्, एवमपि शक्तेरेकान्ततः पृथक्त्वं नोररीकर्तुं शक्यते कारणेभ्यो द्रव्यादिभ्यः पृथक् कदाप्यनुपलम्भात्।

यस्मिन् हि कारणे या शक्तिर्निहिता सा तत्संबद्धैव सदा प्रतीयते। न तु ततोऽन्यत्र क्वापि तदुपलम्भः। यच्च यतः पृथक् कदापि नोपलभ्यते, न तत्ततः सर्वथा भिद्यते इति सांख्यवेदान्तादिषु समभ्युपगतः सिद्धान्तः। अतएव गुणकर्मादीनां सामान्यविशेषयोश्च द्रव्यात् पार्थक्यम्, अवयवावयविनोश्च पार्थक्यं तत्र नाभ्युपगम्यत एव। किञ्च मीमांसका अपि जातेर्व्यक्त्यपेक्षया सर्वथा भिन्नत्वं नाभ्युपगच्छन्ति। यदि हि घटत्वादिजातिर्घटादिभ्यः सर्वथा पृथग्भूता स्यात्, तर्हि एकमेव घटं पश्यतो घटघटत्वे इति द्वित्वप्रतीतिः स्यात्, तस्मात् भेदाभेदावेव जातिव्यक्त्योरिति तेषामभ्युपगमः। तयैव प्रक्रियया वह्निं तेन जायमानं दाहं च दृष्टवतोऽपि वह्निवह्निशक्ती अभिसन्धाय द्वाविति बुद्धिः कदापि कस्याचिन्नोदेति, तस्माज्जातिवच्छक्तेरपि भेदाभेदावेव सिद्ध्यतः। पार्थक्यस्वीकारे च शक्त्याश्रयेण शक्तेः सम्बन्धः कश्चिदेष्टव्यः, न च समवायो मीमांसकैः पृथगभ्युपगत इति तादात्म्यमेव तन्मते सम्बन्धो वाच्यः। तादात्म्यं च नाम भेदसहिष्णुरभेद इति भेदाभेदयोरेव पर्यवसानम्। न च भेदाभेदावेकत्र वक्तुं शक्येतेति स्पष्टमिदं भेदाभेद-खण्डन-प्रकरणे भामत्यां निरूपितं श्रीवाचस्पतिमिश्रैः। तस्मादनिर्वचनीय-तायामेव मीमांसकमतस्यापि पर्यवसानम्।

नैयायिकास्तु पृथक्शक्तेः तदुत्पादविनाशयोः, तत्प्रागभावादेश्च सर्वत्रा-नन्तानां स्वीकारे परं गौरवमभिमन्यमानास्तत्तत्कारणनिष्ठां स्वरूपयोग्यताभिधां कारणातामेव शक्तिपदेन व्यवहरन्ति। सत्यपि कारणे यत्तत्र तत्र कार्यं न दृश्यते-तत्तु प्रतिबन्धकवशाद्वा सहकारिणामसन्निधानाद्वा समाधेयम्। तेषां हि मते न कार्यं प्रति किञ्चदेकमेव कारणं नियामकम् अपि तु कारणसामग्री कार्यं प्रति नियामिका। यत्समवधाने कार्यमुत्पद्यते, असमवधाने च नोत्पद्यते तानि सहकारिकारणानि। देशः, कालः, अदृष्टम् (भोक्तुर्धर्माधर्मो) ईश्वरेच्छा चेत्यादीनि सर्वत्र सहकारिकारणानि भवन्ति। प्रतिबन्धकाभावश्चाप्यस्यां सामग्र्यां निवेश्यते, पृथगेव वा तस्य कार्यप्रतिरोधकत्वं स्वीक्रियते। सलिलसेकादिकन्तु अङ्कुरादीन् प्रति प्रातिस्विकं सहकारिकारणं भवति। एभिरेव कारणे वर्तमाना स्वरूपयोग्यता फलोपधायिनी भवति। न तु कारणे किमप्यभिनवं सहकारिभिरुत्पाद्यते, प्रतिबन्धकेन नाश्यते वा। प्रतिबन्धकेन कार्योत्पत्तिरेव प्रतिबध्यत इत्यादिस्तदीया प्रक्रिया। तदेवं स्वरूपयोग्यतारूपा कारणतैव शक्तिपदार्थतया तैरभ्युपगता। सा च **'अन्यथा-सिद्धिशून्यस्य नियतापूर्ववर्तिता'**। तत्रान्यथासिद्ध्यभावस्तावदभावपदार्थे एवान्तर्भूतः। नियतत्वं च व्यापकत्वम् तदपि स्वसमानाधिकरणात्यन्ताभाव-प्रतियोगित्वाभावरूपम्। तत्तत्कार्यनियतपूर्ववृत्तित्वं नाम तत्तत्कार्यप्राक्क्षणा-

वच्छेदेन तत्कार्याधिकरणवृत्तिर्यो भावः, तत्प्रतियोगित्वाभावरूपमित्यभाव एव शक्तेरन्तर्भावः प्राप्नोति। ये तु तत्तत्कार्यनियतपूर्ववृत्तित्वं नाम तत्तत्कार्य-प्राक्क्षणावच्छेदेन तत्तत्कार्याधिकरणकाभावप्रतियोगितानवच्छेदकधर्मकत्वम् इति विवृण्वते, तद्रीत्या तत्तत्कारणासाधारणधर्मो दण्डत्वादिरेव जनकतारूपः सिद्ध्यति। तस्य प्रतियोगितावच्छदेकभिन्नत्वरूपेण ग्रहणे जनकतारूपता, दण्डसमवेतत्वरूपेण ग्रहणे तु जनकतावच्छेदकता इति स्वरूपभेदात् स्वस्यैव स्वावच्छेदकत्वरूपो दोषो नापतति। एवम् अन्यथा सिद्धिशून्यत्वमपि तत्तत्कार्यनिरूपितान्यथा-सिद्धतानवच्छेदकधर्मवत्वमिति तदपि दण्डत्वादिकारणासाधारणधर्मरूपतायामेव पर्यवस्यतीति भावरूपैव जनकता, सैव च भावरूपो शक्तिः, जनकता नामातिरिक्त एव पदार्थ इत्यप्यस्ति मतं केषाञ्चिद् ग्रन्थकाराणाम्। तन्मते त्वतिरिक्तशक्ति-वादिभिः सह नाममात्रे विवादाः पर्यवसितः। तैः शक्तिनाम्नातिरिक्तः पदार्थः स्वीकृतः एभिस्तु जनकतानाम्नेति। आस्तां नाम। अस्मिन्नपि मते भावरूपा शक्तिः। अथ नियतत्वे सति पूर्ववर्तित्वं चेत्कारणलक्षणं व्याक्रियते तदापि पूर्वक्षणसम्बन्धः कालिक-सम्बन्धरूप इति स एव शक्तिपदाभिधेयः स्यात्। सोऽपि स्वरूपसम्बन्धविशेष इति कालरूपैव कारणरूपैव वा शक्तिः सिद्ध्येत्। तत्राभावरूपत्वे कारणेन सह स्वरूपसम्बन्धः शक्तेः सिद्ध्यति, भावरूपत्वे तु समवायः सम्बन्धः अतिरिक्तपदार्थत्ववादेऽपि स्वरूपसम्बन्ध एव स्यात्। दण्डत्वा-दितत्तत्कारणासाधारणरूपता च यदा शक्तेः पर्यवसिता तदा जातिव्यक्त्योर्दर्शनान्तरे भेदानभ्युपगमादाश्रयेण सह शक्तेरभेद एव सिद्ध्यति। आधाराधेयतादिव्यवहाराश्च कथञ्चिद् भेदेऽपि। दण्डत्वादावपि केनचिद् रूपेण शक्तित्वम्, केनचित्तु शक्त्यवच्छेदकत्वमितिरूपभेदमात्रेण भेदाभेदावेवापततः। न चैकत्र भेदाभेदोभयसंभव इत्यनिर्वचनीयतायामेव पर्यवसानम्। तदित्थं भावाभावरूपतया अनिश्चितां शक्तिं व्याकुर्वद्भिरनिर्वचनीयतैव-नैयायिकैरपि प्रकारान्तरेण स्थापितेति विभाव्यं सुधीभिः।

अथ सांख्याः कारणनिष्ठामव्यक्तां सूक्ष्मां कार्यावस्थामेव शक्तिमाहुः। तेषां सत्कार्यवादे हि नापूर्वं कार्यं क्वचिदप्युत्पद्यते-अपि तु कारणे सूक्ष्मावस्थापन्नमेव स्थूलावस्थामापद्यते यथा तिलेषु तैलम्, दध्नि वा सर्पिः, प्रस्तरे वा प्रतिमा। सा सूक्ष्मावस्था कारणे तादात्म्येनैव तिष्ठतीति अभेद एवं सम्बन्धः शक्त्या शक्तिमतः फलति। पर्यालोचने तु सर्वथा अभेदे कार्यत्वं कारणत्वं वा कथं व्यवह्रियेतेति भेदाभेदावेवोपागम्यानिर्वधनीयतायामेवात्रापि पर्यवसानं स्यात्। एवं पदार्थेषु प्रपञ्चान्तर्गतेषु विभिन्नतया कल्पिताः शक्तिशक्तिमतोः सम्बन्धा एव ईश्वरस्यापि तदीयशक्त्या सहानुमातव्यास्तत्तत्प्रक्रिययेति तन्मतमप्यत्र मनागुपदर्शितम्।

इत्थं शक्तिविशिष्टस्य ब्रह्मणो जगत्कारणत्व उपपादिते शक्तेराश्रयतया ब्रह्मण एव मुख्यत्वं केचन मन्यते-तदाश्रयणं विना शक्तेः स्वरूपालाभात्। केचित्तु शक्तिमन्तरेण ब्रह्मणो अकिञ्चित्करत्वाच्छक्तेरेव प्राधान्यं ब्रुवते। यथोक्तं सौन्दर्यलहर्याम्–

**शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं।**
**न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि॥**
**अतस्त्वामाराध्यां हरिहरविरिञ्च्यादिभिरपि।**
**प्रणन्तु स्तोतुं वा कथमकृत-पुण्यः प्रभवतु॥**

ब्रह्मवैवर्तपुराणे प्रकृतिखण्डे 2 अध्याये च स्पष्टमस्या उक्तेर्मूलम्–

**यथाग्नौ दाहिका चन्द्रे पद्मे शोभा प्रभा रवौ।**
**शश्वद्युक्ता न भिन्ना सा तथा प्रकृतिरात्मनि॥7॥**

**विना स्वर्णं स्वर्णकारः कुण्डलं कर्तुमक्षमः।**
**विना मृदा कुलालो हि घटं कर्तुमनीश्वरः॥8॥**

**नहि क्षमस्तथात्मा च सृष्टिं स्रष्टुं तया विना॥9॥**

अत्र पूर्वमेकता अनन्तरं तु उपादानकारणता प्रकृतेरभिव्यञ्जिता परमात्मनः सर्वप्रवृत्तिकारणत्वमपि च समाख्यातम्–

**सर्वशक्तिस्वरूपा सा तया स शक्तिमान् सदा।**
**ऐश्वर्यवाचकः शक च तिः पराक्रमवाचकः॥**
**तत्स्वरूपा तयोर्दात्री सा शक्तिः परिकीर्तिता।**
**ज्ञानं समृद्धिसंपत्तिर्यशश्चैव बलं भगः॥**
**तेन शक्तिर्भगवती भगरूपा च सा सदा।**
**तया युक्तः सदात्मा च भगवान् स विकथ्यते॥इति॥**

एवं च सर्वेषामप्येक-वाक्यतायां विचार्यमाणायामिदमेव फलति यच्छक्ति-विशिष्टस्य ब्रह्मणो जगत्कारणत्वं सर्वत्र प्रतिपाद्यते। तच्चेदं कारणत्वमभिन्न-निमित्तोपादानत्वरूपम्। तत्र विवक्षाभेदाद् दृष्टिभेदादधिकारभेदाद्वा सृष्टिकरणे क्वचिद् ब्रह्मणः प्राधान्यं शक्तेः सहकारित्वम्। क्वचित्तु शक्तेः प्राधान्यं, ब्रह्मणस्तु आलम्बनत्वमधिष्ठातृत्वं साक्षित्वं वा प्रतिपाद्यते। क्वचिच्च मायाप्राधान्येनो-पादानत्वम्, स्वप्राधान्येन तु निमित्तत्वमविकृतत्वसंरक्षणमपि ब्रह्मणः प्रपञ्चयते।

## मूलशक्तेरेकत्वानेकत्वविचारः

अथ जगन्निर्माणार्थं परब्रह्मणि परमेश्वरेऽभ्युपगतायाः शक्तेरेकत्वानेकत्वविषयेऽपि विभिन्ना प्रक्रिया दृश्यते। पूर्वोक्तेषु पुराणवचनेषु—

**'शक्तयः सर्वभावानाम्'**
**'ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः'**

इति बहुवचनम्,

**'सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका माया'**

इत्येकवचनं चेत्युभयमपि दृश्यते। अनेकत्ववादिनो मायां प्रकृतिं च विभिन्ना वदन्ति। एकत्ववादिनस्तु एकस्या एव शक्तेः प्रकृतिनाम्ना मायानाम्ना वा व्यवहार इति प्राहुः। भगवद्गीतासु—

**"दैवी ह्येषा गुणमयी मम माया दुरत्यया"**

इति मायाया एव त्रैगुण्यमुक्तम्।

**'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।'**
**विकारांश्च गुणांश्चैव सिद्धि प्रकृतिसंभवान्॥** (13/19)

इति च प्रकृतेर्गुणसम्बन्ध उक्तः।

**'ये चैव सात्विका भावा राजसास्तामसाश्च ये।**
**मत्त एवेति तान् विद्धि॥' (7/12)**

इत्यादावपि च गुणाः प्राकृता उक्ताः, गुणानामेव च जनकत्वमुक्तम्, तेन मायाप्रकृत्योरेकत्वमेव प्रतिभासते।

**'सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।'**
**मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्॥**

इत्यादौ सर्वप्रलयकारणत्वे प्रकृतिशब्द एव व्यवहृतः।

**'प्रकृतिं स्वामवष्टभ्य संभवाम्यात्ममायया।'**

इत्यात्रापि भिन्नत्वेनैकतया चोभयथापि व्याख्या कृता। व्याचक्षते सप्तमाध्याये आरम्भे तु प्रकृतिपदेन महाभूताद्या जीवाश्चाभिहिताः परापरनाम्ना। तत्रापि तु तेषां सूक्ष्मावस्थारूपाः प्रधानाद्या एवाभिप्रेता इत्यग्रे व्याख्यास्यते पुरुषनिरूपणे।

"मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।"

इति श्वेताश्वतरश्रुतौ च माया प्रकृत्योरेकत्वं मुखादेवोक्तम्। श्रीभागवतेऽपि सर्गे मायायाः साहचर्यं प्रतिपादयद्भिः पद्यैर्मायाप्रकृत्योरेकत्वमेव व्यक्तीकृतम्। तदित्थं श्रीशङ्कराचार्या मायाप्रकृत्योरेकत्वमेव तत्र तत्र व्याचक्षते, एकामेव च शक्तिमभ्युपगच्छन्ति। कार्यभेदात्तु तस्याभेद उपचारेण तत्र तत्र व्यवहृतः। तस्या एव चाज्ञानरूपात्मस्वरूपाच्छादकत्वे ज्ञानपदाभिधेयाया मायाया आवरणविक्षेपाभिधे द्वे कार्ये, जीवस्य ज्ञानमावृणोति सा न ब्रह्मतत्त्वप्रतिभानं ददातीत्यावरणं तस्याः कार्यम्। आवरणमिदं जीवदृष्टेरेवेत्युक्तं प्राक्। लोकदृष्ट्या तु ब्रह्मैवावृतं व्यवहृते घनच्छन्नार्कवदिति। आवृते च ब्रह्मणि विभिन्नजगदध्यारोपणं विक्षेपाभिधं कार्यम् इति।

श्रीरामानुजाचार्यमते तु माया भगवतो विचित्रा शक्तिः, प्रकृतिस्तु सर्वजडजगदुपादानं शरीरं भगवत इत्युक्तमेव। श्रीवल्लभाचार्याणां शुद्धाद्वैतसिद्धान्ते भगवत आविर्भूता मायाप्रकृत्याख्या पृथगेव स्वीकृता। मायापि च तत्र द्विविधा जगत्सर्गकर्त्री भगवच्छक्तिरेका, जीवमोहिका विषयतारूपा तु द्वितीया। या भगवद्रूपे निर्विकार एव प्रपञ्चे भेदं विकारान्, स्वस्वामिभावादि, युगकल्पादिभावांश्च संसाररूपात् असत एव प्रतिभासयति, सेयं जीवावरिका भगवदुत्पादितापि जीवशक्तित्वेन व्यवहृता 'सा वा एतस्य संद्रष्टुः' इत्यादौ श्रीभागवतपद्ये। प्रकृतिस्तु सर्वतः प्रथमं जगदुपादानत्वेन निर्मितं मुख्यं भगवद्रूपमिति प्रस्थानरत्नाकरे श्रीपुरुषोत्तमगोस्वामिभिरुक्तम्। तस्याश्च षड्लक्षणानि—

1. त्रिगुणात्मकत्वम्-साम्यावस्थोपलक्षितगुणत्रयरूपतेति यावत्। ते च पृथक्-पृथगवगम्यमानास्तस्या धर्मा अप्युच्यन्ते, एते सच्चिदानन्दानां भगवद्रूपाणामाविर्भावका अम्नाताः।
2. अव्यक्तम्-कस्मिन्नपि काले व्यक्ततां य याति।
3. नित्यम् त्रैकालिकम्, कालादीनामपि जनकम्।
4. सदसदात्मकम्-कारणकार्यरूपावस्थम्।
5. अविशेषम्-सर्वान् जीवान्प्रति सामान्यम्।
6. विशेषवत्-बुद्ध्यादीन् विशेषान् प्रकटीकृत तूष्णीं भवतीत्यादि। अन्येप्यग्रे शक्तिभेदा जायन्ते।

□

# आगमशास्त्रप्रक्रिया

अथ आगमशास्त्रे तदनुयायिनि प्रत्यभिज्ञादर्शने चापि शक्तीनां बहुतरं विवरणमुपलभ्यते। तत्र हि सृष्टेः पूर्वं परमेश्वरे भगवति परमशिवे अविभागेन स्थिता स्वातन्त्र्यरूपा पूर्णाहन्ताभिधा पराशक्तिर्नित्याभ्युपगम्यते। प्रकाशरूपो द्रष्टा परमशिवः, तदभिन्ना विमर्शरूपा दृश्या च परा शक्तिः। उभावपि चिद्रूपौ, न तु दर्शनान्तरवज्जडा शक्तिरिहाभ्युपगम्यते, चितिः, चिच्छक्तिरित्यादिनामभिरेव सा शक्तिर्व्यवह्रियते। एतदेव तु शिवशक्त्योर्वैलक्षण्यम् यत्परशिव एकरूप एव सदा तिष्ठति, चिच्छक्तेस्तु निमेषोन्मेषपदाभिधेयौ संकोचविकासौ सततं क्रमेण प्रादुर्भवतः। विकृतिः, परिणामो वा तस्या अपि नाभ्युपगम्यते, स्वरूपाप्रच्युतेः। तत्रापि चाद्वैतवादो द्वैतवादश्चेत्युभयमपि प्रक्रियाभेदेन प्रतिपाद्यते। परशिवः, चिच्छक्तिः, बिन्दुरिति त्रयोपि मूलतो भिन्न इति द्वैतिनां प्रक्रिया। तत्र शिवश्चिद्रूपः बिन्दुर्जडः, चिच्छक्तिस्तूभयत्रानुगतोभयं संयोजयति, सा च शिवगता चिद्रूपा, परिणामविरहिता। बिन्दुगता तु जडेव, परिणामिनीव चाभाति। महामाया-माया-प्रकृतिरिति बिन्दोरेव त्रयो विकासा विसरा अवसरा वा। महामाया बिन्दुत्य रूपैव जगत्सृजति, शुद्धा च सेति तत्प्रपञ्चोऽपि शुद्धः। तज्जन्या माया तु शुद्धरूपेण स्थितस्य प्रतिबिम्बरूपेण विपरीतावभासिनीत्यशुद्धा सोच्यते, तज्जन्यः प्रपञ्चोऽपि गुणत्रयाविलोऽशुद्धः, इत्थं तत्र सूक्ष्मः शुद्धः, स्थूलोऽशुद्धश्चेति द्विविधः प्रपञ्चोऽभ्युपगम्यते, सूक्ष्मः प्रपञ्चः योगिनां सिद्धानामेव भासते। स्थूलेनैव तु प्रपञ्चेन व्यवहरन्ति माया प्रमातारः सकला जीवाः। मायाया एव कञ्चुकपञ्चकम्, तेन बद्धः परिच्छिन्नः पुरुष इति जीव इति वा व्यवह्रियते, तत्सहचारिणी शक्तिश्च प्रकृतिः, सैव पुरुषभोग्यं प्रपञ्चमारचयति। तज्जन्याश्च तत्त्वानां विविधाः शक्तय इत्यादि। इयमेव प्रक्रिया बहुष्वंशेषु वायुपुराणनाम्ना प्रसिद्धे ब्रह्माण्डपुराणे विवृतावलोक्यते, तत्रारम्भे तृतीयाध्याये सृष्टिं प्रस्तुत्य–

समासबन्धैर्नियतैर्यथातथं,
विशब्दनेनापि मनः प्रहर्षिणीम्।
यस्यां च बद्धा प्रथमा प्रवृत्तिः,
प्राधानिकी चेश्वरकारिता च॥

यत्तत् स्मृतं कारणमप्रमेयं,
ब्रह्मप्रधानं प्रकृतिप्रसूतिः।
आत्मा गुहायोनिरथापि चक्षुः,
क्षेत्रं तथैवाक्षरमव्ययञ्च॥
शुकं तमस्सत्वमतिप्रकाशं,
तद् व्यापि नित्यं पुरुषं द्वितीयम्।
तदप्रमेयं पुरुषेणयु कृ-
स्वयम्भुवालोकपितामहेन॥ (7, 8, 9)

इति सृष्टिद्वैविध्यमभिव्यज्य क्षेत्रज्ञस्य प्रकृतेश्चोभयोरपि सृष्टिकारणत्वमुक्त्वाग्रे चतुर्थाध्याये तद्विवरणप्रसङ्गे—

अव्यक्तं कारणं यत्तु नित्यं सदसदात्मकम्।
प्रधानं प्रकृतिं चैव यदाहुस्तत्त्वचिन्तकाः॥ (4/7)

गन्धवर्णरसैर्हीनं शब्दस्पर्शविवर्जितम्।
अजातं ध्रुवमक्षय्यं नित्यं स्वात्मन्यवस्थितम्॥ (1/19)

जगद्योनिं महद्भूतं परं ब्रह्मसनातनम्।
विग्रहं सर्वभूतानामव्यक्तमभवत्किल॥19॥

अनाद्यन्तमजं सूक्ष्मं त्रिगुणप्रभवाव्ययम्।
असाम्प्रतमविज्ञेयं ब्रह्माग्रे समवर्तत॥20॥

इति अव्यक्तपदेनात्र चिच्छक्तिरेव विवृता प्रतीयते, तत एव तस्य 'परं ब्रह्म' इति ब्रह्म इति च वाचकं प्रयुक्तम्। अग्रेऽपि ततः प्रादुर्भूतस्य महतः—

मनो महान् मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः।
प्रज्ञा चितिः स्मृतिः संवित् विपुरं चोच्यते बुधैः॥ (4।25)

इति नामसु तन्निर्वचने च चेतनत्वमेव तस्य भासते। तेन शक्तिचैतन्ये आगमप्रक्रियैव किञ्चिद्विलक्षणा प्रत्यभिज्ञायते। 'स्वात्मन्यवस्थितम्' इति स्वातन्त्र्यमपि पुराणान्तरविलक्षणमिह प्रधानस्योक्तं न विस्मर्तव्यम्। सदसदात्मकत्वन्तु विकासशालित्वेन ऐकरूप्याभावात्, बिन्दुरूपे जडतत्त्वेप्यनुगतत्वाच्चोक्तं स्यात्। क्षेत्रज्ञाधिष्ठानञ्चेहोक्तमिति द्वैतिनामेवेयं प्रक्रिया। अद्वैतवादिन आगमिकास्तु मूले अविभक्तमेव शिवशक्तिरूपं मन्यन्ते। अनन्तरं स्वातन्त्र्यवशात् क्रीडनार्थं जगतः सिसृक्षायां शिव एव भगवान् स्वशक्तिं

पृथगवभासयति, तत्र चात्मनः प्रतिबिम्बं पश्यति, ततः शिवः शक्तिश्चेति तत्त्वद्वयम्, ततः सदाशिवस्येश्वरस्य च प्रादुर्भाव इत्यादि विवृण्वते। मूलशक्तेः, इच्छा, ज्ञानम्, क्रिया चेति त्रयो विकासाः। प्रतिबिम्बने शिवांशः अम्बिका, शक्त्यंशः शान्ता, सर्जनशक्तिः वामा, पालनशक्तिर्ज्येष्ठा, संहारशक्तिश्च रौद्री, निवृत्तिः प्रतिष्ठा, विद्या शान्तिः शान्त्यतीता चेति कलारूपा ब्रह्मविष्णुरुद्रेश्वरसदाशिवानां शक्तय इत्यादिः प्रपञ्चः शक्तीनाम्। सेयं प्रक्रिया ब्रह्मवैवर्ते दृश्यते। कृष्णाभिधानात् परतत्त्वादेव तत्र दुर्गाराधादिसर्वशक्तीनां प्रादुर्भाववर्णनात्। नारायणशिवादीनां चेश्वराणामपि तत एव प्रादुर्भाववर्णनात्। आगमेष्विव शक्तीनामेव सर्वोत्पादकत्व-प्रतिपादनाच्च य आगमे परः स एवात्र पुराणे कृष्ण इति नामभेदमात्रमिदमिति न विस्मर्तव्यम्।

श्रीभागवतेऽप्यागमिक्या अद्वैतप्रक्रियायाः क्वचिदाभासः प्रत्यभिज्ञायते।

यथा ह्यागमे परमशिवाच्छिवशक्त्योर्ग्राहकग्राह्ययोः पृथक् पृथक् प्रादुर्भावे ग्राह्याभावाच्छिवतत्त्वं, शून्यातिशून्यपदेन व्यवह्रियते, तथाऽत्रापि तृतीयस्कन्धे—

**स वा एष तदा द्रष्टा नापश्यद् दृश्यमेकराट्।**
**मेने सन्तमिवात्मानं सुप्तशक्तिरलुप्तदृक्॥ (5 अ. 24)**

इति द्रष्टुरसत्वेन मननमुक्तम्। अग्रे च—

**कालवृत्या तु मायायां गुणमय्यामधोक्षजः।**
**पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान्॥**

इति वीर्यशब्देन प्रतिबिम्बरूपतया शक्तौ प्रवेशोप्यागमक्रियोक्तोऽपि व्यक्तीकृत इत्यादि सुसूक्ष्मं पर्यालोच्यम्। अग्रे च शक्तेरेव सृष्टिजनकत्वमुक्तमिति। सेयं शैवागमप्रक्रिया। शाक्तागमेषु तु शक्तिरेव परतत्त्वमुच्यते। परतत्त्वं हि सर्वथा गुणलिङ्गादिविवर्जितमपि प्रतिपादनविधिनिर्वाहाय पुंस्त्वेन स्त्रीत्वेन नपुंसकत्वेन वा कथमपि व्रि़यताम्, न तत्र कश्चिद्भेदो विरोधो वा। तदेव जगतां पितृभूतं मातृभूतं चेति पुंस्त्वेन स्त्रीत्वेन वा वक्तुं शक्यते। 'स्त्रीपुंभेदो न गण्यते' इति हि स्पष्टं ब्रह्मवैवर्ते प्रकृतिखण्ड उक्तम्। वस्तुतस्तु तत् कार्यकारणातीतमिति ब्रह्मपदेन नपुंसकलिङ्गेनापि व्यवह्रियत एव। तस्मात्सर्वमूलत्वेन शाक्तागमेषु प्रतिपाद्यमाना शक्तिः परब्रह्मरूपैव। सैव क्रीडार्थं पुरुषं प्रकल्पयतीत्यग्रे पुरुषोत्पत्तिप्रक्रिया। परब्रह्मणि या शक्तिः श्रुतिपुराणादिषु समभ्युपगतेत्युक्तम्। सा तत्र छायारूपेच्छा-शक्तिरिति व्यपदिश्यते। स्वातन्त्र्यं च तत्रैव मूलभूतायां परशक्तौ, तदपि तस्याः शक्तिरूपम्। अग्रे च ज्ञानक्रियादिशक्तीनामन्यासाञ्च पूर्वोक्तानां प्रादुर्भावः।

सेयं प्रक्रिया देवीभागवते पुराणे विवृता। तत्र प्रथमस्कन्धे द्वितीयाध्याये—

**सृष्ट्वाखिलं जगदिदं सदसत्स्वरूपं,**
**शक्त्या स्वया त्रिगुणया परिपाति विश्वम्।**
**संहृत्य कल्पसमये रमते तथैव,**
**तां सर्व विश्वजननीं मनसा स्मरामि॥5॥**

इति मङ्गले स्मरणविषयतया भगवतीस्वरूपं संक्षेपतो निदर्श्याग्रे—

**निर्गुणा या सदानित्या व्यापिकाऽविकृता शिवा।**
**योगगम्याऽखिलाधारा तुरीया या च संस्थिता॥19॥**

इति मूलतत्त्वरूपेण भगवत्याः स्वरूपमुक्त्वा—

**तस्यास्तु सात्विकी शक्तिः राजसी तामसी तथा।**
**सरस्वती महालक्ष्मीर्महाकालीति तास्त्रयः॥20॥**

**तासां तिसृणां शक्तीनां देहाङ्गीकारलक्षणः।**
**सृष्ट्यर्थश्च समाख्यातः सर्वशास्त्रविशारदैः॥21॥**

**हरिद्रुहिणरुद्राणां समुत्पत्तिस्ततः स्मृता।**
**पालनोत्पत्तिनाशार्थं प्रतिसर्गस्ततः स्मृतः॥22॥**

इति तस्याः शक्तयोऽन्या विवृताः। पुरुषरूपतयोत्पादनमपि, च दिङ्मात्रेण दर्शितम्। अनुसर्ग एव चात्र प्रतिसर्गशब्दार्थः। अग्रे च सप्तमस्कन्धे, द्वात्रिंशेऽध्याये देवीगीतायां देव्या हिमालयं प्रत्युपदेशः—

**अहमेवास पूर्वं तु नान्यत्किंचिन्नगाधिप।**
**तदात्मरूपं चित् संवित्परब्रह्मेति नामकम्॥2॥**

**अप्रतर्क्यमनिर्देश्यमनौपम्यमनामयम्।**
**तस्य काचित् स्वतः सिद्धा शक्तिर्मायेति विश्रुता॥3॥**

**पावकस्योष्णतेवेयमुष्णांशोरिव दीधितिः।**
**चन्द्रस्य चन्द्रिकेवेयं ममेयं सहजा ध्रुवा॥5॥**

अत्रैव 'न सती सा नासती सा' इति पूर्वोक्तं सदसद्विलक्षणत्वं स्वीय मायया विवृतम्। जीवानां कर्माणि, कालादि सर्वं चात्रैव शक्तौ विलीनमभेदेनेत्यपि प्रतिपादितम्। तेन सा भगवती ब्रह्मरूपा, तस्याः शक्तिश्च मायाख्या तदभिन्ना विवृता। तृतीयस्कन्धे तु षष्ठेऽध्याये ब्रह्मविष्णुशिवानां विमानमधिष्ठाय बहुषु ब्रह्माण्डेषु परिभ्रम्य तत्र पृथक् पृथग् ब्रह्मविष्णुशिवान् कैलासवैकुण्ठादिकं चालोक्य

विस्मितानां यदा नन्दनमुपगम्य भगवत्याः साक्षात्कार आख्यातः, तदा देवी ब्रह्मणः शक्तिरूपतामेव स्वस्याः स्वमुखेनाह-शक्तिशक्तिमतोरभेदं च। अत्र परमात्मा पुरुषः पूर्वप्रकृत इदमादिशब्दैः परामृष्ट–

सदैकत्वं न भेदोऽस्ति सर्वदैव ममास्य च।
योऽसौ साहमहं योऽसौ भेदोस्ति मतिविभ्रमात्॥2॥

आवयोरन्तरं सूक्ष्मं यो वेद मतिमान् हि सः।
विमुक्तः स तु संसारान्मुच्यते नात्र संशयः॥3॥

पूर्वं भेदस्य मतिविभ्रमजन्यतामुक्त्वाऽग्रे भेदज्ञानान्मुक्तिरिति विरुद्धमिव यदुक्तं तदग्रे स्फुटीक्रियते–

एकमेवाद्वितीयं वै ब्रह्म नित्यं सनातनम्।
द्वैतभावं पुनर्याति काल उत्पित्सुसंज्ञके॥4॥

यथा दीपस्तथोपाधेर्योगात्संजायते द्विधा।
छायेवादर्शमध्ये वा प्रतिबिम्बं तथावयोः॥5॥

भेद उत्पत्तिकाले वै सर्गार्थं प्रभवत्यज।
दृश्यादृश्यविभेदोऽयं द्वैविध्ये सति सर्वथा॥6॥

नाहं स्त्री न पुमांश्चाहं न क्लीबं सर्गसंक्षये।
सर्गे सति विभेदः स्यात् कल्पतोर्थधिया पुनः॥7॥

अनेन सिसृक्षया परमशिवः परमात्मा स्वशक्तिं स्वेच्छयैव पृथक् करोति, तत्र च स्वप्रतिबिम्बं पश्यतीति आगमदर्शनप्रक्रिया सर्वाप्यनूदिता। सर्गेऽपि बिम्बप्रतिबिम्बयोरिव द्रष्टुबुद्धिजन्यो नाममात्रेण भेद इति चोपसंहृतम्। कार्येश्वराणां कार्यब्रह्मेति वेदान्तग्रन्थेष्वाख्यातानां ब्रह्मविष्णुशिवानां च तस्याः परशक्तेरेवोत्पत्तिरग्रे विवृता। माया प्रतिबिम्बितचिद्रूपता च भगवत्या देवीभागवतनवमस्कन्धव्याख्यायां नीलकण्ठेन व्याख्यात्रा समुद्धृते कूर्मपुराणवचनेऽपि सुस्फुटा–

चिन्मात्राश्रयमायाया शक्त्याकारे द्विजोत्तमाः।
अनुप्रविष्टा या संविन्निर्विकल्पा स्वयंप्रभा।
सा शिवा परमादेवी शिवाभिन्ना शिवंकरी॥ इति।

इयमेव सूक्ष्मं भेदं काल्पनिकं जानानां ब्रह्मविदामुक्तिः प्रागुक्ता। ये तु मूलत एव जगदुत्पादकं तत्त्वं प्रकृतिनाम्ना पुरुषाद्भिन्नमाचक्षते, तेषां सांख्यादीनां मतिविभ्रममुक्त्वा निन्दाकृता।

श्रुतावपि ऋग्वेदे श्रूयमाणमाम्भृणीयसूक्तं मूलतत्त्वस्य स्त्रीत्वख्यापके शक्तिदर्शने जीवातुभूतमस्त्येवेति विवेच्यतां सुधीभिः। तदित्थं मूलभूतायाः शक्तेरेकत्वमनेकत्वम्, मायाप्रकृत्योर्भिन्नत्वमभिन्नत्वञ्चेत्युभयमप्युपलभ्यते पुराणागमादिषु वेदान्तसम्प्रदायेषु च। सत्वं रजस्तम इति गुणत्रयमेव प्रकृतिः, माया तु गुणत्रयवती त्रिगुणेत्यपि भेदः क्वचिन्निरूप्यते। मूलशक्तिविकासभूताः शक्तयस्तु सर्गादिशक्तिरूपेणानेका एव सर्वत्र व्यवहृताः—

**"सर्गाद्या भावशक्तयः"**
**"गृहीतशक्तित्रितयाय"**
**सत्वरजस्तम इति निर्गुणस्य गुणास्त्रयः।**
**स्थितिसर्गनिरोधेषु गृहीता मायया विभोः॥ (श्रीभा. 2/5/12)**

इत्यादिषु तिसृणामेव शक्तीनां निरूपणं दृश्यते। प्रकृतिगुणेषु रज उत्पादकम् सत्वं स्थितिकर्तृपालकम्, तमस्त्वावरकं संहर्तृ इति प्रायेण सर्वत्र निरूप्यते। देवीभागवते-मार्कण्डेयपुराणादिषु महाकाली-महालक्ष्मी-महासरस्वतीरूपेण ख्यातासु तत्तद्गुणप्रधानासु शक्तिषु तु रजःप्रधाना महालक्ष्मीः पालयित्री, महाकाली च तमःप्रधाना संहर्त्री, सैव चोत्पादिकेति प्रक्रिया प्रतीयते। यो हि संहर्ता, स एव सर्वं संहृत्यान्ते तिष्ठति, ततश्च स एवाग्रे उत्पादकोऽपि भवितुमर्हति। अन्यस्य कस्यचित् तदानीमसत्वादिति तत्राशयः। महासरस्वती तु सत्वप्रधाना ज्ञानाधिष्ठात्री आत्यन्तिकलयस्य मुक्तिपदाभिधेयस्य संपादयित्री।

मार्कण्डेयपुराणान्तर्गतसप्तशतीस्तवनप्रकरणे हि महाकाल्या विष्णुनिद्रारूपतया संहर्तृत्वं सूचितम्, तस्या एव च ब्रह्मस्तुताया विष्णुसंबोधकतोक्ता। सृष्टिप्रतिबन्ध-कमधुकैटभौ व्यामोह्य विनाशकतया च स्रष्टृत्वमपि तस्या एव व्यञ्जितम्। उत्पन्नेषु देवादिषु तत्र सर्वत्र कारणेषु कार्येषु चांशरूपेणानुप्रविष्टाया तत्संधानरूपेण प्रादुर्भूताया महालक्ष्म्या तमःपरिणामभूतक्रोधादिरूपमहिषासुरादीनां विनाशकत्वेन जगत्पालकत्वं स्पष्टीकृतमेव। महासरस्वत्याश्चाहंकारममतारूपशुम्भनिशुम्भ- निहन्तृतया आत्यन्तिकलयरूपमुक्तिप्रदातृताभिव्यञ्जिता, समाधिवैश्याय मुक्त्यर्थं ज्ञानप्रदता स्पष्टीकृता चेत्यवधेयं सुसूक्ष्ममालोच्य। सप्तशतीरहस्य- त्रयेत्वागमिके सत्वतमसोः प्रेरकतया रजोगुणस्यैव प्राधान्यमभिलक्ष्यैव सर्वादित्वं सर्वोत्पादकत्वं च व्याख्यातम्। तदुत्पादितयोस्तमस्सत्वाधिष्ठात्र्योर्महाकाली- महासरस्वत्योः स्वयं महालक्ष्म्याश्च ब्रह्मविष्णुशिवानां तच्छक्तीनां चोत्पादकत्वमुपवर्ण्य रजोऽधिष्ठा- तुर्ब्रह्मः, तमोऽधिष्ठात्र्याः स्वरया सह संभूय सृष्टिकारिता, सत्वाधिष्ठातुर्विष्णोः रजोधिष्ठात्र्या

लक्ष्म्या सह पालकता, तमोधिष्ठातुः शङ्करस्य च सत्वाधिष्ठात्र्या उमया सहाभेदकत्वेन जगद् व्यवस्थापकतान्ते संहर्तृता चोक्ता। तदित्थंरजस्तमसोः स्रष्टृत्वं सत्वरजसोः पालकत्वम् तमःसत्वयोर्व्यवस्थापकत्वं संहर्तृत्वमात्यन्तिकलय- रूपमुक्तिजनकत्वं वा लभ्यते। जगद्व्यवस्थायां हि सत्वतमसोरुभयोरपि हेतुत्वमनुभवसिद्धमेव आत्यन्तिके लयेऽपि च रजोनिरोधकत्वेन तमसः सहकारिता समुपदिष्टा स्यात् वस्तुतस्तु गुणत्रयस्य सर्वदैवाविनाभावेन स्थिततया कदापि सर्वथा पार्थक्यानुपलम्भेन संभूयैव सर्वत्र कारणत्वमिति एकैकस्य द्वयोर्वा कारणत्वाभिधानं प्राधान्यविवक्षा-मूलकमेव, विवक्षा च वक्तुरभिप्रायानुसारिणी इति यथाकथञ्चिदप्युपपादने प्रक्रियाभेदमात्रमेव न तु कोऽपि विरोधप्रसङ्ग इत्याकलनीयं विवेकदृशा।

अथ ब्रह्मवैवर्तस्य प्रकृतिखण्डे देवीभागवतस्यैकादशे स्कन्धे च पञ्चशक्तिवाद उपलभ्यते।

**गणेशजननीदुर्गा राधा लक्ष्मीः सरस्वती।**
**सावित्री च सृष्टिविधौ प्रकृतिः पञ्चधा स्मृता॥**
**आविर्बभूव सा केन का वा सा ज्ञानिनां वर।**
**किं वा तल्लक्षण वत्स को वा वक्तुं क्षमो भवेत्॥ इति॥**
**(ब्रह्मवैवर्तप्रकृतिखण्डे 1 अध्याय 1-2 श्लोकः)**

ब्रह्मवैवर्तस्य ब्रह्मखण्डान्ते ऊनत्रिंशेऽध्याये नरानरायणाश्रमे गत्वा नारदः कुतः सृष्टिर्जाता, सर्वे च ब्रह्माद्याः कमुपासत इत्यादि पृच्छति। तदुत्तरे नारायणः त्रिंशेऽध्याये प्रथमं ब्रह्मरूपेण कृष्णं स्तौति। अथ सृष्ट्युत्पादकतां नित्यायाः प्रकृतेराचष्टे। सा प्रकृतिर्ब्रह्मरूपैवेत्यपि नारायणेन प्रकटीकृतम्।

**ब्रह्मस्वरूपा प्रकृतिर्नभिन्ना यया च सृष्टिं कुरुते सनातनः।**
**श्रियश्च सर्वाकलया जगत्सु माया च सर्वे च यया विमोहिताः॥**

**नारायणी सा परमा सनातनी**
**शक्तिश्च पुंसः परमात्मनश्च।**
**आत्मेश्वरश्चापि यथा च शक्ति-**
**स्तया विना स्रष्टुमशक्त एव॥12॥**

एतेन शक्तेर्ब्रह्मतादात्म्यमेव स्पष्टमेवोद्घुष्टम्। सृष्टौ शक्तेः प्राधान्यञ्च यदस्माभिरागमप्रकरणे पूर्वमुक्तम् तदपि स्पष्टैरक्षरैरत्र प्रतिपादितम्। इयं च कृष्णस्य प्राणाधिष्ठात्री देवी सर्वेषामाराध्या चेत्युक्त्या चिद्रूपैवेयमित्यपि निःसंशयं ज्ञायते, जडस्याराधनायाः क्वाचिदप्यनुपदिष्टत्वात्। अग्रे प्रकृतिखण्डे च—

**प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः।**
**सृष्टौ प्रकृष्टा या देवी प्रकृतिस्सा प्रकीर्तिता॥**

**(अ. 1, श्लोकः 4)**

इति नामनिर्वचनेन सृष्टावस्याः प्राधान्यं पुनरनूदितं दार्ढ्याय–

**गुणे प्रकृष्टसत्वे च प्रशब्दो वर्तते श्रुतौ।**
**मध्यमे रजसि कृश्च तिशब्दस्तमसि स्मृतः॥5॥**

**त्रिगुणात्मस्वरूपा या सर्वशक्तिसमन्विता।**
**प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते॥6॥**

**प्रथमे वर्तते प्रश्च कृतिश्च सृष्टिवाचकः।**
**सृष्टेराद्या या देवी प्रकृतिः सा प्रकीर्तिता॥7॥**

इति तस्या गुणत्रयात्मकतां सृष्टौ प्राथम्यं प्राधान्यं पुनः पुनर्निर्वचन-रूपेणानूद्य–

**योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः।**
**पुमांश्च दक्षिणार्द्धाङ्गो वामाङ्गः प्रकृतिः स्मृतः॥8॥**

इति भगवतः कृष्णस्यार्द्धाङ्गत्वं तस्याः स्पष्टमुक्तम्। अभेदश्च भूयो भूय उद्घुष्टः। तेन यदस्माभिः पूर्वमागमप्रक्रियायां ब्रह्मरूपता शक्तेरुक्ता साप्यत्र स्पष्टीभवति।

**अतएव हि योगीन्द्राः स्त्रीपुंभेदं न मन्वते।**
**सर्वं ब्रह्ममयं ब्रह्मन् शश्वत् पश्यन्ति नारद॥**

इति चोभयरूपेणोपासनमपि स्पष्टमुद्घुष्यते।

अस्या एव च प्रकृतेः सृष्ट्युपयोगाय पञ्चरूपता व्याख्यायते स्म। तत्र दुर्गा तेजोरूपा, तेजसोधिष्ठात्री, लक्ष्मीः संपदधिष्ठात्री, तृतीया सरस्वती शुद्धसत्वरूपा बुद्ध्यधिष्ठात्री सावित्री वेदमाता ब्रह्मतेजोमयी ब्रह्माख्यवेदस्याधिष्ठात्री, पञ्चमी राधा च पञ्चप्राणस्वरूपा परमानन्दरूपा परमाह्लादरूपा रासेश्वरी, निर्गुणा निराकारा निर्लिप्तात्मस्वरूपिणी निरीहा भक्तानुग्रहविग्रहेत्यादिभिर्विशेषणैः स्तुता कृष्ण-वक्षस्थलस्थिता चोक्ता। तेनेदं स्फुटीभवति–यच्छक्तिविशिष्टस्य ब्रह्मणः पञ्चधर्माः–स्वप्रकाशनापरपर्यायं त्रिकालाबाध्यसत्तारूपं तेजः, सर्वशक्तिरूपा संपत्, सर्वज्ञतारूपा बुद्धिः, जगद्रचनार्थं ब्रह्मणे दातव्या वेदाः, स्वरूपभूतः प्रकटतां गत

आनन्दश्चेति। तेषामेषां धर्माणामधिष्ठातृतया सर्वत्र धर्माणामेषां संक्रामकतया च प्रकृतेः पाञ्चविध्यमुररीकृतम्। इमा एव पञ्चशक्तयः विशिष्टे ब्रह्मणि वर्तमानान् तत्कार्यभूते जगति सञ्चारयन्ति। आह्लादशक्तिरूपा राधा ब्रह्मापि स्वानन्द-मनुभावयति, परत्रापि च तदानन्दं सञ्चारयति स्वयं च तदानन्दमनुभवतीति चैतन्यमहाप्रभुसम्प्रदाये व्याख्यायते। यद्यपि ब्रह्म स्वयमानन्दरूपम्, परं तस्यानन्दस्यानुभवो राधारूपायाः शक्तेः साहाय्येनैव भवति। तेन तस्याः कृष्णान्तःकरणरूपता सिद्ध्यति, अन्तःकरणवृत्तेरेवानुभावकतया प्रसिद्धेः। एवमन्यासामपि शक्तीनां तत्तद्धर्माधिष्ठातृत्वं तत्सञ्चारकत्वं चानुसंधेयम्। कृष्णस्वरूपभूतानां तेनाविर्भावितानां सगुणस्वरूपाणां चैताः शक्तयः कृष्णेनैव तेभ्यो विभज्य दत्ताः। शिवस्य भगवतः दुर्गा आदिशक्त्यभिधा, पूर्वं शिवेन विवाहो न स्वीकृत इति कृष्णेन दुर्गा स्वलोक एव स्थापिता। शुम्भ-निशुम्भ-दैत्यवधोत्तरमियं दक्षादनन्तरं हिमालयाच्च जन्म गृहीत्वा शिवपत्नी भविष्यतीत्याद्यपि ब्रह्मखण्डे निरूपितम्। तेन मुक्तेषु त्रिकालाबाध्यसत्तासञ्चारकत्वं तस्याः प्रतीयते। मुक्तिप्रदस्य शिवस्य शक्तित्वात् अहन्ता-ममतारूपशुम्भनिशुम्भघातकत्वाच्चेति लक्ष्मीः सरस्वती चेति द्वे विष्णोः शक्ती। पालने सत्वरजसोरुभयोरप्यपेक्षणादित्युक्तं प्राक्। सावित्री ब्रह्मणः शक्तिः, ब्रह्मा वेदैरेव जगत्सृजतोत्यग्रे विस्तरेण व्याख्यायेत। राधा तु कृष्णस्यैव शक्तिः, अतएव—निर्गुणत्वं तस्या व्याख्यातम्। तस्या अपि ब्रह्माण्डसृष्टावुपयोगोऽग्रे ब्रह्माण्डोत्पत्तिनिरूपणे व्याख्यास्यते। इत्थं च विवक्षाभेदेन तिसृणामेव पञ्चविधत्वं वैचित्र्याय व्याख्यातम्। पूर्वोक्तयुक्त्या संहर्तुरेव प्रथमसृष्टत्वमिति दुर्गाया एवादिसृष्टिजनकता संहर्तृता च न विस्मर्तव्या। सावित्र्यास्त्ववान्तरसृष्टिजनकतेति।

अथ प्रकारान्तरेणापि व्याख्यास्यामः। प्रत्यभिज्ञादर्शने ह्यागमिके परतत्त्वस्य परमशिवस्य पञ्चधर्माः पञ्चमुखरूपा व्याख्यायन्ते-परमानन्दः, पूर्णं ज्ञानं त्रिकालसम्बन्धशून्या सत्ता, सर्वभवनसामर्थ्यम्, सर्वकर्तृता चेति। एते एव धर्माः संकुचिताः रागविद्याकालनियीतकलारूपेण पञ्चकञ्चुकतामासाद्य जीवं बध्नन्तीति तत्र निरूप्यते। तत्र यः परमशिवः स एवात्र कृष्णः। संज्ञाभेदमात्रमिदम्। तस्मिंश्च य एते पञ्चधर्माः, त एवपञ्चशक्तिरूपेणात्र निरूपिताः, आनन्दो राधारूपेण, ज्ञानं सरस्वतीरूपेण, सत्ता दुर्गारूपेण, सर्वभवनसामर्थ्यं सावित्रीरूपेण। तस्य सामर्थ्यस्य वेदरूपत्वादित्यग्रे वेदमूलकसृष्टि-निरूपणे स्फुटीभविष्यति। सर्वकर्तृत्वं च लक्ष्मीरूपेणेति। यद्वा सृष्टिः, पालनम्, संहारः, विलयः, अनुग्रहश्चेति पञ्चशिवस्य कर्माणि तत्रैव दर्शने व्याख्यायन्ते तेषां पञ्चानां सम्पादनाय पञ्चशक्तयोऽपेक्ष्यन्ते।

वेदधारणे सृष्टौ सहकारिणी सावित्री, पालने सहकारिणी लक्ष्मीः, संहारे सहकारिणी दुर्गा, आत्यन्तिकलये मुक्तिरूपे ज्ञानद्वारेण सहचारिणी सरस्वती, अनुग्रहे च सहकारिणी राधेति। तदिदं सर्वं विवक्षाभेदमात्रम्, संक्षेपविस्तारयोर्विवक्षाधीनत्वात्, विवक्षायाश्च वक्तुरधीनत्वात्, वस्तुतस्तु त्रयोऽपि गुणाः सम्मिलिता एव सर्वत्र कार्येष्वपेक्ष्यन्ते। तत्तद्गुणस्य तत्र तत्र कार्ये प्राधान्यमात्रं भवतीति प्रागुक्तं स्मर्तव्यमेव।

एवमेवागमे शक्तेर्दशभेदा दशानां महाविद्यानां रूपेण व्याख्यायन्ते। तत्र सृष्टेः पूर्वामवस्थामारभ्य सृष्टेः पूर्णतापर्यन्ता दशावस्थास्तत्तन्महाविद्यारूपेण निरूप्यन्ते—र्वाद्या भगवती काली, सर्वान्तिमा च षोडशीति। तदेतदप्रकृत्वान्नेह प्रपञ्च्यते।

अस्यायं निष्कर्षः—वैदिकी आगमिकी चेत्युभयविधापि प्रक्रिया पुराणेषूपलभ्यते, तत्र च वैचित्र्यं प्रतिपादनप्रक्रियायामेव, न तु वास्तविको भेदः तदेव हि तत्त्वं निर्गुणनिराकारतया स्वीयेन वास्तवेन रूपेण वैदिकप्रक्रियायां प्रतिपाद्यते, उपासनार्थं तांस्तानाकारान् प्रकल्प्य तु उपासनाप्रधान आगमशास्त्रे तत्रापि च मूलतत्त्वस्य निराकारता विव्रियत एव। तथा हि ब्रह्मवैवर्ते ब्रह्मखण्डे द्वितीयेऽध्याये—

**ज्योतिः समूहं प्रलये पुरासीत् केवलं द्विज।**
**सूर्यकोटिप्रभं नित्यमसख्य विश्वकारणम्॥4॥**

**स्वेच्छामयस्य च विभोस्तज्ज्योतिरुज्ज्वलं महत्।**
**ज्योतिरभ्यन्तरे लोकत्रयमेव मनोहरम्॥5॥**

इत्यादिना पूर्वं निर्गुणतयैव मूलं प्रस्तुत्य गोलोकनाथकृष्णरूपेण साकारेण तद्वर्णितम्। तत्रैव च सर्वेषामुत्पत्तिरुक्ता। एवमन्यत्रापीत्युपदर्शितमनेकधा प्राक्। तेनोपासनासिद्ध्यर्थं प्रक्रियाभेदमात्रमिदम्, न वास्तविको भेदो विरोधो वेति स्फुटीभवति। उपासनाधिकारिणां भिन्नरुचित्वाच्च तस्यैकस्यैव मूलतत्त्वस्य विभिन्ना आकारा विभिन्नानि च दुर्गालक्ष्मीकृष्णविष्णुरामशिवपशुपतिहिरण्यगर्भस्वयंभुसूर्य-गणेशप्रमुखानि नामानि व्यवह्रियन्ते, तदेतत्सर्वं प्रतिपादनप्रक्रियाभेदमात्रम्। न तु तत्र कोऽपि विशेषः, एकस्यैव विभिन्नाभिर्विधाभिः प्रतिपादनात्। श्रुतिष्वपि चैतानि विभिन्नानि नामरूपाण्युपलभ्यन्त एवेति न शास्त्राणां परस्परभेदः। मूलतत्त्वं चेदं शक्तिसहकारि जगज्जनयतीत्यत्रापि सर्वेषां शास्त्राणां संमतिः प्रदर्शिता। तत्र च केचन शक्त्याश्रयं परमात्मानं प्रधानं मन्यन्ते, परे तु सर्वकारणीभूतां शक्तिमेवेति पुराणेषु क्वचिद् ब्रह्मणः सृष्ट्युपक्रमः, क्वचिच्च प्रकृतेर्मायया इति

तदपि वर्णनशैलीभेदमात्रम्। विशिष्टस्य कारणत्वेन उभयत्राप्युक्तिसंभवात्। औपासनिकानां वैष्णवशैवशक्त्यादीनि दर्शनान्यपि च भूयसा तान्त्रिकीत्यपर-पर्यायामागमिकीं प्रक्रियां संगृह्णन्ति, तत्र कानिचिद् वैदिक्या प्रक्रियया सहागमिकीं योजयन्ति, अन्यानि तु शुद्धामागमिकीमेवावलम्ब्य प्रवर्त्तन्ते, परं तत्र श्रुतिं तान्यपि प्रमाणयन्त्येव। प्रत्यभिज्ञादर्शनमिव शैवदर्शनमप्यागमिकीं प्रक्रियामेवाधारीकृत्य प्रवर्तते, तत्रापि परमशिवो मूलतत्त्वम्, शक्तिस्तच्छरीरम्। शक्ति-रचितैः 'ईशानादिभिः' पञ्चभिर्मन्त्रैस्तस्याङ्गानि कल्प्यन्ते। ईशनि मस्तकः, तत्पुरुषवक्त्रः घोरमन्त्रहृदयः, वामदेवगुह्यः, सद्योजातपाद ईश्वर इति। इमे मन्त्राः याजुषे रुद्राध्याये प्रसिद्धाः। परमशिवस्य स्वातन्त्र्यं नाम परा शक्तिरिहाभ्युपगम्यत एव। अनुत्तरपदाभिधेया शक्तिः, आनन्दः, इच्छा, ज्ञानं क्रिया चेति पञ्चमुखानि शिवस्य विव्रियन्ते। आनन्दोप्यत्र शक्तिविशिष्टस्यैव शक्तेरेव वा विकासः।

इच्छा, ज्ञानम्, क्रिया चेति त्रयः शक्तेरेव विकासाः। साकारशरीरप्रदर्शनं भक्तानुग्रहायैव। शक्तिविशिष्टस्यैव च शिवस्य पञ्चकृत्यकारित्वमत्रोच्यते—सृष्टिस्थितिसंहारा, तिरोभावानुग्रहौ च पञ्चकृत्यानि। नित्यान्येतानि पञ्चकृत्यानि यदैकत्र सृष्टिः प्रवर्तते तदान्त्रय (ब्रह्माण्डान्तरे) संहारः, अन्यत्र च स्थितिरिति संभवात्। एकत्रैव त्रितयस्य वक्तुं शक्यत्वाच्च। यथा मृत्पिण्डेन घटो यदा निर्मीयते, तदा घटरूपेण सृष्टिः, पिण्डार्थस्य संहारः, मृद्रूपेण तु स्थितिरिति सर्वत्रैवं शक्यं योजयितुम्। तिरोभावे जीवरूपताप्राप्तिः, अनुग्रहश्च मोचनमिति। माया तु दर्शनेऽस्मिन् पाशनामके तत्त्वे गण्यते। प्रत्यभिज्ञादर्शनेऽत्रापि च मोहिकैव माया। परमत्र सृष्टिहेतुतयापि सा क्वचिदाख्यायते। नकुलीशपाशुपतदर्शनेपि प्रायेणेयमेवानुस्मृयते प्रक्रिया। तत्र तु भगवतः शिवस्य स्वातन्त्र्ये जीवादृष्टापेक्षापि न स्वीक्रियते, शैवदर्शने तु जीवादृष्टापेक्षमेव भगवतः स्वातन्त्र्यमिति। एवमन्योपि सूक्ष्मो भेद उपासनाभेदश्च तत्रैवालोच्यः। पुराणेष्वपि च सर्वविधा विभिन्ना प्रक्रिया तत्र तत्रालोच्येति।

सोऽयं परतत्त्वस्य शक्तेश्च प्रपञ्चो भिन्नभिन्नशास्त्रपरिभाषारूपेण विभिन्नानि दर्शनान्यवलम्ब्य मनाग् व्याख्यातः। रूपं चेदं प्रतिपाद्याधिकारभेदमभिसंधाय प्रतिपादनप्रक्रियाभेदमात्रमित्यपि तत्र तत्र दिग्विधया प्रदर्शितम्। येऽपि च परतत्त्वस्य विष्णुशिवाद्याकाराः पुराणेषूपदर्शिताः, तेषामपि जगन्निर्मातृतत्त्वरूपेण जगद्रूपेण वा भावना तत्र तत्रोपदिश्यते। तत्र भगवतो विष्णोराकारस्य भावना प्रागेव पुराणे योगप्रकरणे विष्णुपुराणादिरीत्या प्रदर्शिता, शिवाद्याकाराणामपि चाग्रे क्षरप्रकरणे प्रदर्शयिष्यते—इति परस्परविरोधस्य न कोऽप्यवसरः। □

# समन्वयरूपा मूलतत्त्वस्य वैज्ञानिकी प्रक्रिया

अथ सर्वसमन्वयवादिनो वैज्ञानिकीं पद्धतिमवलम्बमानाः श्रीगुरुचरणविद्यावाचस्पतिमहाभागास्तु इत्थं व्याचक्षते—अनन्तकोटिब्रह्माण्डात्मकस्य निखिलप्रपञ्चस्यैकं तन्मूलभूतं तत्त्वं रसपदाभिधेयम्—'रसो वै सः' इति श्रवणात्। रसपदञ्चानन्दबोधकं सुप्रसिद्धमित्यानन्दरूपतैव मूलतत्त्वस्यानया श्रुत्या प्रतिपाद्यते। यद्यपि मूलतत्त्वं निर्विशेषं निर्धर्मकं च केनापि शब्देनाभिलपितुं शक्यमिति सत्यम्, परं शब्दमन्तरेण बोधयितुमशक्यत्वात्कथञ्चित् काऽपि शब्दः परिग्राह्य एवेत्यानन्दबोधको 'रस' शब्द एकत्र परिगृहीतः। आनन्दस्य सर्वेषामीप्सितत्त्वादीप्सितत्त्वं तत्र बोधयितुं प्रयुक्तोऽयं रसशब्दः। आनन्दरूपता च तस्य मूलतत्त्वस्य निम्ननिर्दिष्टयुक्तिभिरुपपाद्या।

(1) मूलतत्त्वं तद् ब्रह्म सर्वं जगज्जनयति, किन्तु स्वयं न हीयते। स्वयमक्षतस्य प्रपञ्चोत्पादनं विकास एव स्यात्। विकासश्चानन्द एव सम्भवति—इति तस्यानन्दरूपतया रसत्वं सूपपादमेव।

(2) जगति सर्वेषां पदार्थानां परस्परमुपकार्योपकारकभावो दृश्यते। परस्परं विरुद्धत्वेन भाव्यमाना अपि पदार्थाः परस्परं साहाय्येन जगच्चक्रं परिचालयन्ति। कालविशेषे ग्रीष्मर्तुप्रभृतिषु देशविशेषे वा उद्रिक्तमग्नेर्बलं जलेनाल्पीक्रियते। तथैव प्रवृद्धा जगत् प्लावयितुमुद्युक्ता आपोग्निना शोष्यन्ते। वायोरत्यर्थं प्रवृत्तां गतिं पार्थिवाः-पर्वताद्याः न्यूनीकुर्वन्ति, पृथिव्या जाड्यापरपर्यायामभिनवपदार्थोत्पत्तिप्रतिबन्धिकां चावाञ्छितां स्थितिं वायुर्विधूनयति। स हि पार्थिवानर्थान् जाड्यात् प्रच्याव्य चालयति। एवं विरुद्धाभ्यामपि समीक्रिया जन्यत इत्यनुभूयते। समीक्रिया च शान्तिः, प्रसादः, अक्षोभः, इत्यादिनामभिर्व्यवह्रियते। तदेतदानन्दस्य रूपम्। द्विविधो ह्यमानन्दः—शान्त्यानन्दः, समृद्ध्यानन्दश्चेति। अभिनवपदार्थप्राप्त्यात्मनस्तं स्वस्मिन् प्रवेशयितुं प्रसरणं समृद्ध्यानन्दः। अक्षोभावस्था, समीकरणं प्रसाद इत्यादिपदवाच्यः शान्त्यानन्दः। सोऽयं शान्त्यानन्द एव मुख्यः, बलवदपि समृद्ध्यानन्दं विहाय शान्त्यानन्दे सुषुप्तौ सर्वेषामभिलाषदर्शनात्। तदेतज्जगत्यनुभूयमानं शान्त्यानन्दरूपं कारणमस्यानन्दरूपतामनुमापयति।

(3) एवं समृद्ध्यानन्दरूपतापि मूलतत्त्वस्य विचार्यताम्—

**"यो वै भूमा, तत्सुखम्, यदल्पं तद्दुःखम्"**

इत्याह श्रुतिः। अनुभवसिद्धं चैतत्। यदा कश्चिन्मनुष्यः कञ्चिदभिनवं पदार्थं गृहभूमिवस्त्रसंपदमासादयति, तदा तस्मिन्नपि पदार्थे स्वत्वबुद्धिरुपजायते, तमप्यात्मपरिकरे प्रवेशयितुमस्माकं परिछिन्नत्वेनाभिमन्यमान आत्मा प्रसरतीति यावत्। बीजचितिः (कारणशरीरम्), देवचितिः (सूक्ष्मशरीरम्), भूतचितिः (स्थूलशरीरम्), प्रजा वित्तञ्चेति पञ्चसु परिव्याप्तो व्यावहारिक आत्मेति क्षरपुरुषकलासु व्याख्येयमेतत्। तस्मात्प्रसरणबलादेव तत्रानन्दप्रतीतिर्भवति लोकनामिति सर्वेषामनुभवगम्योऽयमर्थः। अस्मदायत्तेषु पदार्थेषु कस्यचिदपगमे तु तस्मादात्मा निवर्तते इति संकोचे दुःखानुभवो जायते। तदेवं प्रसरणे आनन्दः संकोचे तु दुःखमिति सिद्धे यतः परं प्रसरणं नास्ति तद् भूमपदाभिधेयं विभुत्वं परमानन्द इत्यत्र कः संशयीत। भूमैव चात्मा मूलतत्त्वमिति तस्यानन्दरूपता स्फुटमनुभवसिद्धा।

(4) यत्र यावती शक्तिः, तावानेव तत्रानन्द इत्यानुभवेन श्रुत्या च सिद्धम्। पश्वाद्यपेक्षया मनुष्ये महती शक्तिरिति मनुष्यः पश्वादीन् यथेच्छमुपयुञ्जानः परममानन्दमनुभवति, घोटकपरिचालने, हस्त्यारोहणे, गवादिदोहने चानन्दस्यानुभूयमानत्वात्। मनुष्येष्वपि च यत्र ज्ञानशक्तिः, प्रभुत्वशक्तिर्धनशक्तिर्वा यावत्यां मात्रायामधिका, तेन तावानेवाधिक आनन्दोऽनुभूयते, तत एव तु तच्छक्तिसंग्रहणाय प्रवर्तन्ते सर्वेऽपि लोकाः। देवयोनिषु च मनुष्यापेक्षयात्यधिका शक्तिरिति तत्राधिकमानन्दमनुमाय तद्योनिप्राप्तये यागाद्या अनुष्ठीयन्ते। तैत्तिरीयोपनिषद्यानन्दवल्ल्यामपि चैवमेव श्राव्यते—विदुषः बलिष्ठस्य समृद्धस्य परमो मानुष आनन्दः, ततः शतशतगुणिताश्च गन्धर्वादीनामानन्दा इति समृद्ध्यानन्दस्य तारतम्यं तत्र श्रूयते। शान्त्यानन्दस्तु तैः सर्वैः समः सर्वाधिक इति "श्रोत्रियस्य चाकामहतस्येति" सर्वैः सह पठ्यते। तदित्थं शक्तिविशेष एवानन्दाविर्भावक इति सिद्धे सर्वशक्तिमतो मूलतत्त्वस्यानन्तानन्दरूपतायां को विवादावसरः।

(5) मृत्युर्हि दुःखस्य पराकाष्ठा। सर्वं कथञ्चित् सोढुं सज्जोऽपि सर्वः प्राणी मृत्युनाम्नैव परमुद्विजते। नास्ति सत्तोच्छेदरूपान्मृत्योरधिकमनिष्टं किमपि जगति, दुःखं चानिष्टमिति परं दुःखं मृत्युः। तद्वैपरीत्येन जीवनपदाभिधेयायाः सत्ताया आनन्दरूपतोक्तप्राया। दुःखविपरीत एवार्थे आनन्दव्यवहारात्, ततश्च

सर्वादिसत्तारूपस्य सर्वत्र सत्तासमर्पकस्य सर्वसत्तानिधानस्य मूलतत्त्वस्य परमानन्द-रूपता कथं न सिद्धा? एवमेव पारतन्त्र्यं नाम परं दुःखम् शुकसारिकादीनामपि सर्वभोगान् परित्यज्यापि पारतन्त्र्यापनयने प्रवृत्तिदर्शनात्। तथा च तद्विपरीतं स्वातन्त्र्यमानन्दरूपमिति स्फुटीभवत्येव। ततश्च द्वितीयस्य कस्याप्यभावात् पूर्णस्वतन्त्रं तन्मूलतत्त्वं कथं न स्यादानन्दरूपम्।

(6) "यतो वा इमानि भूतानि जायन्ते, यत्र जातानि जीवन्ति यत्प्रयन्त्यभि-संविशन्ति" इति ब्रह्मपदव्यवहार्यस्य मूलतत्त्वस्य तटस्थलक्षणं श्रावयति श्रुतिः। तदेतल्लक्षणमानन्द एव घटमानं वीक्षामहे। सति स्त्री-पुंसोरानन्दे गर्भस्थित्या सर्वेषां प्राणिनामुत्पत्तिदर्शनादानन्दादुत्पत्तिः सिद्धा। न च निरानन्दस्य जीवनं संभवति, यस्य प्राणिनो जीवने स्तोकोप्यानन्दो न स्यात्, तदैव स विपद्यते, आनन्दलेशेनैव जीवनं धार्यते, अधिकेनानन्देन च जीवनं वर्धत इति यत्र जातानि जीवन्तीत्यप्यानन्द एव समन्वेति। किं च प्राणिनां सर्वेऽपि व्यापारा आनन्द प्राप्तय एव प्रवर्तन्ते, संपदवाप्तिः, तया भोगसाधनानां सम्पादनम्, भोगः, तत आनन्द इति आनन्दावाप्तौ व्यापाराः, तत्साधनभूताः प्राणाः, इन्द्रियाणि मन इत्यादि सर्वं तत्रैवानन्दे निमज्य लीनमिव भवति, ततः पुनरपरविधस्यानन्दस्य प्राप्तये व्यापारः तस्यापि प्राप्तौ तदर्थव्यापारादीनां पुनस्तत्र लयरूपा निवृत्तिरिति स्फुटं प्रत्यहमनुभूयते, किं नाम व्यापारा एव, व्यापाराविष्टः पुरुषोऽपि तस्मिन्नानन्दे निमग्नः निश्चेष्टप्रायो भवतीति आनन्दमेव प्रयन्त्यभिसंविशन्तीत्यप्यनुभवसिद्धम्, ततश्च सर्वमूलब्रह्मलक्षणस्यानन्दे समन्वयान्मूलतत्त्वमानन्दरूपमेवेति सुस्फुटं सिद्ध्यत्येव।

(7) मूलतत्त्वमिदं सर्वस्यापि स्थावरजंगमात्मकस्य जगत आत्मभूतम्। तत्सृष्ट्वा तदेवानुप्राविशदिति' श्रुत्युक्तादनुभवसिद्धात् न्यायात्। जीवोऽपि तद्व्यष्टिभूतस्तदात्मक एवेति जीवप्रकरणे स्फुटीक्रियेत जीवाख्यस्यात्मनश्चा-नन्दरूपता वेदान्तग्रन्थेषु प्रसाधिता। तत्रैकायुक्तिरियम्—यत्प्रियत्वमानन्दस्यैव रूपं तच्छेषो वा। यत्सम्बन्धेनानन्दोऽनुभूयते, तत्रैव प्रियत्वदर्शनात्, प्रियत्वं तु सर्वोत्कृष्टमात्मन एव, आत्मसम्बन्धादेव कलत्रमित्रपुत्रादिषु गृहारामादिषु वा प्रियत्वं प्रसरति। अतएव यावत्तेषामात्मानुकूल्यं नामात्मानुगामित्वं तावदेव प्रियत्वं स्थितम्। किञ्चिदपि आत्मप्रातिकूल्यं कदाप्यनुभूतं चेत् तत्क्षण एव प्रियत्वं निवर्तते, द्वेषस्तत्रैवानुवर्तते, गृहारामादिष्वपि चात्मसम्बन्धरूपस्य स्वत्वस्यापगम निवर्तत एव प्रियत्वम्। तदेतद् विवृतं वृहदारण्यकोपनिषदि मैत्रेयी ब्राह्मणे—

न वा अरे पत्युः कामाय पतिः प्रियो भवति,
आत्मनस्तु कामाय पतिः प्रियो भवति,
न वा अरे जायायाः कामाय जाया प्रिया भवति,
आत्मनस्तु कामाय जाया प्रिया भवति।
इत्यादिना।
न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति,
आत्मनस्तु कामाय सर्वं प्रियं भवति।
इत्यन्ते ग्रन्थेन।

श्रीविद्यारण्यस्वामिनाऽपि चानूदितं पञ्चदश्याम्—"यत्प्रेमात्मार्थमन्यत्र नत्वन्यार्थ इहात्मनि" इत्यादिना। यत्तु केचिदाक्षिपन्ति अत्यन्तं स्वार्थपराणां प्रवृत्तेरनुवादोऽयं श्रुत्यादिषु। वस्तुवस्तु प्रेमतादृशवस्तु, यद्वशतः स्त्रीमित्राद्यर्थे स्वमात्मानं बलिमिवोपहरन्तो दृश्यन्ते बहवः प्रेमपाशनिबद्धाः। समाजप्रेम, देशप्रेम, मातृभूमिप्रेम वा येषु जागर्ति, तेऽपि स्वात्मानं तृणमिवार्पयन्ति तदर्थं, क्व तत्र स्वार्थगन्धः? ततश्चात्मार्थं सर्वमिति केवलं स्वार्थपराणां वच इति। तत्रेदं प्रतिवक्तव्यम्—स्थूलमिदं पश्यन्ति भवन्तः, न तु वैज्ञानिकीं पद्धतिमवलम्ब्यानुभवस्य विश्लेषणेऽवदधति। स्त्रीपुत्रमित्राद्यर्थे किं तावद्बलीक्रियते। शरीरमेव ननु। तावतात्विदमेव सिद्ध्यति—यत्स्वशरीरापेक्षयापि कलत्रपुत्रादिषु आत्मानुकूल्यं तैरधिकं ज्ञायते। शरीरादान्तराणि इन्द्रियाणि इन्द्रियेभ्य आन्तरं मनः, ततोभ्यन्तरीभूता बुद्धिः। यच्च यावदान्तरम्, तत्र तावदेव प्रियत्वं प्रसरति। मनसि हि शरीरा-दान्तरेऽधिकतरमात्मनः प्रियत्वम्। मनसश्च वृत्तिः स्नेहः पुत्र-मित्रकलत्रादिषु। स चेच्छरीरापेक्षया तत्राधिकस्तर्हि शरीरं तदर्थं त्यज्यते तस्मात्तदर्थं शरीरस्य बलीकरणं मनोवृत्यर्थमेवेति स्पष्टं फलति। मनसो वृत्तिः स्नेहातिशयो यदि न स्यात्, न कोऽपि तदर्थं शरीरं त्यजेन्नाम। तस्मादात्मनो यदतिसन्निकृष्टं, तदर्थं विप्रकृष्टं त्यज्यत इत्यात्मसम्बन्धादेव प्रियत्वमनेन स्थिरीभवति, न तु विपरीतं किमपि। समाजदेशजन्मभूम्यादावपि येषां स्वशरापेक्षया स्नेहातिशयः ते तदर्थं शरीरं बलीकुर्वन्ति—समाजदेशादीनां स्नेहरूपया मनोवृत्यातितरामात्मानः सन्निकर्ष-माप्तत्वात्। प्रकारान्तरेण वा विचार्यताम्। विभुरयमात्माः अविद्यावशादेवास्माभिः शरीरमात्रे निबद्धः, तस्य क्रमेण विकासोपक्रमोयं प्रकृतिसिद्ध एव—यत्कुटुम्बिषु पुत्रमित्रकलत्रादिषु आत्मबुद्धिः तदनु सर्वस्मिन् कुले, ग्रामे, देशे, सर्वस्यां जन्मभूम्यामन्ततः "उदारचरितानान्तु वसुधैव कुटुम्बकम्" इति न्यायेन सर्वत्र

ब्रह्माण्ड आत्मबुद्धिरिति। अपरिच्छिन्नं हि परिच्छेदे नियमितमपरिच्छिन्नतामेव वाञ्छतीति प्रकृतिसिद्धोऽयं नियमः। ततश्च येषां कुटुम्बे, कुले, ग्रामे, देशे, जन्मभूम्यां वात्मबुद्धिः प्रसृता, ते तदर्थं स्वल्पं शरीरमात्रमुत्सृजेयुरित्यत्र किं चित्रम्। यस्मादस्ति सर्वत्र स्वार्थबुद्धिरेव, स्वत्वं तैः परिच्छेदान्निस्सार्य विस्तारं प्रापितमित्येयं सूक्ष्मया दृशा दृश्यताम्। तदित्थं परमप्रेमास्पदीभूत आत्मा सर्वतः प्रिय इत्यानन्दरूपता तत्र सिद्धा। जीवात्मनश्चाप्यात्मभूतं मूलतत्त्वं परमानन्द-रूपमित्यत्र न कोऽपि संशयस्तिष्ठेत्।

(8) अन्यच्च जागरे स्वप्ने च बाह्येनान्तरेण च प्रपञ्चेन तिरोहितस्वरूप इवायमात्मा सुषुप्तौ सर्वप्रपञ्चविनिवृत्तौ स्वरूपप्रतिष्ठ इति मन्यन्ते शास्त्राणि, अनुभूयते च तथैव। संस्कारशेषतैव तत्र मुक्ताद् विशेषः। सुषुप्तिश्चेयमानन्दरूपा सर्वत्र ख्याप्यते। उत्थितस्य सुखमहमस्वाप्समिति सौषुप्तसुखपरामर्शात्—अनुभूतस्य स्मृत्यसम्भवात्। किञ्च सुषुप्तिमिच्छन् जीवः सर्वपीडाकरपदार्थनिवृत्तये सुखकरसौरभपूर्णमृदुतमशय्यादिसम्पादनाय च यावद्विभवं सर्वोऽपि प्रवर्तते। तेन विषयानन्दमार्गेण परमानन्दरूपायां सुषुप्तौ गन्तुमिच्छतीति सुषुप्तेरानन्द-रूपतानुमीयेतैव। सा च सुषुप्तिरात्मस्वरूपस्यैवाभिव्यञ्जके आत्मानन्द एव तत्रानुभूयते, तेनापि तदात्मभूतस्य परतत्त्वस्यानन्दरूपत्वं स्पष्टं सिद्ध्यत्येव। इत्थमनेकाभिर्युक्तिभिर्मूलतत्त्वस्यानन्दापरपर्यायरसरूपता समर्थिता। अथ प्रकारान्तरेणापि व्याख्यास्यामः।

□

# सत्ताज्ञानानन्दनिर्वचनम्

सत्-चेतना (ज्ञानम्) आनन्द इति रूपत्रयेण ब्रह्मणो व्याप्तिं श्रावयन्ति श्रुतयः 'सत्यं ज्ञानमानन्दं ब्रह्म' इत्याद्याः। तत्र सत्तायाः सर्वत्रानुस्यूतत्वं सर्वैरेवाभ्युपगम्यते-अस्तीति-प्रत्यस्य सर्वत्रैव जागरूकतया सर्वस्यापि पदार्थजातस्य सद्रूपतयानुभवात्। यत्रापि किञ्चिन्नप्रतीयते तत्रापि 'नास्तीति' सत्ता नञ्बोध्याभावानुस्यूता प्रतीयत एवेति भावा-भावोभयानुगतत्वं सत्तायाः सिद्ध्यति। ज्ञानस्य च चेतनेष्वनुगतत्वं सर्वैरेव मन्यते। शास्त्रदृष्ट्या तु जडेष्वप्यनुगतत्वं सिद्ध्यति। वस्तुगत्या तु जडचेतनयोर्मौलिको भेदो नास्त्येव। जडमपि गोमयं कियन्तं कालं स्थितं चेतनवृश्चिकरूपतामापद्यते, काष्ठं चार्द्रीभवत्कृमिरूपतामापद्यते, मृदपि च कीटरूपतां गच्छति। चेतनं च प्राणिशरीरं सुषुप्ति-मूर्छा-मृत्युषु जडतां गच्छतीति। तस्माच्चेतनं ब्रह्मरूपं सर्वत्रैव व्याप्तम्, कासुचिदवस्थास्वत्यन्तमावृतं तदस्पष्टतां गच्छतीत्येव तदभावरूपां जडतां जना व्यवहरन्ति। आवरणापगमे तु पुनस्तस्य स्पष्टतायां चैतन्यमनुभूयत एवेति। अत एवायुर्वेदस्य परमाचार्यो महामान्यश्चरकः—

**"सेन्द्रियं चेतनद्रव्यं निरिन्द्रियमचेतनम्"**

इति इन्द्रियसद्भावासद्भावावेव चेतनजडयोर्लक्षणे ब्रवीति। इन्द्रियरूपेण-परिणतिश्च मृज्जलतेजोवाय्वादीनामेव भवतीति शास्त्रदृष्ट्या ब्रह्मरूपं ज्ञानं सर्वत्रैवानुस्यूतम्। किञ्च सर्वमपि पदार्थजातं ज्ञानविषयतामापद्यत एव, यदि हि ज्ञानविषयत्वं न स्यात्, तर्हि तस्य सत्वमेव कुतो व्यह्रियेत्। ज्ञानविषयता च ज्ञानात्सर्वथा भिन्नस्य दुर्वचेति वेदान्तग्रन्थेषु सपरिकरं साधितम्। विषय-संवलितमेव च ज्ञानस्वरूपं नैयायिका अभ्युपगच्छन्ति 'घटोऽयम्' 'पटोऽयम्' इत्यादिरीत्यैव ज्ञानस्वरूपस्य तैरभिनयनात्। ततश्च सर्वेपि पदार्था विषयरूपतया ज्ञानस्वरूपं प्रविशन्तीति स्वरूपप्रविष्टेषु तेषु ज्ञानस्यानुस्यूतता-व्याप्तता, निराबाधैव। किं च ज्ञानस्य तद्विषयस्य च स्वरूपसम्बन्धविशेष इत्यभ्युपगम्यते। ततश्च ज्ञानस्वरूपभूता विषयस्वरूपभूता वा विषयता ज्ञान-विषययोः सम्बन्धः, अस्वरूपे च स्वरूपसम्बन्धः कथं स्यादिति विषयस्य ज्ञानस्वरूपता तैरप्यभिव्यज्यते।

यत्तु विव्रियते- केवलज्ञानस्वरूपत्वे घटपटयोः समूहालम्बनज्ञाने घटगता पटगता च विषयता एकैव स्यात्। ज्ञानस्यैकत्वादिति। तथा च घटत्वावच्छिन्नपटत्वावच्छिन्न-विषयतयोरैक्यापत्तिः। केवलविषयस्वरूपत्वे तु स घट इति ज्ञाने सत्तांश-परित्यागेन घट इति ज्ञाने च विषयो घट एक एवेति विषयताप्यैकैव प्रसक्ता, तथा च तद्घटज्ञानीयविषयताया घटज्ञानीय-विषयतायाश्चैक्यं प्रसक्तम्। एवं नीलो घट इति ज्ञानेऽपि नीलगुणाश्रयस्य घटत्वजात्याश्रयस्य च विषयस्यैकत्वान्नीलविषयता घटविषयता चैका प्रसज्येत। तस्माद् ज्ञानविषयोभयरूपत्वं विषयताया अभ्युपगन्तव्यम्। विषयतात्वमुभयवृत्तीति यावत्। तदेतद् वागाडम्बरमात्रम्। ज्ञान-विषययोरुभयोः संमिलितयोः पदार्थान्तर-त्वाभावेन उभयरूपतायामपि ज्ञानरूपता, विषयरूपताचेत्युभयमपि सिद्धमिति द्विविधस्यापि दोषस्य पुनरपि प्रसक्तिः। द्वित्वादिवदुभयत्रैवपर्याप्नोति विषयता नैकैकस्मिन्नित्यपि न शक्यते वक्तुम्। एको न द्वावितिवद् घटज्ञानस्य घटो न विषय इति व्यवहारापत्तेः। समाधीयतां वा यथाकथञ्चित्। उभयस्य मिलितस्य विषयतारूपत्वे तस्याश्च स्वरूपसम्बन्धत्वे मिलितत्वं स्वरूपं सिद्धमेवेति विषयस्य पार्थक्यं वाङ्मात्रमेव। तस्माद्विषयो ज्ञानरूपमेवेति भङ्ग्या प्रतिपादितं भवति। विषयस्य ज्ञानात्पार्थक्ये तत्सम्बन्धो नोपपद्यते इति च सुस्पष्टं भवति। ततश्च सर्वस्यापि ज्ञानविषयत्वेन ज्ञानरूपत्वाद् ज्ञानस्य व्यापकत्वं सुस्पष्टम्। प्रकाशरूपोंऽश इह मुख्यं ज्ञानम्। तच्च विषयेष्वनुस्यूतमित्यग्रे प्रतिपादयिष्यामः। तदित्थं ज्ञानस्यापि सर्वपदार्थव्याप्तिरुपपादिता।

एवमानन्दोऽपि सर्वत्रानुस्यूतः। प्रियता हि नामानन्दस्य रूपम्, इति प्रागुपपादितम्। प्रियता चेयं सर्वत्रैवानुस्यूता। देशकालपात्रविशेषसम्बन्धेन प्रियतायाः सर्वत्रैवान्वयात्। उष्णं वस्तु ग्रीष्मे प्रियत्वाभाववदपि शीतकाले प्रियं भवति। शीतप्रधाने च देशे सदैव तत् प्रियं भवति। अस्माकमप्रियमपि च व्यक्त्यन्तरस्य प्रियं भवति। मनुष्यमात्रस्याप्रियमपि कण्टकादि क्रमेलकादीनां प्रियं भवति। मनुष्यमात्रस्यात्यर्थमुद्वेजकमपि च पूयनरकादि तन्निष्ठानां कृमीणां शूकरप्रभृतीनां चात्यन्तं प्रियं भवतीत्येवं विचार्यमाणे नास्त्येव तद्वस्तु, यत्कस्यापि प्रियं न स्यात्। ततश्च प्रियतायाः केवलान्वयित्वे आनन्दास्यापि सर्वत्रानुगतिः सिद्धैव। नन्वस्तु आनन्दविषयता आनन्दजनकता वा देशकालपात्रभेदेन कथञ्चित्सर्वत्र सिद्धा, आनन्दाधिकरणता तु न सर्वत्र वक्तुं शक्या, तस्याः केवलमात्मन्येव सत्वात्। जडेषु आनन्दानुभवाभावादिति चेदनुपदं ज्ञानप्रकरणोक्तरीत्या विषयता

नाम नातिरिच्यते स्वरूपात्। यो ह्यानन्दस्वरूपानुप्रविष्टो न स्यात्, तस्यानन्द-विषयतापि नैव संभवेत्। स्वरूपसम्बन्धविशेष एव विषयतेति बाह्यैरप्यनुमतत्वात्। ननु ते ते पदार्था आनन्दजनका, न तु आनन्दविषया इति चेद् आनन्दस्य वेदान्ते नित्यतायाः स्वीकृतत्वेन तज्जनकता दूरापास्तैव। सर्वत्र व्याप्त एवान्द आवरण-भङ्गेन प्रतीयत इति व्याख्यातव्यमग्रे। तदित्थं सत्ताज्ञानानन्दानां सर्वत्रानुगतत्वे सिद्धे यदनुगतं तत्कारणम् यत्रत्वनुगतं तत्कार्यम्। अनुगतं सुवर्णं स्वानुगम्यानां कटककुण्डलकेयूरादीनां कारणम् अनुगतामृच्च स्वानुगम्यानां घटकुड्यशरावादीनां कारणमिति नियमस्य सर्वत्र दर्शनेन सर्वत्रानुगतानां सत्ताज्ञानानन्दानां सर्वकारणत्वरूपमात्मत्वमपि सिद्धमिति वेदान्तिनां प्रक्रिया। ते चामी सत्ताज्ञानानन्दाः कयाचिद् दृष्ट्या परस्परं भिद्यन्ते। सत्ता ज्ञानबोध्या, ज्ञानन्तु बोधकम् आनन्दस्तु ताभ्यां पृथगेव। सुखापरपर्याय इति पृथग-पृथगनुभवात्। पौर्वापर्येणाप्येतानि भिद्यन्ते। सत्तां हि द्रव्यगुणकर्मस्वनुस्यूतामेकां नित्यां तार्किका आतिष्ठन्ते। दर्शनान्तराणि तु तादृशपदार्थान्तरस्वीकारणमप्रामाणिकं मन्यमानानि अर्थक्रिया-कारितामेव सत्तामभ्युपगच्छन्ति, तद्रीत्या क्रियाया जनकीभूता तत्पूर्वावस्थारूपा शक्तिपदाभिधेया सत्ता सिद्ध्यति। यस्मिन् यस्मिन् पदार्थे यावत्कार्यकरणसामर्थ्यम्, तत्सर्वमेव बुद्ध्या गृह्यमाणं तस्य पदार्थस्य सत्तेति संवलिताः शक्तय एव सत्ता निर्वक्तुं शक्यते। बलपराक्रमादीनि च तद्रूपाण्येव। ज्ञानन्तु तत्पश्चात्कालिकस्त-दनुभवः। पूर्वं किञ्चित् कार्यं दृष्ट्वा तस्य तस्य पदार्थस्य सत्वं ज्ञायत इति। ज्ञानानन्तरं च तस्य तस्य पदार्थस्यानुकूलत्वं प्रतिभासते, ततो मनो विकासो नामानन्द उदेतीति पूर्वापरीभावात्पृथक्त्वमेव तेषां स्वीकर्तव्यं भवति। किञ्च विभिन्नत्वेन विचारविषयतामापद्यामानेष्वपि वस्तुषु सत्ता एका अपृथग्भूतैव व्यवह्रियते, यथा एक एवोष्णीषोऽस्मदग्रे तिष्ठति-तत्र विचारेण अनेकैरल्पैर्वसन-खण्डैरयं निर्मित इति तानि वसनखण्डान्यपि समवायिकारणरूपाणि तत्रानुप्रविष्टानि प्रतीयन्ते, तानि च वसनखण्डानि तन्तुनिर्मितानीति तन्तवोऽपि उपादानतया तत्रानुप्रविष्टाः स्वीकार्या एव, ते तन्तवश्च तूलादुत्पन्ना इति तूलस्य तत्रानुगतत्वं कः प्रतिषेधेत, तूलेप्यनुगतं कार्पासं तत्राप्युनुगतां मृदं को नाभ्युपगच्छेत्। तदेवं पृथक् पृथक् पदार्थविषयकाणि पृथक् पृथक् ज्ञानानि तत्र जाग्रति। किन्तु एकमिदमुष्णीषमस्तीति तस्य सत्तामेकामेव सर्वोऽपि व्यवहरन्ति। एकैव च प्रावरणरूपा क्रिया तेन क्रियत इति सत्तायां नास्ति भेदः, तेन सत्ता एका, ज्ञानन्त्वनेकमेकत्रेति संख्याभेदस्तयोः सिद्धः। बहूनान्तु पृथक्-पृथक् वयवानां

हस्तपादसास्नालाङ्गूलस्तनादीनां समूहः एका गौः। अर्थक्रियाकारित्वं अपि च पृथक् पृथगवयवेष्वप्यस्ति, चालनस्थानावरोधप्रतीघातादीनां पृथगवयवेष्वपि दर्शनात्। केशादीनां चापि पृथगवयवैरुत्पाद्यमानत्वात्, तदित्थं सत्ताभेदेऽपि गौरित्येक एव प्रत्ययस्तत्र भवतीति संख्याभेदः स्पष्टः। एवं कार्यभेदोपि प्रतीयते। सन्ति केचन पदार्थ अस्ति (सत्ता) सिद्धाः, केचिद्भाति (ज्ञान) सिद्धाः, केचित्तूभयसिद्धा इति वेदान्तिभिर्व्याख्यायमान आत्मा ब्रह्मरूपः केवलमस्तिसिद्धः, "अस्तीत्येवोपलब्धव्यः" इति सत्तामेव श्रावयति श्रुतिः, न तु केनापि तत् ज्ञातुं शक्यते–

**"विज्ञातारं वा अरे केन विजानीयात्"**

इति तस्य ज्ञानविषयतायाः सयुक्तिप्रतिषेधात्। गिरिगुहादिषु निगूढाश्च लताद्या ये न केनापि ज्ञायन्ते, अनन्तरं कार्याणि तेषां दृश्यन्ते, ते केवलमस्ति सिद्धाः, सर्वत्र निगूढमनुप्रविष्टा प्रकाशशक्तिर्न केनापि ज्ञायते, कार्यन्तु प्रकाशादिकं तस्या आलोक्यते इति स्वसत्ताकाले केवलमस्तिसिद्धा इमे पदार्था अतिक्रान्तसत्ताः पश्चादनुमीयन्ते। द्वित्वत्रित्वाद्याः संख्याः दीर्घलघुत्वादिपरस्परापेक्षं परिमाणम्, देशकालाद्याः, सामान्या विशेषाश्च सर्वेषां प्रतीतिसिद्धा अपि न सत्तां दधति, अर्थक्रियाकारितायास्तेष्वदर्शनात्-पार्थक्येनाप्रतीतेश्च। तार्किकास्तु यत्तेषां सत्तासाधनायापि प्रयतन्ते सोऽयमपदार्थकल्पनाप्रयासस्तेषां जलताडनादि-वदुपहासप्रयोजक एवेत्यास्तां तावत्। घटपटाद्याः पदार्थास्तूभयसिद्धा, ते हि किञ्चित् कुर्वन्ति, ज्ञायन्ते चेति। इत्थं सत्ताज्ञानयोर्भेदः सिध्यति। ज्ञातायामपि सत्तायां क्वचिदानन्दो भवति, क्वचिच्च न भवतीति आनन्दस्यापि भेदः सिद्ध्यत्येव। प्रकारान्तरेण तु दृष्टिभेदे सर्वेषामेषामभेद एवं सिद्ध्यति। ज्ञानविषयो हि ज्ञानात् पृथक् न भवतीति प्राक् प्रत्यपीपदाम, ज्ञानविषयश्च सर्वत्र सत्तैव। तत्कथं सा ज्ञानात् पृथक् स्यात्। शक्तिरेव सत्तेति सत्यभ्युपगमे ज्ञानमप्येका शक्तिरिति तस्य सत्तान्तर्भावं कथं नेष्येत? व्यवहारेपि नास्तिविशेषः तेनानेकधा बहुधा वा व्यवहारे सत्ताया अपि बहुत्वमेकत्वं वा प्रतिपद्येतैव। उष्णीषे विचार्यमाणे यान्यनेकानि ज्ञानान्याख्यातानि, तानि वस्त्रतन्तु तूलादीनां सत्तामेव गोचरयन्ति इति ज्ञानभेदे विषयभूतायाः सत्तायाः कथं न भेदः सिद्ध्येत्। गौरित्येकमेव ज्ञानमिति सत्यम्, परं विभिन्नानामवयवानामपि पृथक्-पृथक् ज्ञानमस्त्येवेति कुतः संख्याभेदः। यत्तु केचित्पदार्थाः केवलमस्तिसिद्धाः केचिच्च केवलभातिसिद्धा इत्युपपादितम् तत्र स्वयमस्तिर्भातिसिद्ध एव, सामान्यस्य भवद्भिर्भातिसिद्धत्वाभ्युपगमात्। सत्तायाश्च

सामान्यरूपत्वात्। भातिपदवाच्यं ज्ञानं च स्वयं सत्तासिद्धम्। तस्यैव सर्वव्यवहारकारणत्वात्, ततश्च स्वयमस्तिर्यदा भातिसिद्धः, स्वयं भातिश्चास्ति सिद्धः, तर्हि तत्साध्यान्युभयसिद्धान्येवेति कुत इमे सत्ता ज्ञानेऽभिधेयाताम्। पूर्वपश्चाद्भाव आश्रयाश्रयिभावश्च सर्वोपि व्यवहारकल्पितो न मौलिकं भेदमाधातुमलम्। तस्मात्सूक्ष्मदृष्ट्या विचारे सत्ता ज्ञानं वा न परस्परं भिद्येते, यत् सत् तदेव ज्ञायते यच्च ज्ञायते तदेव सदिति सत्ताज्ञानयोः परस्परं साध्यसाधनभावव्यवहारेणान्ततः एकत्व एव पर्यवसानम्। एवमानन्दोऽपि नाभ्यां भिद्यते। आनन्दोप्यनुभूयते, अनुभवविषयश्च नानुभवात् पृथगित्यसकृदुक्तमित्यनुभवापरपर्यायज्ञानरूप एवानन्दः। अस्तित्वेन चानन्दः प्रतीयते नाभावत्वेनेति सत्ताया अपि स न पृथक्। अस्त्यस्माकं संपदिति संपदः सत्तां वयमनुभवामः। तेनानुभवेनैव चानन्दमनुभवाम इति वस्तुसत्तैवानन्दः, तदनुभव एव वा आनन्दः, अविज्ञातायां संपदः सत्तायामानन्दानुभवादिति त्रयस्याभेद एव सिद्ध्यति। पूर्वापरीभावोप्येषामनियतः, पूर्वमुत्पन्नो गृहीतसत्ताको घटः ज्ञान-विषयतामेति, ततस्तदर्थिनामानन्दः। निर्मातुर्ज्ञानाविषयतां पूर्वमेवापन्नो घटस्तेनोत्पादितः सत्तां गृह्णाति, नह्यजानन् कश्चित् कञ्चित्पदार्थमुत्पादयति "विनायकं प्रकुर्वाणो रचयामास वानरम्" इति न्यायापत्तेः। ततश्च पूर्वं ज्ञानम्, ततः सत्ता, तत आनन्द इत्यपि क्रमः। स्त्रीपुंसयोरानन्दादेव तु बालस्योत्पत्तिर्जायते, ततस्तज्ज्ञानमित्यानन्दपूर्वोऽपि दृश्यते क्रमः। सत्ता नाम जीवनम्, न च हर्षापरपर्यायस्यानन्दस्य लेशेनापि विनाकृतं जीवनं संभवतीति उक्तपूर्वम्। बुभुक्षितस्यान्नादिग्रहणेन तृप्तिर्जायते। सेयं तृप्तिरानन्द एव, ततः सत्तारूपं जीवनमिति रसस्य सत्ताजनकता स्फुटमनुभूयते। अनुभवविशेष एवानन्दः, विषयता सम्बन्धेनानुभवे प्रविष्ट आनन्दोऽपि सन्निति सत्ताविशेष एव, सति सत्व एवानुभव इति नाप्रकृष्टं शक्यतेऽनुभवः सत्तायाः, ज्ञानमन्तरेण न सिद्ध्यति सत्तेति अन्योन्यजनका अन्योन्यमिथुना अन्योन्याविनाभूताश्चैते न कथमपि पार्थक्येन निर्वक्तुं शक्यन्ते। तस्मात्त्रयस्यैकं संमुग्धं भेदप्रतिभासरहितं रूपमात्मा, विशकलितानि च रूपाणि परस्पराविनाभावेन स्थितानि त्रीणीत्येष सारः। किं च लोके सत्ता ज्ञानं वा नावलम्बमन्तरेण क्वापि दृष्टम्, कस्य सत्ता, कस्य वा ज्ञानमिति जायत एव श्रोतुराकाङ्क्षा, तदनयोरवलम्बः कश्चित्कल्प्य एव, तत्सर्वावलम्बभूतो भूमा रस एवावलम्ब इत्येव वक्तव्यं स्यात्। वस्तुतस्तु रसोऽयं सत्ता ज्ञानयोरप्यनुस्यूतः, ततो ह्यस्माकं सत्तापि सदा प्रिया, सर्वार्थ-संग्रहे सततं प्राणिनः प्रवृत्तिदर्शनात्। ज्ञानमपि च सदा प्रियम्, अपरिज्ञातं ज्ञातुं सदैव प्रयत्नदर्शनात्।

अर्थः प्रियो नोस्ति सदार्थलिप्सा।
ज्ञानं प्रियं नोस्ति सदा बुभुत्सा॥

इति हि संशयोच्छेदवादे प्रतिपादितम्। अर्थसत्तां स्वकीयामविदंश्च जनो दुःखं याति, बुभुत्सायामबोधे चापि दुःखं याति। दुःखविरोधी चानन्द इति सत्तायां ज्ञाने चानन्दान्वयः स्पष्टमनुभवसिद्धः। किं चारण्यसंग्रामादौ नास्ति मे कश्चित्सहाय इति सहायकसत्तामविदन् जनो भयं याति। सत्यपि सहायके यदि तस्य ज्ञानं नास्ति, तदापि भयं याति असत्यपि तु सहायके यदि कश्चित्तदवष्टभ्य सन्ति बहवस्ते सहायाः इति बोधयेत्—तदा तस्य भयं निवर्तते। भयमिदं दुःखम् निर्भयता च सुखमिति सत्तायाः ज्ञानस्य च निर्भयता प्रयोजकत्वेनाप्यानन्दान्वयस्तत्र स्फुटीभवति। ततश्च यत्र यदनुस्यूतं तस्य तत्कारणमिति पूर्वोक्तेन न्यायेन प्रियताप्रयोजक आनन्दापरपर्यायो रसः सत्ताज्ञानयोरपि कारणमिति मुख्यमात्मत्वं तस्य सम्यगेव व्याख्यायते। एवं स्वस्य स्वीयस्य वस्तुनो वा सत्तां विदन् जनो हर्षं याति, तत्र सत्ताज्ञाने समाविश्य लीना भवति, न ततः पृथक् विद्यते। ज्ञानं चानन्दे समाविश्य लीनं भवति आनन्दमात्रं तु अन्ते परिशिष्यते। तस्माद्यस्य यत्राप्ययः, तस्य तत्कारणमित्यपि रसस्य सत्ताज्ञानयोः कारणता सिद्धा भवति।

इदन्तु स्मर्तव्यम्—सर्वात्रान्वितत्वेन य इमे सत्ताज्ञानानन्दा आत्मरूपतया व्याख्याताः, त इमे लौकिकसत्ताज्ञानानन्देभ्यो विलक्षणा एव। लोके हि सत्ता नाम सामान्यं निर्विशेषं न क्वापि दृष्टम्, न निर्विशेषं सामान्यं न च सामान्याविनाभूतो विशेष इति लौकिकानामनुभवात्। आश्रयनिष्ठैव लोके सत्ता गृह्यते, विशेषभूता द्रव्यादय एवास्या आश्रया इति यावत्। इयन्तु मूलतत्त्वरूपतया व्याख्यायमाना सत्ता निर्विशेषैव, विशेषस्य तस्यामवस्थायामननुदयात्। लोके हि निराश्रया सत्ता न क्वापि दृश्यते, इयन्तु निराश्रयैवेति। तस्माल्लोकविलक्षणा अलौकिकीयं सत्ता। ज्ञानमपि च लोके विषयप्रकाशलक्षणं निर्विषयं न क्वापि दृष्टम्। न च कर्तृभूताश्रयमन्तरेण, अहमिदं जानामीत्याश्रयविषयसहकृतस्यैव तस्य भानात्। इदन्तु मूलतया ख्याप्यमानं निर्विषयमेव, विषयस्य प्रकाश्यस्य स्वभिन्नस्य तदानीमभावात्। न च तदानीं तस्याश्रयोपि कश्चिदन्योस्ति। लोके हि सविकल्पकमेवज्ञानं ज्ञानतया परिचिन्वन्ति लोकाः, इदन्तु निर्विकल्पकमिति यावत्। निर्विकल्पकमपि केवलं प्रकारता विशेष्यतानुभवशून्यं यादृशं तार्किका अभ्युपगच्छन्ति, नेदं तादृशम्-तस्य सविषयकत्वात्-अस्य च सर्वथा विषयस्पर्श-

शून्यत्वादितीदमप्यलौकिकम्। एवमानन्दोऽपि। अन्तःकरणावच्छिन्नचैतन्य-विकासरूपः समृद्ध्यानन्द एव लोकैरानन्दनाम्ना परिचीयते, अयं तु न तादृशः, किन्तु अक्षोभापरपर्यायः शान्तिरूपः, अखण्डस्य स्वगतभेदशून्यस्य मूलतत्त्वस्य विकासासंभवात्। शान्त्यानन्दः समृद्ध्यानन्द इति द्विविध आनन्दः। समृद्ध्यानन्दो लौकिकः, अयं मूलतत्त्व-रूपस्तु शान्त्यानन्द इत्ययमप्यलौकिक एव। समृद्ध्यानन्द-सविकल्पज्ञान- सविशेषसामान्यरूपानन्दसत्ता लोके प्रसिद्धा शुक्ला इति आख्यायन्ते, प्रकटास्ते इति यावत्। मूलतत्त्वरूपास्तु शान्त्यानन्द-निर्विकल्पकज्ञाननिर्विशेष-सामान्यरूपा कृष्णाः, निगूढा इति यावत्। नन्वास्तां निगूत्वं प्रकटत्वं वा दूरे, सत्ताज्ञानानन्दशब्दा एव तु नात्रोपद्यन्ते-सतो भावो हि सत्तेति निर्ब्रुवन्ति वैयाकरणाः, भावो नाम धर्मः, सति कस्मिंश्चिदाश्रये तत्र स्थितस्यैव सद्भावत्वात् सत्तापद-व्यवहार्यत्वं स्यात् न तु निराश्रयस्य। ज्ञानमप्यवबोधरूपं बोध्यं बिना निर्विषयं कथं ज्ञानपदेन व्यवहार्यम्। किन्निष्ठश्चावबोध इति निराश्रयमपि न ज्ञानशब्दो भजति। एवमानन्दशब्देपि नदिधातुः 'टुनदि समृद्धौ' इति श्रीपाणिनिना निरुक्तः समृद्ध्यभावे कथं प्रसरेत्। तस्मान्नैते शब्दास्तत्र युज्यन्त इति चेत्, सत्यमिदम्। न तत्र कोऽपि शब्दो युज्यते इति प्रागेवावोचाम। न तु शब्दप्रयोगमन्तरेण निरूपणादिः कोऽपि व्यवहारः संभवतीति कथंचित् कांश्चिच्छब्दान् प्रयुञ्जमहे। एवमौपचारिके शब्दप्रयोगे लोके ये सत्ताज्ञानानन्द-पदाभिधेया अर्थाः, तन्मूलभूतं तल्लक्षणकं सर्वादिभूतं मूलतत्त्वमिदानीं, प्रत्यभिज्ञायत इति ते शब्दास्तत्र प्रयुज्यन्ते। सृष्टेः पूर्वं न तत्र किमपि लक्षणं शक्यं वक्तुम्, निर्धर्मकत्वात्, इदानीन्तु सृष्ट्या परिचिता वयं यानि लक्षणानि तत्र तत्र पश्यामः, तान्येव द्वारीकृत्य मूलतत्त्वस्यानु-सन्धानं कुर्वाणास्तथैव व्याचक्ष्महे-नास्त्यन्य उपाय इति। तानि च लक्षणानि तदा निगूढानि, सृष्टौ तु प्रकाशं गतानीत्यस्माकमभिप्रायः।

तत्र सूक्ष्मदृष्ट्या विचारे क्रियमाणे निगूढान्येव मुख्यानि, प्रकटीभूतानि शुक्लपदाभिधेयानि तु योगजानीति स्पष्टं प्रतिभासेत।

तथा हि-सत्तेव प्रथमं परीक्ष्यताम्। सत्ता नाम सामान्यम्। स एव भूमा इति श्रुतिषु ख्याप्यते। स्वगतेन केनचित् विशेषेण चिह्नादिना पृथक्कृत्य ज्ञायमाना घटव्यक्तिः यदा तं विशेषमपह्नुत्य ज्ञायते-तदा घटसामान्ये सा प्रविशति, विशेषरूपं तद्व्यक्तित्वं तदा न भासते, घटसामान्यमेव प्रतीयत इति तद्विषयिणी बुद्धिर्विस्तरं गता। तदुक्तं चरकमहर्षिणा–

**सर्वदा सर्वभावानां सामान्यं वृद्धिकारणम्,**
**ह्रासहेतुविशेषश्च, इति**

तदनु घटत्वधर्मोऽपि मृत्सामान्यापेक्षया विशेषरूपं व्यक्तिभूतं गौणीकृत्य शरावकुड्यादि-सामान्येन यदा विभाव्यते तदा मृत्सामान्यं प्रतीयत इति पुनर्विस्तृता बुद्धिः। मृदमपि व्यक्तित्वेन परिकल्प्य प्रस्तरकाष्ठादिसाधारण्येन दर्शने पृथिवीसामान्ये मृदादिकं सर्वं प्रविष्टम्। एवं पृथिवी द्रव्यसामान्ये प्रवेशिता, द्रव्यमपि च क्रमेण पदार्थापरपर्यायसत्सामान्ये प्रवेशितं केवलं सद्रूपमेव भासते, तदेवान्तिमं निर्विशेषं सामान्यं सत्ता नाम, नेतः परं सामान्यं किञ्चिदस्ति, सदतिरिक्तस्यासत्पदवाच्यत्वात्, सतस्तत्र तिरोभावे च सर्वासत्वप्रसङ्गात्। अतएव कुत्रापि विलयासंभवादिदं नित्यमपरिच्छिन्नं च श्रुत्या 'भूमा' (सर्वापेक्षया बहुत्वम्) इति पदेन व्यपदिष्टम्। अपरिच्छिन्नस्य विनाशितायाः क्वाप्यदर्शनात्, विनाशहेतोश्च संभावनाभावात्। अस्यैवापरिच्छिन्नस्य सामान्यस्य—

**'नघटाभावसामान्यनित्यत्वाद्' (न्या. सू. 2/2/14)।**

इत्यादौ नित्यत्वं भगवता गौतमेनोक्तम्।

इदमेव च भगवता कणादेन वैशेषिकदर्शनेऽप्युक्तम्—

**'सामान्यं विशेष इति बुद्ध्यपेक्षम्'**

इति विभिन्नत्वेन ज्ञानमपह्नुत्य समानतया बुद्धिप्रसारे सामान्यं भवति, सामान्ये कञ्चिद्धर्मादिकं विशेषं परिकल्प्यते पृथक्त्वबुद्धौ तु विशेष एव मुख्यतया भासते इति बुद्धिरेव सामान्यरूपेण विशेषरूपेण वा तं तमर्थं बोधयतीति सूत्रतात्पर्यम्। नवीना नैयायिकास्तु द्रव्यादेभ्यः पृथग्भूतं तद्वृत्ति च सामान्यं विशेषं च पदार्थान्तरं परिकल्प्य तस्यानन्तविधतां व्याचक्षाणाः केवलं बालानां बुद्ध्युपरोहाय प्रयतन्ते। दर्शनान्तरेषु बौद्धादिभिर्भर्त्स्यन्ते चेत्यास्तां तावत्।

एवं जगति पदार्थेषु बुद्धिप्रसरेण सामान्यविशेषरूपता प्रदर्शिता। अयमेव तु मूलतत्त्वादुत्पत्तेः प्रलयस्य च क्रमः।

निर्विशेषमपरिच्छिन्नं सामान्यं मुख्यं मूलम्। सति तु परिच्छेदे विशेषा उत्पद्यन्ते। परिच्छेदश्चायं मायाकृत इत्यनुपदं वैज्ञानिकप्रक्रियया शक्तिनिरूपणे व्याख्यास्यते। परिच्छेद एव विशेष इति व्यक्तिरिति वा व्यवहारविषयतां गच्छति। सामान्यमेव हि मायाकृतेन परिच्छेदेन विशेषतां गच्छतीति सामान्यादेव विशेषाः सर्वे प्रादुर्भवन्ति निष्क्राम्यन्तीति यावत्। सति च विशेषप्रादुर्भावे तत्रानुगतस्य

सामान्यस्य तस्य विशेषस्य चाश्रयाश्रयिभावतो व्यवहारः प्रकल्प्यते लोकैः। अनुस्यूतं सामान्यमाश्रितमिति, विशेषश्चाश्रयभूतः। तत्र सामान्यस्योपलम्भात्। मृत्सुवर्णादि सामान्यं घटकटकादिष्वेवोपलभ्यत इति दर्शनात्। तदिदमुक्तमात्मन आकाशः सम्भूत इति श्रुतेस्तात्पर्यं प्रकटतया श्रीविद्यारण्यस्वामिना पञ्चदश्याम्—

**सतो व्योमत्वमापन्नं व्योम्नः सत्तां तु लौकिकाः।**
**तार्किकाश्चावगच्छन्ति मायाया उचितं हि तत्॥**

**(पञ्चदशी 2-64)**

सद्रूपमन्तिमं सामान्यं मायया व्योमरूपविशेषतां गतम्। लौकिकास्तार्किकाश्च व्यत्ययेन सत्ताया आश्रितत्वं व्योम्नश्चाश्रयत्वं माययैव व्यामोहिता मन्यन्त इति। विशेषप्रादुर्भावे तद्वृत्तितां गतस्य धर्मधर्मिभावापन्नस्य सत एव विशेषेण वाचकेन सत्ताशब्देन व्यवहारः प्रवर्तते। स समानेषु बहुषु वर्तते इति सामान्यपदव्यवहारश्च। मूलतत्त्वे तु धर्मधर्मिभावासंभवान्नैते शब्दा उपयुज्यन्ते, परतः प्रवर्तमानैरेव शब्दैर्व्यवहारनिर्वाहाय मूलतत्त्वमपि ख्याप्यत इति भूयोभूयोऽनुसन्धेयम्। सत्पदमपि तत्र न लौकिक्या प्रक्रियया सत्ताश्रयत्वेन, तत्र धर्मधर्मिभावाभावस्योक्तत्वात्-नाप्यर्थक्रियाकारित्वे, अर्थक्रियादेरुत्पत्स्यमानस्य तदानीमभावात्. अपि तु अलीकभूतासद्व्यावृत्तिमेव बोधयितुं सत्पदं तत्र प्रयुज्यते श्रुत्यादिभिः। परस्तादुत्पन्ना विशेषसहकृता सामान्यविशेषरूपाः सत्ताभेदा अनित्या एव भवन्ति। परिच्छिन्नस्य नित्यत्वासंभवात्। **'अणोरणीयान् महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्'** इति श्रुत्या निर्दिष्टोऽन्तिमो विशेषणोऽणिमानाम्, सोऽपि नित्यः, न च स भूम्नोतिरिच्यते अपरिच्छिन्नत्वात्, बुद्ध्या ग्रहीतुमशक्यत्वाच्च। यथा हि परममहत्वं न परिच्छिद्यते, तथान्तिममणुत्वमपि न परिच्छेत्तुं शक्यते। परिच्छेदो हि नाम नियतदिक्कालसम्बन्धः, चाणिम्नो दिक्सम्बन्धः संभवति, दिशो दशभी रूपैर्ज्ञायमानतया दिक्सम्बद्धस्य दशावयवत्वापत्तेरिति स्पष्टं शारीरिकभाष्य-परमाणुवादखण्डनप्रकरणे। अतएव न स्वबुद्ध्या ग्रहीतुं शक्यते बुद्धेःपरिच्छिन्न-पदार्थग्रहणस्वाभाव्यादिति। यत्तु वैशेषिकैः परिच्छिन्नोऽपि परमाणुर्नित्यतयाभ्युपगत, स तेषामभ्युपगमो वेदान्तभाष्यादिषु सपरिकरं निराकृतः, गहने परिच्छिन्ने तत्त्वेऽल्पबोधान् प्रवेशयितुं प्रथमभूमिकारूप एव स मन्तव्यः। तस्माद्रस एवायमणोरणीयान्, महतश्च महीयानिति। बलकृतमेव तत्र भूमत्वमणिमत्वं वेत्यग्रे वक्ष्यते। तदित्थं शुक्ला लौकिकी सत्ता मायायोगजा व्याख्याता।

सविषयकं ज्ञानं तु स्फुटमेव विषययोगजम्। 'घटोऽयम्' 'पटोऽयम्' इति व्यवह्रियमाणे ज्ञानस्वरूपे, द्वावंशौ-घटापटाद्याः प्रकाश्या विषया एकोंऽशः, तत्प्रकाशस्त्वपरः, तत्र घटपटाद्याः विषया इमे सततं भिद्यन्ते, प्रकाशांशस्तु न कदापि भिद्यते। सर्वेषां विषयाणां प्रकाशस्यैकरूपत्वात्। तस्य भेदकाभावात्। अनुमितिशब्दादिषु निरूप्यमाणेषु ज्ञानभेदेष्वपि प्रक्रियैव भिद्यते न प्रकाशांशः। कदाचिदिन्द्रियसम्बन्धात्प्रकाशः प्रादुर्भवति, कदाचिच्च लिङ्गपरामर्शात्, कदाचिच्छब्दश्रवणेन गृहीतसम्बन्धस्य पदार्थस्य स्मरणाद्वेति प्रक्रियाभेदमात्रम्। सोऽयं प्रकाशांशो न कदापि विपर्येति, न वा तिरोधत्त इति नित्य एव। सुषुप्ति-मूर्छादिष्वपि विषयैः सहेन्द्रियाद्यसम्बन्धाद्विषया न प्रतिभासन्ते, प्रकाशस्त्वस्त्येव। तत एवोत्थितस्य 'अहं न किञ्चदवेदिषम्' 'अहं सुप्त आसम्' अहं मूर्छित आसम्' इति स्वात्मसत्तापरामर्शो दृश्यत एव। यदि हि सुषुप्तिमूर्छादिषु प्रकाशो नाभविष्यत्, कथं तर्हि उत्थितस्य परामर्शरूपं स्मरणम्। अप्रकाशितपूर्वे स्मरणस्यादर्शनात्। कथं वोत्थितस्य सामिकृतकार्यपूरणाय प्रवृत्तिः। मध्ये प्रकाशविच्छेदे तस्य प्रकाशस्य विनाशाभ्युपगमे नवोत्पन्नस्य प्रकाशस्य पूर्वकृतस्मरणासंभवात्-इति नित्यत्वमेव। इदमेव नित्यं ज्ञानमात्मत्वेन मूलतत्त्वरूपतया व्याख्यातं मुख्यम्। विषयास्तु परस्तादुत्पन्नास्तत्र निविशन्ते चापयान्ति चेति शुक्लं सविषयकं ज्ञानं योगजमनित्यं चानुसन्धेयम्। ननु प्रकाश्याभावे कस्यायं प्रकाशोऽभ्युपगम्यताम्? अप्रकाशकस्य च ज्ञानशब्देन कथं व्यवहारः? प्रमाणाधीनञ्च ज्ञानमिति सर्वत्र दृश्यते, प्रमाणं जनकं ज्ञानन्तु तज्जन्यमिति अजन्ये कथं ज्ञानव्यवहारः? इति चेत्-न प्रकाशः स्वरूपसत्तायां प्रकाश्यमपेक्षते, प्रकाश्यस्याभावेऽपि सविता प्रकाशते, प्रदीपः प्रकाशते इति संभवात्। यावन्ति प्रकाश्यानि स्वसम्बद्धानि, तानि सविता दीपो वा प्रकाशयति। अनेकानि यदि प्रकाश्यानि संनिहितानि तदाऽनेकानि प्रकाशयति, एकमेव यदि सन्निहितं तदैकमेव प्रकाशयति, न तु तावता प्रकाशस्य स्वरूपसत्ता वर्द्धते हीयते वा, तथैव यदि प्रकाश्यान्तरं नास्ति, तदा किमप्यन्यदप्रकाशयन्नपि प्रकाशः स्वरूपं प्रकाशयति इति युज्यते। यं प्रतिस्वरूपं प्रकाशयेत्, सोऽप्यन्यः कश्चिन्नास्तीति चेत् स्वरूपेण प्रकाशत इति युज्यते। अतो न प्रकाशसत्ता प्रकाश्याधीना, प्रकाशशब्दव्यवहारः प्रकाश्यं विना नोपपद्यते इति चेद्, मा नामौपपादि। शब्दव्यवहारस्यौपचारिकताया असकृदुक्तत्वात् न हि तन्मूलतत्त्वं जडवत्परप्रकाश्यमिति प्रकाश्यतानिषेध एव ज्ञानशब्देन बोध्यते। यदि हि तत्प्रकाशरूपं न स्यात्, नायं ज्ञानपदाभिधेयः

प्रकाशः क्वचिदपि जगति प्रसरेत् निर्मूलस्य कस्यापि पदार्थस्योत्पत्तेरभिव्यक्तेर्वा क्वाप्यदर्शनात्। अस्मच्छरीरे हि ये ये व्यष्टिरूपा मांसास्थिरुधिरादिपदार्था उपलभ्यन्ते तेषां सर्वेषां मूलभूताः पृथिव्यप्तेजोवाय्वादयः समष्टिरूपा ब्रह्माण्ड उपलभ्यन्त एव। मन इन्द्रियादीनामपि जनकीभूता समष्टिरूपाश्चन्द्राद्या अनुमीयन्ते, श्रूयन्ते च तदेवोच्यतेऽभियुक्तः 'यद्यदण्डे, तत्तत्पिण्डे, यद्वा पिण्डे, तदण्डे' इति ततश्च चैतन्यापरपर्यायं ज्ञानं यदिदं शरीरावच्छिन्न आत्मनि उपलभ्यते—तस्यापि मूलं समष्टिरूपं किञ्चिदस्त्येवेति तदेव समष्टिरूपं ज्ञानं मूलतत्त्वमिति ख्याप्यते। तदेवात्मेश्वरादिपदाभिधेयम्।

□

# आत्मखण्डननिरासः

ये तु लौकायतिका इदानीन्तना वा केचन विभिन्नवादनिरता वदन्ति नास्त्यात्मभूतस्य चैतन्यस्य किमपि समष्टिभूतं सजातीयं मूलम्, नापि चात्मा नाम कश्चिद् विलक्षणोऽर्थः, अपि तु संयोगजमिदं चैतन्यम्। यथा हि वर्बुरत्वचा गुडादिसंयोजनान्मदशक्तिर्जायते यथा वा चक्रोपस्थधुरादियोजनेन वहनशक्ती रथे उत्पद्यते यथा च चिरकालावस्थितेषु अपरिपक्व द्राक्षाफलादिषु उच्छूनतां गतेषु बहवः कृमयोः जायन्ते, तेषां परस्परं भक्षणप्रकृत्या च भक्षक एको महान् कृमिरुत्पद्यते। तथैव शुक्रशोणितयोर्गर्भाशयेप्यूतिभावमुच्छूनतां च गतयोः कृमय उत्पद्यन्ते, तेषां परस्परं भक्ष्यभक्षकभावेन महत्कृमिरूपमेकं शरीरं जायते इति वृथैवातिरिक्तात्मेश्वरादि कल्पनेति, तान् प्रति ब्रूमः—नैतत्सम्यक् पश्यन्ति भवन्तः। ज्ञानं स्वविषयान् सृजति, सृष्ट्वा च तान् स्वविषयतां नयतीत्यत्र बहून् दृष्टान्तान् पश्यामः। यथा हि संनिहितेषु नानापदार्थेषु द्वित्वत्रित्वादिसंख्यां ज्ञानमेवोत्पाद्य द्वयादिरूपेण तान् पदार्थान् जानाति। सम्मुखीनयोः पदार्थयोस्तुलनां कृत्वा इदं लघुः इदं दीर्घम् इदं स्थूलमेतदपेक्षयेत्यादीनि परिमाणानि ज्ञानमेवोत्पाद्य स्वविषयतां नयति, इदं द्वयं समानम्, अयन्तु विशिष्ट इति सामान्यविशेषभावो ज्ञानेनैव जन्यते। तूष्णीं स्थितस्य मनस्यपि शतशः पदार्था भासन्ते, ते ज्ञानादेव निष्क्रम्य तत्रैव प्रतीयन्त इति सर्वेषामनुभवगोचरोऽयमर्थः।

तदेतदान्तरं जगदित्युच्यते। स्वप्ने च ये दृश्यन्ते पदार्थाः, श्रूयन्ते च शब्दास्ते ज्ञानेनैव उत्पाद्यन्ते—उत्पादकान्तरस्य तत्राप्रसक्तेः। अथ यः कश्चन शिल्पी कश्चिदभिनवं पदार्थं कटककुण्डलादि वा कटचक्रादि वा आस्तरणादि वा समुत्पादयति, तं पदार्थं पूर्वं स्वज्ञाने स्थापयति। अबुद्ध्वैव यदि निर्मिमीते, तर्हि अन्यस्थानेऽन्यदेवोत्पादयति। तस्मात्पूर्वमेव स्वज्ञानस्थितमर्थं क्रियया बहिः प्रकाशयतीत्येवानुभवसिद्धमुपपत्तिसिद्धञ्च। अपूर्वपदार्थाविष्कारेऽपि तद्वस्तुस्वरूप-संघटनं ज्ञानरूपायां कल्पनायां प्रथममेव कर्त्तव्यं भवति, अन्यथा यथेष्टनियतवस्तु-निर्माणं न कदाचित्संभवेदिति शिल्प आविष्कारेऽपि वा ज्ञानस्थितमेव वस्तु बहिर्निस्सार्यत इतियावत्। इत्थं ज्ञानस्यार्थोत्पादकता शतशो दृष्टचरी। ज्ञानन्तु ज्ञानभिन्नेनार्थेनोत्पाद्यत इति न क्वापि दृष्टम्। दृष्टानुसारिण्येव च भवति सर्वत्र

कल्पनेति कथं ज्ञानस्य परत उत्पत्तिमनुजानीयाम। ननु गोमयादिषु वृश्चिकाद्युत्पत्तिदृष्टान्तेन फलादिषु कृम्युत्पत्तिदृष्टान्तेन च समर्थितैव ज्ञानस्योत्पत्तिरिति चेत्, विचार्यतां मनाक्। गोमयादिभिः फलादिभिर्वा किं नामोत्पादितम्, वृश्चिकस्य कृम्यादीनां च शरीरमेव ननु! तत्तु गोमयादिवज्जडमेव। ज्ञानं तु अस्मन्मतानुसारेण व्यापकमेव तेषु शरीरेषु अभिव्यक्तिमापेति क्व ज्ञानस्योत्पत्तिः? 'दृश्यते तु' इत्यादिना ब्रह्मसूत्रकृता भगवता बादरायणेन एतदेव कार्यकारणवैलक्षण्यं दर्शितं यद् गोमयादिषु चैतन्याभिव्यक्तिर्न भवति, वृश्चिकादिषु तु भवतीति गोमयाद्या चैतन्यस्य आयतनभावं नोपयान्ति, वृश्चिकादिशरीराणि तु उपयान्तीति। ननु ज्ञानस्य चैतन्यापरपर्यायस्याभिनवस्योत्पत्तिः क्वापि केनाप्युररीकृता। अहमेव ननूररीकरोमि, कल्पनामात्रमयमभिव्यक्तिवादः, स्फुटमनुभूयमाना ज्ञानस्योत्पत्तिरेव कुतो नाङ्गीक्रियत इति चेदवधीयतां मनाक्। उत्पन्नमिदं चैतन्यं निरवयवं स्यात्-सावयवं वा? आद्यश्चेत् पक्षस्तर्हि निरवयवस्योत्पत्तिर्न क्वापि दृष्टेत्यभिव्यक्तावेव पर्यवसानम्। सावयवमुत्पन्नं चेत्, प्रत्यवयवं चैतन्यमित्येकस्मिन्नपि शरीरेऽनेकचेतनप्रसङ्गः स चानुभवविरुद्धः ननु भोः शक्तिविशेष एव ज्ञानम्-तत्र सावयवत्वनिरवयवत्वयोर्विचार एव नोदयते, न हि शक्तावयवाः सन्ति, स्पर्शवत्सु स्थानावरोधकेषु भूतेष्वेवावयवदर्शनादिति चेद् हन्त। सोऽयं शक्तिविशेषः शरीरस्थः प्रत्यवयवमुत्पद्यते—समूहात्मके सर्वस्मिन्नेव शरीर एकैव वा शक्तिः पर्याप्नोति। भवद्भिर्दृष्टान्तीकृता मदशक्तिर्यथा मद्ये प्रत्यवयवं स्थिता, तथैव प्रत्यवयवं यदि चैतन्यरूपा शक्तिः, तर्हि बहूनां चेतनानां सर्वथा सामञ्जस्यमेव भवेदिति नियमादर्शनादवयवानां परस्परं विरोधे कदाचिदुत्पन्ने शरीरमुन्मथितमकस्मात् स्यात्-परस्परं संघर्षश्चावयवानां कदाचिदुपलभ्येत। दृश्यते तु विभिन्नानामपि शिरोवक्ष उदरादिशक्तीनां हस्तपादादीनां च सदैवानुकूला प्रवृत्तिः। उदरार्थमन्नार्जने शिरःस्थं ज्ञानं मार्गं प्रदर्शयति, उरःस्था क्रिया शक्तिश्च चेष्टां कारयति, उदरमप्यन्नेन संभृतं शिरोवक्ष आदीनाप्याययति, तत्तत्कौतुकदर्शनाय पादौ चक्षुषी स्थानान्तरं नयत, गमनव्यापृतौ च पादौ चक्षुर्मार्गं प्रदर्शयति इत्यादि। तदेतसार्वदिकं सामञ्जस्यं विभिन्नेषु चेतनेषु न क्वापि दृष्टम्। एकं कञ्चन सुस्थं स्थापयितुं बहूनामनुचराणामिव प्रवृत्तिरङ्गानामित्येव सम्यगनुभवपथमारोहति। सर्वस्मिन् शरीरेऽभिव्याप्तैकैव चैतन्यरूपा शक्तिरुत्पद्यत इति चेन्मन्यध्वे तर्हि प्रतिनियतकार्यसम्पादकत्वं न घटते। चक्षुषी केवलं पश्यत एव, श्रोत्रे तु शृणुत एव, पादौ चलत एव, हस्तौ गृहीत एवेति कुतः? एकेन शक्तिविशेषेण दत्तशक्तीनां

सर्वेषामङ्गानां सर्वकार्यकरत्वं कुतो न प्रादुर्भवेत्। विभिन्नेष्वङ्गेषु विभिन्नाः शक्तयश्चैतन्येनाविर्भाव्यन्त इति चेद्, वामेन चक्षुषा दृष्टं वस्तु दक्षिणचक्षुर्न प्रत्यभिजानीयात्—तदेवेदमिति। पूर्वसंस्कारस्य तत्राभावात्। चक्षुषा दृष्टं च त्वगङ्गं प्रत्यभिजानीयात्—यदेव दूराद् दृष्टं तदेव स्पृशामीति। नष्टे चानुभवितरि तस्मिन् तस्मिन्नङ्गे तेनैव सह तज्ज्ञानसंस्कारस्यापि नष्टत्वादनन्तरं पूर्वदृष्टस्मरणं न स्यात्-अन्धः पूर्वदृष्टं रूपं न स्मरेत्, बधिरस्य शब्दस्मरणं न स्यात्, पङ्गुः पूर्वानुष्ठितं चलनं न स्मरेदित्यादि।

एकस्मिन् कस्मिंश्चिदवयवे भौतिक एव सर्वे संस्काराः संहत्य तिष्ठन्ति तैः स्मरणं जायते इति चेद् अवयवान्तरैरनुभूतस्य संस्कारा अवयवान्तरे तिष्ठेयुरिति नैतद्युक्तिसिद्धम्। किं च शरीरस्य भौतिकाः सर्वेप्यवयवाः कालविशेषेण परिवर्तन्त इति शरीरविज्ञानगवषेकै द्राक्तरैः सुसमर्थितोऽयं पक्षः, ततश्च संस्काराधारः कश्चिद् अपरिवर्तनशीलो नित्य एवास्थेयः स्यादिति नित्यज्ञानसिद्धिः। ननु रोगविशेषेण सर्वस्यापि पूर्वानुमतस्य विस्मृतिरपि दृश्यते, सा ज्ञान नित्यत्ववादिनां भवतां मते कथमुपपद्यते इति चेत्। यथेन्द्रियाणि बाह्यार्थज्ञानेऽभिव्यक्तौ द्वारभूतानि, तथा मनः स्मृत्यादौ द्वारभूतमिति मनसि विकृते स्मृतिर्नोत्पद्यते, विकारापगमे तु मनसाद्वारमूलेन पुनराविर्भवति स्मृतिरूपं ज्ञानमिति न मम काचिदनुपपत्तिः। यदप्याधुनिका भौतिकविज्ञानकुशला आतिष्ठन्ते-शिरसि ऊर्ध्वभागे वर्तन्तेऽनन्ताः कणाः (यदिदमार्यशास्त्रेषु सहस्त्रदलं कमलमित्यभिधीयते, प्रत्येकं कणाश्च तद्दलानीत्यमिधीयन्ते) तेष्वेकैकस्यापि ज्वलनमेकैकं ज्ञानमुच्यते इति। तेषां मते तु एकैकस्य ज्ञानस्य ज्ञानान्तरवार्तानभिज्ञत्वाद् द्वयोर्ज्ञानियोः सन्तोलनम् (पूर्वं मयेदमन्यथा ज्ञातम्, इदानीं तु सम्यग् जानामि इत्यादि) प्रत्यभिज्ञा (तदेवेदमित्यादि) स्मृतिश्चेति सर्वमस्तमियात्, एषां विलोपे च सांसारिकाः सर्व एव व्यवहारा विलुप्येरन्, स्मृतिप्रत्यभिज्ञाधीनत्वात् सर्वव्यवहाराणाम्। नन स्मृतिरप्येकं ज्ञानम्, तदप्येकेन कणेन प्रज्वालितेनाविर्भवतीति चेत्, विनैवकारणं कथमाविर्भवेत्, पूर्वदृष्टस्य संस्कारस्तिष्ठति, तेन कालान्तरे सत्युद्बोधके प्रादुर्भवति स्मृतिः। भवतां तु अनुभावितृदलं तदेव निर्वाणम्, न च तस्य संस्कारोन्यत्राहितः इति कः स्मरेत्। यथादृष्टकार्यकारणभावोपि विना प्रमाणं कथमन्यथाक्रियेत? तदेव दलं पुनः प्रज्वलितं स्मरति चेत् प्रत्यभिज्ञा तु नैवोदियात्। स्मृतिप्रत्यक्षसमूहरूपत्वात् प्रत्यभिज्ञायाः। स्मृतिरन्यस्य प्रत्यक्षं चान्यस्येति कथं द्वयोः समागमो भवेत्? वयं हि बहुकालात्पूर्वस्याप्यतीतस्य स्मरणं कुर्मः—बाल्ये मयेदमनुभूतमिति। पूर्वेण

ज्ञानेनेदानीन्तनं ज्ञानं तुलयामः, पूर्वमिदं ज्ञातम्, इदानीन्त्वेवं जानामीति, पुरुषान्तरस्य ज्ञानेनापि स्वज्ञानं तुलयामः, स न सम्यग् वेत्ति, वयन्तु सम्यग् जानीमः, इति। तदेतत्सर्वमप्येकस्मिन्नित्ये द्रष्टर्ये सति नैवोपपद्येत, भौतिकानां कणानामियत्कालं स्थित्यभावात्। स्वप्नस्तु सर्वथैव नोपपादयितुं शक्यत एभिः। विषयासन्निधाने कस्तावत्कणानां प्रज्वालको भवत्विति। तदेतदुक्तं महर्षिणा याज्ञवल्क्येन यतिधर्मप्रकरणे—

महाभूतानि सत्यानि यथात्मापि तथैव हि
कोऽन्यथैकेन नेत्रेण दृष्टमन्येन पश्यति।
वाचं वा को विजानाति पुनःसंश्रुत्य संश्रुताम्
अतीतार्थस्मृतिः कस्य को वा स्वप्नस्य कारकः॥ इत्यादि।

संशयतदुच्छेदवादे जीवजगत्संशयवादप्रतिवादाख्ये तृतीये खण्डे ज्ञानौपायिकजीवसिद्धिप्रकरणे च—

य एषा निर्धारयते य इत्थं
विचिन्तयन् संशयमातनोति।
सोऽहं ध्रुवं कश्चिदिहास्ति सत्यं
ज्ञानस्य तत्सर्वविधस्य मूलम्॥14॥

यस्तोलयन् सत्यमसत्यमेकं
निर्धारयत्यर्थमयं स आत्मा।
नैतन्मनस्तत्क्षणिकं तदन्यच्चा-
न्यच्च नालं प्रभवेत्तुलायाम्॥15॥

यो निर्णयं संशयमाप्नुवन्वा
तं तं च सत्यापयमान आह।
सत्यत्वमायाति यतस्तदर्थं
सत्यात्मना तिष्ठति यः स आत्मा॥16॥

मूर्ध्नि स्तने सक्थ्नि पदेऽथ पृष्ठे
स्पृष्टः क्वचित्तन्मनसावधत्ते।
सर्वैर्मनोभिस्तु य एक एवो-
द्बुद्धोऽखिलं भावयते स आत्मा॥17॥

ज्ञानं न तन् मां व्यतिरिच्य किञ्चित्,
ज्ञानं तथैतद्व्यतिरिच्य नाहम्।
अहं किं तज्ज्ञानमिदं समस्तं
यदेतदाभाति तदस्ति सत्यम्॥18॥ इत्यादि

किञ्चान्तःशरीरे स्थितायाश्चैतन्यशक्तेर्मस्तिष्ककणानां वा बाह्यैरर्थैः कथं सम्बन्धः उपपाद्येत? तेषां बहिर्निर्गमनासंभवात्। विषयान् रूपादीन् स्पृष्ट्वा सूर्यकिरणाः शरीरान्तरागत्य तैः संबध्नन्तीति चेत्, हन्त न वस्तुनि शरीरान्तरागच्छन्ति, न वा चैतन्यं बहिर्गच्छति, इति विषयचैतन्ययोः सम्बन्धाभावे सूर्यकिरणमात्रेण कथं विषयप्रकाश इति सर्वथा दुरुपपादमिदम्। किं च त एव सूर्यकिरणा लोष्ठप्रस्तरादिष्वपि गच्छन्ति, तत्र कुतो न विज्ञानाख्यो विषयप्रकाशः। शरीरान्तस्थिते चैतन्य एवास्ति तादृशो विशेषः, येन तत्रैव ज्ञानापरपर्यायः विषयप्रकाशो जायत इति चेद्, जडेभ्य एव समुत्पन्ने चैतन्ये कथं जडवैलक्षण्यं संभवेत्। तस्माद्विशेषमभ्युपगच्छता भवता नित्यज्ञानरूप एवात्मा भङ्ग्यन्तरेण-स्वीकृत इति नाममात्रे विवादः। भवतु वा रूपविषये सूर्यकिरणवाचोयुक्तिः कथञ्चित्, तत्तद्वस्तूनां वर्तुलप्रलम्बस्थूलाद्याकाराः, परस्परमर्थानां संयोगः, पार्थक्यं वा, दूरस्थता सामीप्यं वेति सर्वं कथमनुभूयेत नाम बाह्येन विषयेण साक्षादसंबन्धे। सर्वमिदमनुमिति रूपं ज्ञानम्, रूपकिरणानां वैषम्येण तरङ्गतारतम्येन सर्वमिदमनुमीयत इति यद् वैज्ञानिका वदन्ति तदपि नानुभवानुकूलम्। रूपविशेषस्य दूरत्वसामीप्यादेः परिच्छेदादेश्च तुल्यकालमेव जायतेऽनुभवः, अनुमितौ तु पूर्वं रूपज्ञानम्, तदनु व्याप्तिस्मरणम्, तदनु दूरत्वादिज्ञानमिति क्षणभेदोऽनुभवविरुद्ध एव कल्प्येत। मम तु विभुरात्मा चक्षुषाद्द्वारेण विषयैः संबद्धः सर्वं जानाति युगपदेवेति सर्वमुपपद्यते। किं च न केवलं प्रत्यक्षमेव ज्ञानम्, अनुमतिशब्दाद्या बाह्यविषयकाः कथमुपपद्येरन्? कणप्रज्वालकस्य विषसम्बन्धस्याभावात्। पूर्वनिहितः संस्कारविशेषोऽपि कणविशेषं प्रज्वालयतीति चेद् भवतु नाम तेन संस्कारेण पूर्वदृष्टस्य वह्नेर्धूमस्य च स्मृतिः, इदानीन्तु सन्निहिते प्रदेशेऽग्निमनुमाय तत्र प्रवर्तमाना वयमग्निं यल्लभामहे तत्र संनिहिते प्रदेशे वह्निज्ञानं कथमुदयेत? तत्स्थाने वह्नेः पूर्वदर्शनाभावेन संस्कारस्याप्यभावात्। विषयेण वह्निना सह चक्षुःसंम्बन्धस्य चानन्तरमुत्पत्तिसंभवात्। किञ्च नवीनेष्वाविष्कारेषु तत्र तत्र तां तां शक्तिमनुमाय तज्जातीयमन्यदपि महत् कार्यमनेन संपादयितुं शक्यमिति क एतद् व्यवस्थापयति? यथा बाष्पयानाविष्कर्त्रा निरुद्धस्य पात्रस्याग्नेरुपरि स्थापितस्योत्प्लवनम् दृष्ट्वा

बाष्पशक्तिरनुमिता, परमनया शक्त्या बृहत्तरा स्थलशकटिरेवं यन्त्राणि संयोज्य परिचालयितुं शक्यत इति केन कल्पितम्? तादृशस्य संस्कारस्य पूर्वमभावात्। शब्देनातिलध्व्याः सूच्याः प्रकम्पनं दृष्ट्वा शब्दे परिचालनशक्तिरनुमितास्तु, परमेवं यन्त्राणि संयोज्य कालान्तरेऽपि स एव शब्दः श्रवयितुं शक्यत इति क एतत् कल्पयित्वा फोनोग्राफयन्त्रमाविष्करोति। तस्मादेकस्य द्रष्टुरनुमातुः कल्पकस्य च स्थिरस्याभावे किमप्येतत् कथमपि नोपपद्यते। ननु भवत्स्वीकृतोऽतिरिक्त आत्मा यथा सर्वमेतत्कल्पयति तथास्माकं भूतसंयोगजश्चैतन्याख्यः शक्ति विशेषोपि सर्वमनुसन्धाय कल्पिष्यति इति चेद् बाढम्, परं स शक्तिविशेषस्तु सर्वेष्वेव चेतनेषु विशेषतो मनुष्येषु तु सर्वत्र संभवन् एव स्यादिति सर्वं एव तथाविधानाविष्कारान् कुतो न विधातुं शक्ताः? कस्यचिद् बुद्धिपाटवम्, कस्यचिद् बलबाहुल्यम्, कश्चिदद्धनोपार्जनोपायानेव सर्वाधिकान् जानाति, कश्चन नवनवाः कलाः कलयितुं प्रवीण इति वैषम्यं कुतः स्यात्। यद्यद् येन शिक्षितं तत्रैव तस्य पाटवमिति चेत्, समानमधीयानां शिक्षमाणानामपि न सर्व आविष्कर्त्तारो भवन्ति, कश्चिदेव तु तथा प्रवीणे भवतीति प्रज्ञापाटवं कस्यचिदेव कुतस्त्यम्? समानयोरेव रजोवीर्ययोः सर्वत्र चैतन्योत्पत्तिकारणत्वेन कारणवैषम्याभावे कार्यवैषम्यस्य सुतरां दुरुपपादत्वात्। रजोवीर्ययोरपि मातापितृजाः संस्काराः संक्राम्यन्तीति तु न भवता वक्तुं शक्यम् तादृशानां संस्काराणां प्रत्यक्षादिभिर्ग्रहीतुमशक्यत्वात्, अदृष्टस्य च भवतामभ्युपगमात्। अदृष्टमपि स्वीक्रियते चेद् आत्मभूतस्य नित्यज्ञानस्यैव स्वीकारे को नाम विवादः? मातापितरौ च यत्कार्यं कर्तुं न शक्तावभूताम्, तदपि पुत्रेण विशद्य सम्पाद्यते इति च पुनरपि भवन्मते नुपपन्नमेव। मम तु नित्यस्यात्मनोऽनवरतं शरीरान्तरग्रहणपरम्पराया अनादित्वेन पूर्वपूर्वसंस्कारवशादग्रे संस्कारपाटवेन सर्वमपि वैषम्यं सूपपादं भवति। यदि भवतापि चैतन्यरूपा शक्तिरेव नित्या सर्वसंस्काराधार-भूता चोपगम्यते, तर्हि स एवास्माकमात्मेतिनाममात्रेऽयं विवादोऽकिञ्चत्कर एव प्रसक्तः। येऽपि च वदन्ति भवतु नाम ज्ञानमतिरिक्तः पदार्थः, परं तस्य नित्यत्वं तु नाभ्युपगन्तुं शक्यम्, अस्मत्-ज्ञानस्य क्षणिकत्वानुभवेन ज्ञानमात्रस्य क्षणिकताया एवानुमानादिति तेऽपि पूर्वोक्तया स्मृत्याद्यनुपपत्या नित्यत्वं बोधनीयाः। किंच अस्मज्ज्ञानेन यथास्मदान्तरं जगदुत्पद्यते, यथा बर्हिजगदिदं येन ज्ञानेनोत्पद्यते तदपि विभु ज्ञानमङ्गीकर्तव्यमेव। अन्तर्जगति बाह्यजगतश्चेदमेव स्फुटं वैलक्षण्यम् यदस्मदीयान्तरं जगदस्माभिरेवानुभूयते, न तत्र परस्य सम्प्रतिपत्तिरस्ति, अन्येन तस्याज्ञातत्वात्। अन्यस्य चान्तरे जगत्यस्माकं सम्प्रतिपत्तिर्विप्रतिपत्तिर्वा नास्ति

तस्यास्माभिरज्ञानात्। बहिर्जगति तु अस्त्यस्माकं सर्वेषामपि संप्रतिपत्तिः, अयं पर्वतः, इयं नदी, एतन्नगरम्, इत्यादौ सर्वेषामेवैकविधानुभवात्। यं पदार्थमाशास्महे तदस्माकं ज्ञाननिष्ठमस्मदन्तर्जगति तिष्ठत्येव, किन्तु न तेन तृप्तिरुदेति, बहिस्तु यदा तत्प्राप्यते तदा भवत्यानन्दस्तृप्तिश्च। आशामोदकै रसवीर्यविपाकादि न दृश्यते जायमानम्। बहिर्जगत अन्तर्जगति प्राप्तैस्तु तैः सर्वमिदं जायत इति बहिर्जगन्नापलयितुं शक्यम्। तदपि तु ज्ञाननिष्ठमेव बहिराविर्भूतम् इति पाक् प्रदर्शितया प्रक्रियया स्वीकार्यमेव भवेत्। यत्रास्माभिः सर्वैः सम्प्रतिपन्नं वा दृष्ट्वेवास्माभिर्गृह्यमाणमिदं सर्वमन्तर्भूतम्, तदेवैश्वरं ज्ञानम्, ईश्वररूपं ज्ञानम्, मूलतत्त्वरूपं ज्ञानमिति वा कथयामः। तच्च विभु नित्यञ्च स्वीकर्तव्यमेव, कस्मिन्नपि प्रदेशे कस्मिन्नपि च काले जगतः सर्वथा अभावानवगतेः। यत्रापि महाप्रलयादौ जगन्नास्ति, तत्रापि बहिर्नास्तीत्येवता तात्पर्येण तदभावे निगद्यते। तस्मिन् मूलभूते तु ज्ञानेऽन्तर्निहितमस्त्येव, अन्यथा कथं प्रादुर्भवेत्। अभावोऽपि चा जागतानां पदार्थानां जगत्यन्तर्भूत इत्यभावसत्वेऽपि जगदस्त्येव। देशकालावप्यस्माभिः प्रत्यभिज्ञायमानौ जगदन्तगर्ताविति तस्मिन् प्रकाशरूपे मूलभूते ज्ञाने स्थितौ न तत्परिच्छेदायालं भवतः। प्रकाशाद् बहिर्भूतयोर्देशकालयोरप्यसत्वापत्तेरिति देशकालापरिच्छिन्नत्वरूपे विभुत्वे नित्यत्वे च तस्य न कोऽपि विवादावसरः।

तदित्थं मूलभूतं नित्यं मुख्यं ज्ञानमुपपत्या विवृतम्।

□

# ज्ञातृज्ञानज्ञेयरूपत्रिपुटीप्रादुर्भावः

अनन्तरं निरूपयिष्यमाणा मायाख्या शक्तिर्यदा सत्तावदिदं ज्ञानमपि परिच्छिनत्ति, तदात्र ज्ञाता, ज्ञानम्, ज्ञेयमिति त्रिपुटी प्रादुर्भवति। सामान्यरूपां सत्तां विशेषात् प्रादुर्भाव्य माया परिच्छिनत्तीति प्राग् व्याख्यातम्। इह तु ज्ञानं परिच्छिन्दती विभुत्वस्वभावस्य ज्ञानस्य विरोधितया सा अज्ञानमित्यभिधीयते। इदमज्ञानमेवाभिलक्ष्य पुराणेषु बहुत्र सर्वतः पूर्वमविद्यासर्ग एव विव्रियते। तदुक्तं लिङ्गपुराणे पञ्चमेऽध्याये—

**यदा स्रष्टुं मतिं चक्रे मोहश्चासीन्महात्मनः।**
**द्विजाश्चाबुद्धि पूर्वन्तु ब्रह्मणोऽव्यक्तजन्मनः॥1॥**

**तमो मोहो महामोहस्तामिस्रश्चान्धरुञ्जितः।**
**अविद्या ह्येषा प्रादुर्भूता स्वयम्भुवः॥2॥**

यद्यपि अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशः इति तमो मोहादिपदवाच्यानि पञ्चपर्वाणि तामसबुद्धिविकारा बह्वर्वाक् प्रादुर्भवन्ति, परं सर्वेषामेतेषां मूलं ज्ञानसंकोचकमज्ञानं प्रथममेव प्रादुर्भवति। तद्विना सृष्टेः प्रादुर्भावासंभवादिति तात्पर्यमवसेयम्। अविद्यैवेयमज्ञानपदाभिलप्या। अज्ञानमिह ज्ञानविरोधिभावरूपमेव विवक्षितम्, न तु ज्ञानाभावमात्रमिति निरूपितमेतद्वेदान्तग्रन्थेषु विस्तरेण सूरिभिः। सत्तावद् ज्ञानमपि न वस्तुतः परिच्छिद्यते, अपि तु अपरिच्छिन्नमेव मायया परिच्छिन्नवदवभासत इति न विस्मर्तव्यम्। अज्ञानरूपा माया ज्ञानमावृणोति, तदुक्तं भगवद्गीतासु—

**"अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः"**

—इति।

आवृतं तु ज्ञानं संकोचं गच्छति इति स्वाभाविकमेव। आगमशास्त्रे तु प्रकाश इत्याख्याते ज्ञानरूपः परमशिवः स्वातन्त्र्येण स्वेच्छयैव संकोचं गृह्णाति। अन्यस्य तत्संकोचसामर्थ्यासंभवादिति व्याख्यायते। तस्याप्यत्रैव तात्पर्यम्। स्वातन्त्र्यस्य स्वेच्छायाश्च शक्तित्वेनैवोपगमात्। मायाशब्दस्तु, तेषामवरकक्षाके तत्त्वे निरूढ इति संज्ञाभेदमात्रमिदम्। भवति च तच्छास्त्रेऽपि द्वेधा मायापदप्रयोगः।

स्वातन्त्र्यरूपा मूलभूता शक्तिरपि क्वचिन्मायापदेनाभिधीयते, ईश्वरशक्तेः शुद्धविद्याया महामायापदेन प्रसिद्धाया अनन्तरमुद्भूता मोहजननी अवरा-शक्तिरपि च मायापदव्यपदेश्येति मूलभूतया स्वातन्त्र्यरूपया मायया ज्ञानरूपस्य परमशिवस्य संकोचः सम्पाद्यत इति न किमपि विरुद्धम्। यच्चेदमावरकमज्ञानमाख्यातं तदपि ज्ञानान्नात्यन्तं भिद्यते। ज्ञानविरोधितया तदपि वयं जानीम इति ज्ञानविषयतामापन्नं कथं ज्ञानाद्भिन्नं स्यात्। ज्ञानादत्यन्तं भिन्नं हि न ज्ञानविषयः संभवतीति प्रोगेवावोचाम। तस्माज्ज्ञानमेव मायावशेन स्वस्वरूपमेवावृणोति इति आगमशास्त्रोक्ते स्वातन्त्र्य एव पर्यवसानम्। अतएव जगति दृश्यमानं ज्ञानविरुद्धमज्ञानमपि बुद्धिवृत्तिरित्येव सांख्यैराख्यायते—

**अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्,**
**सात्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्।**

—इति।

धर्मो ज्ञानं वैराग्यमैश्वर्यमिति चत्वारि बुद्धेः सात्विकानि रूपाणि। अधर्मः अज्ञानम्, अवैराग्यम्, अनैश्वर्यम् इति तु चत्वारि तामसानि बुद्धेरेव रूपाणि इति। यद्यपि अज्ञानपदेनात्र अन्यथाज्ञानमेवाचक्षते व्याख्याकृतः, तथापि तुल्यन्यायाद् अज्ञानम्, अन्यथाज्ञानं चेत्युभयमप्यत्र संग्राह्यतामर्हति। एवं जगदन्तर्गतमज्ञानं यदा ज्ञानस्यैव रूपान्तरम्, तदा मूलभूतमज्ञानमपि तथैव मन्तव्यम्। भवतु नाम, अनिर्वाच्यं सर्वमिदं केवलमृतम्भरया प्रज्ञया समाधौ ग्राह्यमिति किन्तत्र वाग्विस्तरेण। इदन्त्वग्रे शक्यते व्याख्यातुम्—यत्संकुचितमिव यदा ज्ञानं मर्यादाबन्धे पतितमिव तदा तत्र मध्यविन्दुरपि समुन्नेतुं शक्यो भवति, यो नाभिकेन्द्रादिपदैः श्रुतिस्मृत्यादिष्वभिधीयते। अपरिच्छिन्ने हि न नाभिः सन्नेतुं शक्यः, परिच्छेदे तु नाभिर्नाम मध्यविन्दुर्गृह्यत एव प्रयासेन। सर्वस्यापि च वस्तुनः केन्द्रसमीपे घनीभावः, विप्रकर्षे तु विरलता दीपशिखादीनामिवेत्यनुभवसिद्धं प्रज्ञाजुषाम्। तथा च यत्र घनीभावः, स ज्ञानघनो ज्ञानरूप आत्मा ख्याप्यते। यत्र तु विरलता तदात्मनो रश्मिभूतं ज्ञानमाख्यायते संकोचवशात् ज्ञानेन परित्यक्तं च प्रदेशं ज्ञानादाविर्भूतास्तदंशा ज्ञेयभूता विषया आक्राम्यान्तीति ज्ञातृ-ज्ञानज्ञेयरूपा त्रिपुटीयं निष्पन्ना। इदमेवाभिप्रेत्य श्रीरामानुजीयादिवैष्णवदर्शनेषु आत्माणुरूपः, तद्रश्मिभूतं ज्ञानं च सर्वशरीरव्यापि व्याख्यायते, सोऽयं परिच्छेद कृत एव काल्पनिको ज्ञातृज्ञानभेदः। यच्च विभु कथञ्चिद्वस्तुतो वा अवभासरूपेण वा परिच्छेदं नीयते, तत्सदैव परिच्छेदं विभिद्यापरिच्छिन्नतां गन्तुमीहत इति प्रकृतिसिद्धमिदम्। ततश्च परिच्छेदं प्रापितं

ज्ञानमपीदं सततमेव प्रसरत्परिच्छेदं दूरीकर्तुमेवेहते, तत एव विषयानिदं सततमभिव्याप्य स्वात्मनि नेतुं प्रयतते। यावच्च ज्ञानं प्रसरति, तावदज्ञानमपसरति। तेन यत्पूर्वमज्ञातम्, अर्थादज्ञानविषयीभूतमासीत्, तत्क्रमेण ज्ञानविषयतामापाद्यत इति सर्वेषामनुभवगोचरीभूतोऽयमर्थः। अध्ययनम्, उपदेशश्रवणाय—इत्याद्या अज्ञानापसरणस्यैवोपायाः स्वप्रसराय ज्ञानेनैव समायोज्यन्ते। तैश्च ज्ञानप्रसरोपि स्फुटमनुभूयते। इन्द्रियद्वारेणापि ज्ञानं प्रसरति प्रसरोऽयं नाभिनवज्ञानोत्पादः अपि तु अज्ञानावरणदूरीकरणमिति नैतद्विस्मर्तव्यम्। इदमज्ञानापसरणमेव ज्ञाततोत्पत्तिरूपेण मीमासंका व्यवहरन्ति इति वर्णनप्रक्रियाभेदमात्रम्। यत्र च ज्ञानप्रसरनिरोधस्तत्र जिज्ञासाया अनुपशमे दुःखमनुभूयते। एवं प्रसरदिदं ज्ञानं यदा पुनरपरिच्छिन्नं भवति, तदेव मायावरणाद्विमोके मुक्तिराख्यायत इति सुसूक्ष्ममनुसन्धेयम्। सोऽयमन्ते त्रिपुटीविमोकः। सर्वे जगद् व्यवहारास्तु त्रिपुट्यैव निरुह्यन्ते। इदानीं हि वयं विषयसंवलितमेवज्ञानं प्रतीमः, विषयविनाकृतं ज्ञानस्वरूपमेव न संभवतीति परिचिनुमः, तदेतत्सर्वं विजृम्भितं मायायाः। इत्थं मूलभूतं ज्ञानं मुख्यम्, अस्माभिः परिचीयमानन्तु योगजमिति विस्तरेणोपपादितम्।

एवमानन्दोपि विवेच्यः। शान्त्यानन्द एव मुख्यः, समृद्ध्यानन्दस्तु योगजश्चानित्यश्चेति। आनन्दरूपो विभुरात्मा मूलतत्त्वम्। यथा हि सदंशस्य संकोचो ज्ञानांशस्यावरणं च मायया प्राग्व्याख्यातम्, तथैवानन्दांशोऽपि मायया आव्रियते, संकोचमापद्यते वा। आवृतं संकोचमञ्चच्च स्वभावेनापरिच्छिन्नं स्वस्वरूपमेवाप्तुमीहत इत्यनुपदमिदमुक्तं ज्ञानप्रकरणे। तथैवानन्दांशोऽप्य-परिच्छेदमाप्तुं वर्द्धितुमीहते। तत एव सर्वोऽपि जनः पुत्रादिकुटुम्बस्य धनगृहभूम्यादि-संपदश्च वृद्धिमेवाभिकाङ्क्षते—तत्रैव चानन्दमभिमन्यते। दुर्दैवात् सम्पन्ने च कुटुम्बसम्पदादिह्रासे दुःखमनुभवति। श्रुतिरप्येतदेवाह—

**"यो वै भूमा, तत्सुखम्, यदल्पं तद्दुःखमिति।"**

बीजचितिः, देवचितिः, भूतचितिः, पुत्रकलत्रादिभूमिगृहादिसम्पच्चेति पञ्चधा व्यावहारिकस्यात्मनो व्याप्तिर्व्याख्यायते। यदा हि काचिदभिनवासंपद् गृहारामादिकं वा धनं वा पुत्रादि वा लभ्यते, तदा सत्सर्वमप्यात्मनि प्रवेशयितुं क्षरो व्यावहारिक आत्मा प्रसरति, सोऽयं विकासापरपर्याय आत्मनः प्रसार एव समृद्ध्यानन्दः। स चोत्फुल्लेन मनसा गृह्यते सर्वेणापि जनेन, "आनन्दमनुभवामीति" सर्वेषामप्यनु-व्यवसायात्। सोऽयमानन्दानुभवः कञ्चिदेवकालं भवति, अनन्तरं तु तद्वस्तु स्वीयतामापद्य तिष्ठति, तथापि प्राप्तिकाले य आनन्दाऽनुभवोऽभूत्, स न स्थायी

भवति। तृप्तिस्तु अनुभूयते, तृप्तिर्नामेयं गृद्धेरभावः शान्तिरूप एव शक्यते वक्तुम्। अप्राप्तप्राप्तौ चेतस उल्लासः, अनन्तरं तु आत्मनि गमिते तस्मिन् वस्तुनि आत्मनः स्वाभाविकी तृप्तिरेव, न तु मानसोल्लास इत्यनुभवपथं नायाति स आनन्दः। यदि तु पुनः कदाचित्तद्वस्तु अपह्रियते तदात्मांशप्रच्यवनाद् दुःखमुदेति। इत्थं च यदि सर्वमपि जागतं वस्तुजातमात्मनि प्रविष्टं स्यात्, तर्हि अपूर्वप्राप्तेरनवसरात् समृद्ध्यानन्द उदेतुं नैवावसरं लभत इति मुक्तौ समृद्ध्यानन्दो न्यायदर्शने प्रत्याख्यायते, तेषां दृष्टौ समृद्ध्यानन्दस्यैवानन्दपदेन बोधनात्।

वेदान्तिनस्तु शान्त्यानन्दमेव मुख्यमानन्दं मन्वत इति तेषां सिद्धान्ते मुक्तिः परमानन्दात्मिका। प्राप्तव्यवस्थाभावेन चेतसि चाञ्चल्योदयावसराभावात्, मुक्तस्य सर्वात्मभूतत्त्वेन न तस्याप्राप्तं किमपि विद्यत इति कस्य लिप्सया चाञ्चल्यमुदेतु। कस्य वा प्राप्त्या समृद्ध्यानन्दो जायताम्? किं च शरीरेन्द्रियादिविरहेण शुद्धस्यैकस्याखण्डस्यात्मनो नित्यस्यैव मुक्तौ परिशेषादंशविच्छिन्नतापि न सम्भवतीति दुःखस्यापि नास्ति प्रसंगः। स्वर्गादौ तु उत्तरोत्तरमुन्नतेर्जायतेऽभिलाष इति तत्र समृद्ध्यानन्दोपि, तत्तत्संपद्विच्छेदे दुःखमपि चानुभूयत एव। समृद्ध्यानन्दापेक्षया शान्त्यानन्दं मुख्यं मत्वैव शास्त्राणि स्वर्गाद्युपेक्ष्य मोक्षायैव प्रयतने मनुष्यजन्मसाफल्यमुपदिशन्ति। लौकिकानामपि चास्त्येवमेवानुभः, अतएव सर्वविधसमृद्धिभाजोऽपि अनवरतमैन्द्रियकविषयानुपभुञ्जानो अपि तानुपेक्ष्य सुषुप्तिमभिवाञ्छन्त्येव। सुषुप्तौ हि शान्त्यानन्दः यदि समृद्ध्यानन्दापेक्षया मुख्यो न स्यात् न तर्हि इन्द्रियग्राह्यान् विषयानुपेक्ष्य सुषुप्तिं कश्चिदभिवाञ्छेत्। वाञ्छन्ति तु सर्वेऽपि प्राणिनः। ततश्च शान्त्यानन्दस्यैव मुख्यता सिद्ध्यति। तत्रैवान्ततो निलीयते समृद्ध्यानन्दः। तेनैतदेव प्रतिभाति यत्क्षणिकः स समृद्ध्यानन्दः शान्त्यानन्दे निलीय स्थितः।

अपरे तु समृद्ध्यानन्दस्योत्पत्तिमपि शान्त्यानन्दादेव व्याचक्षते। कस्यचिद्वस्तुन आकांक्षा यदा चेतस्युदेति, तदा तद्वशाच्चेतसि चाञ्चल्यं जायते। यदि कश्चिन्मनुष्यः स्वयोग्यमधिकाराद्यभीप्सति, तर्हि यावन्न लभ्यते सोऽधिकारः तावच्चाञ्चल्यं तस्य मनसि वर्द्धत एव। इतस्ततो यथाशक्यं स विचेष्टते, कुत्र मद्योग्यं स्थानमिति समाचारपत्रेषु प्रत्यहमवलोकयति, जनान् पृच्छति, अधिकारिणोऽनुगच्छति, भोजनशयनाद्यपि तस्मै न रोचते। यदा तु दैवात् तेन कुतश्चिद्वृत्तं प्राप्यते 'नियुक्तो भवान् कस्मिंश्चित्पद' इति, तदा तच्चाञ्चल्यं चेतसो निवर्तते। निवृत्तचाञ्चल्येस्थिते च मनसि आनन्दरूप आत्मा प्रतिबिम्बतीत्येव तस्यानन्दानुभवः

तदित्थं स समृद्ध्यानन्द आत्मभूतस्य शान्त्यानन्दस्यैव प्रतिबिम्बभूत इति तत एव निष्क्रान्तः। एवमेव सर्वत्रानन्दानुभवेषु सुसूक्ष्ममालोचनीयम्। तदेतदुक्तं महाविदुषा भर्तृहरिणा–

**तृषाशुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि**
**क्षुधार्तः सन् शालीन् कवलयति शाकादिवलितान्।**
**प्रदीप्ते कामाग्नौ सुदृढतरमालिङ्गति वधूं,**
**प्रतीकारो व्याधेः सुखमिति विपर्यस्यति जनः॥–इति।**

सर्वः सुखापरपर्यायः समृद्ध्यानन्दो दुःखाभावमात्रमिति पद्यतात्पर्यम्। दुःखक्षोभचाञ्चल्यादीनामभावश्च प्रसादापरपर्यायः शान्तिरूप एवेति शान्त्यानन्दादेव समृद्ध्यानन्दस्योत्पत्तिः, तत्रैव च लय इति तस्यैवेयं परिणतिः स्पष्टतया सिद्धा। अनयाऽपि प्रक्रियया आत्मनो रसरूपता स्फुटीकृता। लौकिकास्तु समृद्ध्यानन्दमेव परिचिन्वन्तीति लोकसिद्धमर्थमनुवदितुं भगवता पाणिनिना 'टुनदि समृद्धौ' इति धातुपाठे पठितम्।

तदित्थं मूलतत्त्वस्यांशरूपेण जगति सर्वेषु पदार्थेषु सच्चिदानन्दा व्याख्याताः। तेन लोकसामान्यपरिचितेभ्यः सत्ताज्ञानानन्देभ्योः विलक्षणाः तेषां जनका अलौकिका निगूढतया कृष्णपदाभिधेया इत्यपि स्फुटीकृतम्, एषु च सत्ताज्ञानानन्दशब्दप्रयोगो असद्रूपतां परप्रकाश्यतां क्षोभचाञ्चल्यादिदुःखरूपतां च व्यावर्तयितुमेव क्रियते, न तु सत्ताश्रयत्वादिनेत्यपि तत्तद्विवेचनेन लब्धम्। इमामेव प्रक्रियां मनसि निधाय श्रीशङ्कराचार्या-अभावरूपतामेषां व्याकुर्वन्ति, श्रीरामानुजाचार्याश्च परमतत्त्वरूपस्य परमेश्वरस्यालौकिकगुणत्वमेषां ख्यापयन्ति। लौकिकान् शुक्लतयोक्तान् सच्चिदानन्दांश्च लक्ष्यीकृत्य श्रीवल्लभाचार्याः परतत्त्वाद् भगवत उत्पत्तिमेषां व्याचक्षत इति सर्वमिदं निरूपणप्रक्रियाभेदमात्रम्, न तु वस्तुगतः कोप्याचार्याणां विरोध इति सम्यगेतत्सुधीभिर्विभाव्यम्। एतावता परिकरेण मूलतत्त्वस्यानन्दरूपतामुपपाद्य रसशब्दप्रयोगस्तत्र समर्थितः।

सोऽयं रसः सर्वस्यास्य प्रपञ्चस्य मूलतत्त्वमिति सिद्धम्।

□

# वैज्ञानिक-प्रक्रियायाः शक्तिव्याख्या

अथ श्रीगुरुचरणानां वैज्ञानिकीं समन्वयरूपां प्रक्रियामवलम्ब्य शक्तितत्त्वमपि व्याख्यायते। एतादृशमखण्डमेकतत्त्वं परिणन्तुं कथं समर्थमिति शङ्कां व्यपनेतुं श्रुतिपुराणादिषु शक्तिः स्वीकृता। इयं शक्तिर्बलपदव्यपदेश्या भवति। बलम्, शक्तिः, क्रिया इत्येक एवार्थोऽवस्थाभेदेन भिन्नैः शब्दैर्व्यपदिश्यते।

किञ्चिदकुर्वद् आश्रयादभिन्नरूपं प्रसुप्तमिव यावद्भवति, तावद्बलमित्युच्यते। जागरितं कुर्वद्रूपतां गतं तदेव शक्तिपदाभिलप्यं भवति। कार्यरूपेण परिणतं तु तदेव क्रियापदव्यपदेश्यम्। यथा विद्युति विद्यते प्रकाशनसामर्थ्यम् परं तद्विद्युदभिन्नं प्रसुप्तमिव यावद्भवति, तावद्बलमेव तदुच्यते। तारयोगेन काचादिवेल्लन (बल्व) मासाद्यकुर्वद्रूपतां गतं तदेव शक्तिपदवाच्यं भवेत्। प्रसरणेन प्रकाशं कुर्वत्तु स्पष्टमेव क्रियारूपम्। तथैव ब्रह्मण्यपि सर्वबलाधारभूतं बलमास्थेयम्, तदेव जागरितं शक्तिरूपतां सृष्ट्यादि क्रियारूपतां च क्रमेण गच्छति। शक्तिरेव परत्रापि स्वसंसर्गेण प्रभावमुत्पादयन्ती क्रियेति व्यपदिष्यते।

क्रियैवास्माभिर्दृश्यते—तथैव शक्तिर्बलं च तस्याः साक्षात्, परम्परया च कारणे अनुमीयेते। यद्यपि क्रियानामेयमत्यन्तापरिदृष्टा, न शक्या पिण्डीभूता निदर्शयितुम्, इति व्याकरणमहाभाष्यकृता क्रियाया अपि प्रत्यक्षागोचरत्वमुक्तम्। अतिस्वल्पक्षणमात्रावस्थायित्वेनातिसूक्ष्मत्वात् क्रियायाः प्रत्यक्षं न संभवति। उत्पन्नस्य चक्षुर्विषयतामापन्नस्य प्रत्यक्षं सम्भवेत्, क्रिया तूत्पन्नैव ध्वंसेनाक्राम्यत इति चक्षुषा सम्बन्ध एव तस्या नोपपद्यते तदा कुतः प्रत्यक्षम्? अस्माकमङ्गुलिर-स्माभिर्वितस्तिमात्रं परिचालिता, तावदेव वितस्तिमात्रे यावन्त आकाशदेशाः कल्पेरन्—तावद्भिः क्रमेण संयोगविभागजननार्थं शतशः क्रिया अभ्युपगन्तुमापद्यन्ते। कथमेवं विधायाः सूक्ष्मायाः प्रत्यक्षं सम्भवेत्?

न च तत्समुदायः प्रत्यक्षो—भवतीत्यपि शक्यं वक्तुम्, उत्पन्नप्रध्वस्तानां परस्परं सहयोगासम्भवेन समुदायस्यैवासम्भवात्। एवमेव सूच्योत्पलशतपत्रभेदेऽपि क्रियायाः सूक्ष्मतमता तत्र तत्र व्याख्याता, तस्मात् क्रियापि सहयोगविभागानुमेयैवेति भाष्यकृतोऽभिप्रायः। परं प्रत्येकं क्रियाया अप्रत्यक्षत्वेऽपि धारावाहिकतां गता सा

प्रत्यक्षेण गृह्यते—इति 'अङ्गुलिश्चलति', 'देवदत्तश्चलति' इत्याद्यनुभवानां प्रत्यक्षत्वमेव लौकिका अभिमन्यन्ते।

नैयायिकाश्चाप्युत्तरदेशसंयोगपर्यन्तं क्षणचतुष्टयं क्रियाया अवस्थितिं स्वीकुर्वन्तीति व्यावहारिकं क्रियायाः प्रत्यक्षं कथमनुपपन्नम्। उत्पन्नप्रध्वस्तानां क्रियाणां स्वतः समुदायो न सम्भवतीति सत्यम्, आश्रयमवलम्ब्य तु धारावाहिकतां गतायाः सम्भवत्येव समुदाय इति लोकानुभवः।

न च संयोगविभागाद्या अपि धारावाहिकक्रियास्वरूपादतिरिच्यन्ते। तस्मात्प्रत्यक्षगतया क्रियया शक्तिर्बलं वानुमीयते—इति युक्तमेव। इन्धनादि दाहरूपां क्रियां-दृष्ट्वा-वह्नौ दहनशक्तिरनुमीयते, सा च शक्तिः पूर्वमप्यासीदेव, अन्यथा कुतोऽकस्मादाविर्भवेत्? इति आविर्भावात् पूर्वं प्रसुप्तावस्थारूपं बलमपि शक्त्यानुमेयम्। यद्यपि शक्तिपदं बलपदं चैकार्थतयैव व्यवहारे कोशे च ख्याप्यते—तथाप्यवस्थाभेदस्पष्टीकरणार्थमिह पृथगर्थतया परिगृहीतं द्रष्टव्यम्।

क्रिया चेयं क्षणमात्रवस्थायिनी शक्तिजन्या, क्षणान्तरे शक्त्यन्तरेणान्या क्रिया जन्यत इति कारणीभूतायाः शक्त्यवस्थाया अपि क्षणिकत्वमेवानुमेयं स्यात्। क्षणिकत्वस्वभावायाश्च शक्तेः प्रस्वापदशायामपि स्वभावभूतक्षणिकत्वानपायाद् बलमपि क्षणिकमेव सिद्ध्येत्। यदा हि बलम्, शक्तिः क्रियेत्येकस्यैव तत्त्वस्यावस्थात्रयमभ्युपगम्यते—तदा सर्वत्रापि क्षणिकत्वमव्याहतमिति न विशिष्टसाधनमपेक्षते। तस्मात् शक्तौ बले चापि धारावाहिकतयैव प्रतीयते स्थिरत्वम्।

क्रियायाश्च यथातिस्वल्पाविभाज्यक्षणस्तत्कालावस्थायिता—तथैवाति-स्वल्पाविभाज्यदेशावगाहोपीत्यनुभवसिद्धम्। अङ्गुलिपरिचालन-पादोत्थापन-पादन्यासादिषु पृथिव्या आकाशस्य वा यावन्तोऽतिसूक्ष्माः प्रदेशाः कल्पयितुं यत्र प्रभावः स वैयाकरणैः कर्मेत्युच्यते। वस्तुतः कर्मक्रियेत्येकार्थौ शब्दौ, क्रियाश्रयत्वात्तु उपचारेण कर्मपदं तत्र व्यवहरन्ति वैयाकरणाः। क्रियारूपं तत्रैव प्रकटीभवतीति तद्भावः।

शक्येरन्—तेषु संयोगविभागार्थं तावत्सूक्ष्मप्रदेशावगाहिन्येव क्रियाकल्पनीया स्यादित्युक्तं प्राक्। तद्वदेव च परमकारणस्य बलस्यापि परमसूक्ष्मदेशकालावगाहः सिद्ध्यति। ननु, अनाद्यनन्ते नित्यविभौ परतत्त्वरूपे भगवति तिष्ठन्ती तच्छक्तिरप्यनन्ता विभुश्चस्यादिति युक्तम्, ब्रह्मणः क्वचिच्छक्तिमत्त्वम्, क्वचिच्चाशक्तिमत्वम्, कदाचिच्छक्तिमत्त्वम्, कदाचिच्चाशक्तिमत्वमिति विवरणस्य

क्वापि श्रुतिस्मृत्यादिष्वदर्शनात्, ब्रह्मणः स्वगतभेदापत्तेः। किञ्च सर्वशक्तिमानपि परमात्मा यदि कदाचित् क्वचिच्छक्तिरहितोऽपि स्यात्, तदा कस्तस्य जीवाद्विशेष इति। सत्यम्, बलपदबोध्याशक्तिरनन्तैव, किन्त्वियान् भेदः—ब्रह्मणि सर्वदिग्देशव्याप्तरूपं परममहत्त्वाख्यं परिमाणकृतमानन्त्यम् दिग्वृत्यभावा-प्रतियोगित्वमितियावत्। शक्तौ तु संख्याकृतमानन्त्यम्, अनन्तानि हि बलानि सर्वत्रापि व्याप्तानीति तस्य दिग्वृत्यभावप्रतियोगितानवच्छेदककर्मवत्वमिति यावत्।

एवमेव ब्रह्म त्रिकालाबाध्यमिति कूटस्थनित्यम्। बलन्तु प्रवाहनित्यम्, कदाचिदपि तत्प्रवाहो विच्छिद्यते, प्रत्येकं बलव्यक्तयस्तु परिच्छिन्नाः प्रतिक्षणोत्पादविनाशशालिन्यश्च। तत एव 'शक्तयः' इति बहुवचनेनापि श्रुतिस्मृतिषु सा व्याख्यायते। शक्तित्वेनानुगमय्य चैकवचनेनापीति। तत एव च कदाचित् सृष्टिः, कदाचित्संहारः, कदाचिद्ग्रीष्मः, कदाचित्तु शीतमिति सर्वोऽपि भेद उपपद्यते—एकरूपत्वे तु शक्तेर्न जगद्वैचित्र्यं सिद्ध्येत्। सर्वस्यापि जगतः शक्तिपरिणतिभूतत्त्वात्। किमन्यत्—यदि ब्रह्मवदेव बिभ्वी कूटस्था च शक्तिरभ्युपगम्येत, तर्हि तत्कल्पनैव निरर्थिका स्यात्। अपरिणतायास्तस्या अपि जगदुत्पादकत्वस्य ब्रह्मणा वानुपपत्तिग्रस्ततायाः स्फुटत्वात्। तस्मात् प्रवाहरूपैव शक्ति स्वीकार्या।

यदिदं किञ्चन दृश्यते जगद्रूपम्—स सर्वोऽपि शक्तेरेव परिणामः। शक्तेरपि शक्तित्वानपायाद्विकासो वा कथ्यताम्। शक्तिरेव विविधैरूपैर्भासत इति यावत्। शक्तिश्चैव क्रियारूपेण प्रकटीभवतीति क्रियारूपेण सर्वं जगदित्यपि शक्यते वक्तुम्। सा च क्रिया यद्यपि सूक्ष्मतम देशावगाहिनी स्वभावत इत्युक्तम्, तथापि कालिकप्रवाहेषु यथा तस्या नित्यत्वं भासते, तथैव दैशिकप्रवाहेण शतशः सहस्रशः सम्मिलितत्त्वेन प्रतीयमानानां महत्त्वमतिमहत्त्वमस्मद्दृष्ट्या परमहत्त्वमपि च भासते, तत एव क्षुद्रत्वमहत्त्वादिकमंशांशिभावादि प्रतीयत इत्यग्रे पुरुषनिरूपणे स्फुटं स्यात्।

एतदेवालोच्य क्रियामेव मूलतत्त्वं मन्यमानाः क्रियैकाद्वयवादिनः श्रमणाः क्रियायाः क्षणिकतया क्षणिकमेव सर्वमातिष्ठन्ते। श्रमो हि नाम क्रियैव, शरीरक्रियायाः परिणतिरेव श्रम आख्यायत इति तं—मुख्यतो स्वीकुर्वन्ति श्रमणाः। सिद्धान्तोऽयमति प्राक्तनः, अतएव ब्राह्मणेष्वपि श्रमणपदं श्रूयते, तदेवोररीकृतं श्रीशाक्यसिंहेन बुद्धापरपर्यायेण भगवतेत्यन्यदेतत्। ये तु निराश्रया क्रिया नोत्पद्यन्ते न वा स्थातुं प्रभवन्तीति तदाश्रयभूतं ब्रह्मैव मुख्यमातिष्ठन्ते, शक्तिं क्रियां वा

तस्यैवात्मभूतां मन्यन्ते, ते ब्रह्मैकाद्वयवादिनो ब्राह्मणाः तत्सिद्धान्तश्च विवृतो ऽस प्रकरणे।

## बलस्य मायाप्रकृतिरूपता

इदं च बलं प्रसुप्तमाश्रयेणैकतां गतं तदात्मभूतमेव तिष्ठति। इदानीं तस्य स्वरूपेणैव प्रतिक्षणं परिणतिः, परिणतिस्वभावस्यापरिणमय्य स्थितेरसम्भवात्। तच्च स्वस्वभावेन परब्रह्मणः स्वातन्त्र्येणोत्पन्नयेच्छया, कालेन नित्येन तस्यैव परब्रह्मणो रूपेण परिपक्वविपाकोन्मुखप्राणिकर्मसमुदायेन प्रेरितं वा यदा सर्ग-काले जागर्ति तदा शक्त्यादिरूपेण परिणतं स्वयं परिच्छिन्नमिति स्वाश्रयस्य परब्रह्मणोऽपि परिच्छिन्नतां दर्शयति। यथा तरङ्गा अतिस्वल्पदेशावगाहि भङ्ग इति सुविस्तृतस्यापि समुद्रजलस्य स्वावच्छिन्नतां पृथक्कृत्य दर्शयन्ति। यथा वा गृह-निर्माणार्थं चित्रमित्याद्यनन्तस्याप्याकाशस्य मठाकाशात्पृथक् कृत्येव परिच्छिन्नतामिव दर्शयन्ति। अनन्तमपि मूलतत्त्वं बलसम्बन्धात्परिच्छिन्नमिव भासत इति यावत्। अतएव परिच्छेदापरपर्यायामितिरनेन कृतेति माया पदेन बलमिदं व्यपदिश्यते। परिच्छेदार्थकान्माधातोः साधनार्थे 'या' प्रत्यये मायाशब्द निष्पत्तेः। सति परिच्छेद एव सन्निवेशविशेषस्याकारपर्यायस्य रूपस्याभिव्यक्तेस्तत्सम्बन्धेनैव च तत्र शब्दविशेषस्य नाम्नः प्रवृत्तिरिति नामरूपयोरेवाव्याकृतयोः सूक्ष्मावस्थाया मायात्वमुक्तं श्रीशंकरभगवत्पादैस्तदनन्यत्वाधिरणे—"सर्वज्ञस्येश्वरस्य आत्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य मायाशक्तिः प्रकृतिरिति श्रुतिस्मृत्योरभिलप्येते, ताभ्यामन्यः सर्वज्ञ ईश्वर इति" नामरूपयोरुत्पादिका तत्प्रागवस्थैवात्र मायाभिप्रेताचार्याणाम्। सा च परिच्छेदस्य दर्शयित्री बलरूपैवेति। तत एव नाम रूपयोरविद्या कल्पितत्वं प्रागेवोक्तम्। विद्याविद्या हि मायाया एव वृत्तिरिति स्पष्टं वेदान्तदर्शनपरिशीलिनाम्। व्याख्यातं च भगवत्पादैरपि प्रथमाध्यायचतुर्थपादारम्भगते—'आनुमानिकमप्येकेषाम्' इत्यादि सूत्रे मायाया अविद्यायाश्चैक्यम्। ततश्च न नामरूपे किञ्चिदभिनवं वस्तु—अपि परिच्छेदिका मायैवेयं पूर्वोक्तरीत्या नामरूपे उत्पादयति, ते नामरूपे अपितु स्फुटं परिच्छेदजनके मायापदेनैव व्यपदिश्येते। लोके हि नामरूपाभ्यामेव माया बोधनीया भवति, न सूक्ष्मावस्था लौकिनानां बुद्धावुपारोहतीत्येव भाष्यकृतां तात्पर्यं स्फुटं सिद्ध्यति।

अज्ञानवासनैव जीवानामनादिप्रवृत्ता अविद्येति मन्यमानैरपि तादृश वासनाश्रया

मायाशक्तिरेवेतिमन्तव्यं भवेत्। निराश्रयाया वासनायाः स्थातुमशक्यत्वात्, ब्रह्मणश्च तदाश्रयस्यासम्भवात्। ततश्चाविद्याश्रयमाया जन्यत्वमेव नामरूपयोः पर्यवस्यति।

वस्तुतस्तु परिच्छेदापरिच्छेदाभ्यां चोक्तरीत्या विरुद्धधर्मकम्, वक्ष्यमाणरीत्या ज्ञानापरपर्यायविद्यारूपात्मतत्त्वावरकत्वेन बलमेवेदमविद्या शब्दव्यपदेश्यं शास्त्रेषु। अविद्याया हि भावरूपत्वं महत्यारभट्या साधितं वेदान्तग्रन्थेषु। भावरूपता च मायापदव्यपदेश्ये बलरूप एव पर्यवस्यति। अग्रे प्रकर्षेण कार्यकरणाच्च मायैवेयं प्रकृतिपदव्यवहार्या भवति। प्रकृतिरिति पदं प्रकृष्टा कृतिरिति विगृह्यमाणं स्वयमेव क्रियार्थकं भवति। क्रियाकृतिशब्दयोर्व्याकरणरीत्या भिन्नार्थत्वासिद्धेः। क्रियतेऽनयेति करणव्युत्पत्तावपि क्रियायाः पूर्वावस्थैव सिध्यति, क्रियते-क्रिया निष्पाद्यते आविर्भाव्यते ययेत्यर्थसमन्वयात्। सा च शक्तिरेवेत्यवोचाम। छेदनादि क्रियासाधनेषु कुठारादिद्रव्येषु तु न क्वापि कृतिशब्दव्यवहार इति प्रकृतेर्द्रव्यत्वमातिष्ठमाना भ्रान्ता एव। "प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते।" "मध्यमे रजसि कृश्चति-शब्दस्तमसि स्मृतः।" इत्यादीन्युदाहृतानि पूर्वाणि ब्रह्मवैवर्तपुराण-प्रकृतिखण्ड-वचनान्यपि सर्जनाख्य क्रियायाः पूर्वावस्थारूपतामिव प्रकृते स्फुटं ख्यापयन्ति।

## सत्वादिगुणानां क्रियाशक्तिरूपत्वसाधनम्

सांख्यदर्शने सत्वरजस्तमसां प्रकृतिरूपाणां गुणानां यद्विवरणं दृश्यते तदपि तेषां क्रियारूपतामेवाभिव्यनक्ति। गुणशब्दोऽत्र न वैशेषिकाभिमत-परिभाषित-गुणबोधकः, अपि तु लोके गुणशब्दस्याप्रधान इति रज्जुरिति चार्थद्वये प्रसिद्धिः। तदभिप्रायक एव। सत्वाद्या हि पुरुषस्यैव भोगापवर्गसाधकाः न तु स्वार्थे प्रवृत्ता इति पुरुषं प्रति गुणीभूतत्वाद् गुणा आख्याताः।

यद्वा पुरुषस्य बन्धनार्थं रज्जुरूपा बुद्धिः, सेयमेभिर्गुणैरेव सृज्यत इति रज्जुरूपतयापि रूपकेण व्याख्यातुं शक्यत इति सर्वमेतत्तत्त्वकौमुद्यां श्रीवाचस्पतिमिश्रैः सूत्रभाष्ये विज्ञानभिक्षुभिश्च स्पष्टीकृतम्। तत्र—

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।**
**अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः॥**
**सत्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।**
**गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः॥**

इति हि गुणानां विवरणं सांख्यकारिकायामुपलभ्यते। प्रकाशरूपं सत्वम्,

प्रवृत्तिरूपं रजः, आवरकं च तम इति गुणस्वरूपनिर्देशोऽत्र कृतः। प्रकाशप्रवृत्तिनियमौ अर्थः प्रयोजनं येषामिति व्युत्पत्तेः। प्रयोजनतां चैषां पुरुषस्य भोगापवर्गार्थतया वदन्तीति सांख्यानां परिभाषा। तत्र प्रवृत्तिरूपस्य रजसः क्रियारूपतानुक्तापि सिद्धैव, प्रवृत्तिक्रियाशब्दयोरैकार्थ्यात्। प्रवर्त्यतेऽनेनेति व्युत्पत्या क्रियासाधनत्वमस्येति यदि कश्चिद् विवृणुयात्, तद्वारणाय 'चलं च रजः' इति चलनरूपता द्वितीय–कारिकायां तस्य स्फुटीकृता। उपष्टम्भकपदमपि श्रीवाचस्पतिमिश्रैस्तत्त्वकौमुद्यामेवं व्याख्यातम् यत् सत्वतमसी स्वयमक्रियतया स्वकार्य उत्साहप्रयत्नं कार्येते इति। तस्यायमाशयः, क्रिया हि नाम परत्रैव संक्रान्तावभासत इति पूर्वमेव क्रिया स्वरूपविवरण उक्तम्। तत् स्वयं चलनरूपं रजःसत्वतमसोरप्युपसंक्रम्य ते अपि चालयति-परिणत्या स्वकार्ये प्रवर्तयतीति तदुपष्टम्भकमुच्यते। एवमेव सत्वस्य प्रकाशरूपताप्रकाशकता चेत्युभयम्, तमस आवरणरूपता, आवरकता चेत्युभयं च व्याख्येयम्। स्वयं प्रकाशः, अन्यत्रोपसंक्रान्तस्तु अन्यस्य प्रकाशक इति, स्वयमावरणम्, परस्य त्वावरकमित्युपपत्तिसंभवात्। अतएव दीपः प्रकाशते, दीपः प्रकाशयति, सविता प्रकाशते, सविता प्रकाशयतीति द्वयमप्युपपद्यते। अकर्मिका क्रिया शक्तिरूपैवेति प्राग्व्याख्यातम् ततः प्रकाशत इति शक्तिरेव प्रतीयत इत्यालोच्यम्। ये तु प्रकाशत इति तिङर्थतया तत्रापि व्यापारः प्रतीयत एवेत्यागृह्णीयुः, तैरेवमालोच्यम् पर प्रकाशनं तु प्रकाशयतीति णिचाभिधीयते, तर्हि दीपे सूर्यं वा स्वावस्थित्यतिरिक्तः को नामास्ति स्वप्रकाशानुकूलो व्यापारो यः सविता प्रकाशत इत्यादावभिधेयः स्यात्। अवस्थितिस्तु सत्तारूपा स्वरूपानतिरिक्ता शक्तिरेव। चक्षुर्विषयीभवनमिति चेच्चक्षुर्व्यापारः एषः, न तु सूर्यस्य दीपस्य वा कोऽपि व्यापारः, विषयीकरणं चक्षुषः, विषयीभवनं तु दीपादेरित्यपि वाङ्मात्रम्। विषयीकरणातिरिक्तस्य विषयीभवनरूपस्य कस्यापि व्यापारस्य दर्शयितुमशक्यत्वात्। अवस्थितिरेवोपचारेण व्यापाररूपतया तिङर्थनिर्वाहाय कल्प्यत इति चेत् कामं कल्प्यताम्। वस्तुतस्तु शक्तिरेव तत्राभिधेयेति प्रकाशशक्तिरूपतैव सत्वस्य फलति। इदं च ईक्षत्यधिकरणे भाष्यकृद्भिराचार्यपादैरपि सूचितम् "असत्यपि कर्मणि सविता प्रकाशते" इति व्यपदेशदर्शनात् "सवितृप्रकाशवद् ब्रह्मणे ज्ञानस्वरूपनित्यत्वे ज्ञानसाधनापेक्षानुपपत्तेः" इत्यादिना। अत्र हि दृष्टान्तविधया सवितुः प्रकाश-स्वरूपतोक्तेति स्वरूपभूतशक्तिरूपः प्रकाश इत्येवोक्तं भवतीति। प्रकाशक्रिया-वरणरूपतयैव गुणानां शुक्लरक्तकृष्णरूपताप्येषाम्। "अजामेकां लोहितशुक्ल-कृष्णाम्" इति श्रुतौ बहुत्र पुराणादिषु चोपचरिताप्युपपद्यते। सत्वरूपस्य प्रकाशस्य

शुक्लतया, तमस आवरकस्य कृष्णतया, मध्ये स्थितस्य प्रवृत्तिरूपतया, संघर्षरूपस्य च रजसो रक्ततया तदाकारस्याञ्जस्येनोपपत्तेः। प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् (योगसू. 2।18) इति योगसूत्रे तु क्रियाशब्द एव रजः स्वरूपबोधनाय स्पष्टमुपात्तः। क्रियास्थितिशीलमिति तु चैतन्यस्वभावः पुरुष इत्यादिवद्विकल्पज्ञानाश्रयो निर्देशः। क्रियादिकं शीलं स्वभावो यस्येत्युक्त्या क्रियास्वभावस्य क्रियात्वमुक्तं भवतीति। अस्तु वा क्रिया स्वभावपदेन क्रियायाः पूर्वावस्थारूपाशक्तिः, तत्रापि नास्माकं विरोधः। बलशक्तिक्रियाणामेकरूपताया उक्तत्वात्। सत्वमपि प्रकाशरूपतया व्याख्यातक्रियैव। अभिव्यञ्जनरूपा क्रियैव हि प्रकाशशब्देनाख्यायते। तच्चाभिव्यञ्जनं स्वस्य परस्य वेत्युभयमप्यत्रान्तर्भवति। प्रकृतिस्वरूपान्तर्गतस्य प्रकाशस्य हीदं तत्त्वम्। यावच्च क्रियानुल्वणा भवति, तदीयाधारा नाधिक वेगवती भवति, तावत्सा ज्ञानरूपं मूलतत्त्वं नावृणोतीति तत्र ज्ञानस्वरूपं प्रकाशते—मन्दमन्दक्रियावति सरसीव सूर्यादिप्रतिबिम्बम्। किञ्चिच्चाल्यमान आदर्श इव च मुखादिप्रतिबिम्बम्। उल्वणायान्तु क्रियायां वेगवत्यां तन्न प्रकाशत इति सत्वस्य लघुत्वं प्रकाशरूपता चोच्यते, पुरुषप्रतिबिम्बेन सत्वमपि प्रकाशरूपतां गतमिति। सत्वस्यैव परिणतिर्वृत्तिरूपं ज्ञानमिति स्पष्टं वेदान्तग्रन्थेषु। वेगाभावरूपमेव च लघुत्वम्। गुरुत्वं हि नामाकर्षणक्रिया-ग्रहणयोग्यता। आकर्षणपरिणतिरेव पतनमिति स्पष्टमुक्तं ज्योतिर्विदामग्रेसरैः श्रीभास्कराचार्यैः सिद्धान्तशिरोमणौ—

**आकृष्टि शक्तिश्च मही तया यत्,**
**खस्थं गुरुः स्वाभिमुखं स्वशक्त्या।**
**आकृष्यते तत्पततीव भाति,**
**समे समन्तात् क्व पतत्वियं खे॥—इति।**

निराधारा पृथिवीयमनुक्षणं नीचैः पततीति बौद्धानां खण्डनमात्रं श्रीभास्कराचार्यैः कृतम्। तत्रेयं युक्तिः प्रदर्शिता यत्पतनं नाम न कस्यापि वस्तुनः स्वाभाविकी क्रिया, अपि तु आकर्षणजन्या। उपरि प्रक्षिप्तं लोष्टादि, क्षेप्तुर्हस्तेनोत्पादितायाः क्रियायाः समाप्तौ पृथिवीगतया आकर्षणशक्त्या आकृष्यमाणं पतद् दृश्यते, न तु स्वभावतः। इदं च पृथिव्या आकर्षणं स्वसजातीये गुरूणि द्रव्ये लोष्टादावेव कार्यं करोति, न तु लघुनि तृणादौ सूर्यचन्द्रकिरणादिषु वा तस्याकर्षणग्रहणयोग्यता—नास्तीति। चन्द्रतारादयश्च न पृथिव्याः सजातीयाः अपितु तेजोरूपा इति च तत्रापि पृथिव्या आकर्षणं प्रसरति। पृथिव्यास्त्वाकर्षकं

न किमपि सजातीयमिमां परितो विलोक्यते। इयं हि समन्तात् समे आकाशे स्थिता, आकाशे च नाकृष्टिशक्तिरिति क एनामाकर्षेत्। कुतश्च पतनमस्याः संभवेदिति तदभिप्रायः। शेषकूर्मादिकं तु पृथिव्या विधारकं नैतेऽभ्युपगच्छन्तीति अत्रत्वेतावदेव वक्तव्यम्, यदाकर्षणग्रहणयोग्यतैवोक्तरीत्या गुरुत्वम्। तद्विरोधी च शक्तिविशेष एव लघुत्वमिति तदपि क्रियाया एव पूर्वावस्थारूपम्। श्रीवाचस्पतिमिश्रैरपि कार्योद्गमने हेतुर्धर्मो लाघवम् गौरवप्रतिद्वन्द्वि, यतोऽग्रे ऊर्ध्वगतिर्भवतीत्येव व्याख्यातम्। तमसो गुरुत्वमावरकत्वं च यदुक्तम्—तत्र गुरुत्वस्याशक्तिरूपता व्याख्यातैव। आवरणमपि वैज्ञानिकदृष्ट्या क्रियारूपमेव। एका हि प्रबला क्रिया यदा स्वसमानबलेन क्रियान्तरेण संघृष्यते, तदा द्वयोः क्रिययोर्विलोप इव दृश्यते। समबलेन पुरुषद्वयेन युगपद् विरुद्धयोर्दिशोः समाकृष्टा रज्जुर्नाणुमात्रमपि चलतीति प्रत्यक्षं दृश्यते। तत्र नेयं रज्जुरक्रियेति शक्यं वक्तुम्, पुरुषद्वयेनोत्पादिता हि क्रिया कथमेनां न चालयेत। श्रमश्चाधिकाधिकः क्रमेण पुरुषद्वयेनाप्यनुभूयते—यदि न ताभ्यां क्रियोत्पादिता स्यात्, तर्हि कथं शक्तिक्षयरूपः-श्रमस्ताभ्यामनुभूयेत्। तस्मात् प्रतिक्षणं सा रज्जुः पूर्वदिगवस्थितेन पुरुषेणाकृष्टा पूर्वस्यामपि दिशि प्रसरति, तस्मिन्नेव क्षणे पश्चिमदिगवस्थितेन पुरुषान्तरेणाकृष्टा तावदेव पश्चिमस्यामपि दिशि प्रसरतीति युगपद् विरुद्धदिग्द्वयप्रसरणादेकत्रैव स्थिता दृश्यते, एवं विधस्थल एव प्रतिबध्य-प्रतिबन्धकभावो लौकिकैर्नैयायिकैश्च व्यवह्रियते। वस्तुतो न तस्यां रज्जौ क्रियाया अभावः, अपितु विरुद्धदिग्गमनरूपा अत्युल्वणक्रिया। एवंविधमेव रजसोत्पादितायाः क्रियायाः क्रियान्तरेण तदुत्पादितेनैव नियमनं तम इत्युच्यते। अन्यथा कथं 'सत्वतमसी अक्रिये' इत्यक्रियत्वेनोक्तस्य तमसः-आवरकत्वं सम्भवेदिति सुसूक्ष्ममालोच्यतां सुधीभिः तदित्थमत्युत्कटक्रियारूपं तमः, तच्चोक्तरीत्यैकदिग्गमनरूपं चलनमपि रजोरूपमावृणोति, अत्युत्कटक्रियायां प्रकाशोऽप्युक्तरीत्या न भासते—तरंगमालाकुलिते समुद्रे चन्द्रतारादिप्रतिबिम्बिमिवेति सत्वस्यावरकमिदमुभयोर्विरोधितया गण्यते। एवं चारम्भदशावच्छिन्नक्रिया, कुर्वद्रूपतामालम्बमानैव प्रथमक्षणावच्छिन्ना शक्तिर्वासत्वम्। मध्यां दशामनुप्राप्ते अनुभवविषयतां गता सा रजः, अत्युत्कटतया परस्परोपघातेन विलीनेवानुभव-पथादतिक्रान्ता आवृतेतिव्यवह्रियमाणा तु तम इति एकस्या एव क्रियायास्सम्मूल-भूतायाः शक्तेर्वावस्थाविशेषा इमे सत्वादिगुणाः—नत्वेकान्ततः पृथग्भूता इति सुनिपुणं भाव्यताम्।

प्रकृतिपुरुषसंयोगे पुरुषप्रतिबिम्बभूतस्य प्रकाशस्य क्रमिकं ह्रासमभ्युपगत्येदं व्याख्यातम्। क्रमिकविकासरूपतां त्वभिलक्ष्येत्थमपि व्याख्यातुं शक्यते—यत् प्रलयकाले तमसा आवृते सत्वरजसी, सृष्ट्यारम्भे प्रकृतिक्षोभरूप आवरणभङ्गो भवति, सोऽयं क्षोभः कुतो जायत इत्यत्र बहूनि मतानि प्रकरणस्यास्यारम्भे सङ्केतितानि। स्वभाव एवायं प्रकृतेर्गुणत्रयरूपायाः, स्वरूपपरिणामाख्यः, विरूप-परिणामाख्यं जागरणं च, तदेतदुभयं गुणस्वाभाव्यादेव प्रवर्तते, न तत्र कारणापेक्षेति सांख्यानामभ्युपगमः।

परमपुरुषस्य भगवतः स्वातन्त्र्येणोद्भूता सिसृक्षा पारिणतिं जनयतीति आगमिका मन्यन्ते सम्प्रदायाचार्याश्च। इयं सिसृक्षा न प्रकृतिपरिणतिरूपाया बुद्धेर्वृत्तिः। बुद्धेः प्रकृतिक्षोभात्परमुत्पत्स्यमानत्वात्, अपितु भगवत्यस्ति स्वातन्त्र्यरूपा शक्तिः, तस्यैव सा वृत्तिरिति। अतएव सिसृक्षारूपा भगवत इच्छा मूलशक्तेश्छाया-रूपतयैव निरूपिता आगमेषु, न तु सा महामायाया मायायाः प्रकृतेर्वा परिणतिः, तासां सर्वासामग्र उत्पत्स्यमानत्वात्। अपितु भगवति परमशिवे यत्स्वातन्त्र्यम् सैव मुख्याशक्तिः, तस्या विकास इति तच्छायारूपैव इच्छाशक्तिः, तस्यां यः परमशिवस्य प्रतिबिम्बरूपेण प्रवेशः सैवाज्ञानशक्तिः। नित्यं ज्ञानं साक्षाद्भगवद्रूपम्—यथास्माभी रसप्रकरणे व्याख्यातम्। तस्यैवेच्छायां प्रतिबिम्बनम्, अर्थात् स्रष्टव्यपदार्थपर्यालोचनमिह प्रतिबिम्बरूपं ज्ञानम्। तज्ज्ञानशक्तिरूपेणेह व्याख्यायते-ज्ञाने इदमेतत् किमित्यादि विशेषेण रूपेण प्रवेशः। अर्थात् तस्य ज्ञानस्य तत्तद्रूपेण स्फुरणन्तु क्रियाशक्तिरिति तिस्रोप्येता इच्छाज्ञानक्रियाशक्तयो मूलशक्तेरेव परिणतय आगमशास्त्रे व्याख्यायन्ते। महामायामायाद्यास्तु परत उत्पद्यन्ते- जगत्तत्त्वान्तर्गताः।

इयमेव प्रक्रिया श्रीवल्लभाचार्यपादैः स्वीयशुद्धाद्वैतदर्शनेऽनुसृता। प्रकृति-क्षोभकारणेष्वियमेव बुद्धौ सम्यगुपारोहति।

अन्ये तु वदन्ति प्रकृति पुरुषाविव कालोऽपि नित्यः, तत्प्रेरणया प्रकृतौ क्षोभ इति प्रपञ्चसारे इदमेवोक्तम्। विष्णुपुराणादावपि किञ्चित्प्रक्रियाभेदेनेत्थमेव विवृतम्। प्रलये सर्वेषां प्राणिनां पूर्वकर्मजनिताः संस्काराः, पूर्वज्ञानवासनाश्चापि प्रसुप्ता बीजरूपा अलब्धवृत्तिकास्तिष्ठन्ति, तेषामेव परिपाकोन्मुखतायाम् ईश्वरात्मभूताया मायाया वृत्तिः, परमात्मनि सिसृक्षा भवति। स एव क्षोभ इति वेदान्तिनो विवृण्वते। कालमपि च केचन मन्वते इति। भवतु नाम यथाकथञ्चिद् विचारभेदमात्रमिदम्। सृष्ट्यारम्भे प्रकृतौ क्षोभ इति तु सर्वेषामप्यभिमतम्। जागरणरूपप्रकृतिक्षोभे तमसोऽ पसारणे आवरणभङ्गे क्रिया प्रसरति इति तमसोऽनन्तरं

रजः, सा च क्रिया स्वभावादेव उत्कटतां शान्ततां चालम्बते, सर्वास्वपि क्रियासु तथा दर्शनात्। यदा हि सा उपशान्तेव भवति तदा पूर्वोक्तरीत्या पुरुषबिम्बेन प्रकाशो भवतीति रजसोऽनन्तरं सत्वमिति उभयथापि संभवति, नैषां पूर्वापरीभावो नियतः। विकासह्रासावपि दृष्टिभेदमात्रमित्यपि स्थाने स्थाने व्याख्यायते।

तदित्थं वैज्ञानिकप्रक्रियया क्रियाशक्तिरूपता गुणानां व्याख्याता। तत एव कारिकोक्तमन्योऽन्याभिभवाश्रयजननमिथुनवृत्तित्वमुपपद्यते, तत्र तत्त्वकौमुद्यामुद्धृतानि—

**अन्योऽन्यमिथुनाः सर्वे सर्वे सर्वत्र गामिनः।**
**रजसो मिथुनं सत्वं सत्वस्य मिथुनं रजः।**
**तमसश्चापि मिथुने ते सत्वरजसी उभे।**
**उभयोः सत्वरजसोर्मिथुनं तम उच्यते।**
**नैषामादिः संप्रयोगो वियोगो वोपलभ्यते।**

इति पुराणवचनानि, तट्टीकायां श्रीबलरामोदासीनैरुद्धृतानि देवीभागवते लभ्यमानानि—"अन्योन्याभिभवाच्चैते विरुध्यन्ति परस्परम्, तथान्योन्याश्रयाः सर्वे न तिष्ठन्ति निराश्रयाः।" "यथा स्त्री पुरुषश्चैव मिथुनं च परस्परम्। तथा गुणाः समायान्ति युग्मभावं परस्परम्।" इत्यादीनि वचनानि संगच्छन्ते। न ह्येकान्ततो भिन्नात्मकेन विना परस्यानवस्थानम्, विरोधेऽपि सततं परस्पराश्रयत्वं चेत्यादि घटेत। कदापि पृथक्त्वानुपलब्ध्या एकत्वमेव पदार्थानां साधयन्ति दार्शनिकाः, तद्रीत्याऽत्राप्येकत्वमेव सिध्यति सत्वादीनाम्। एकस्या एव प्रकृतिरूपायाः शक्तेरवस्थाभेदा इमे इत्यभ्युपगमे हि अवस्थानां सूक्ष्मरूपेण शक्तौ सत्कार्यवादे सततमवस्थायित्वादुद्भवे परस्परविरोधित्वाच्चान्योन्यमिथुनत्वमन्योन्याभिभवश्चेत्युभयमप्युपपन्नं भवति। अवस्थाया अवस्थावता सह भेदाभेददृष्टिभेदे न च "सत्वादिगुणवती प्रकृतिः, सत्वादिगुणा एव प्रकृतिः" इत्युभयमप्युपपद्यते तत तत्र निरूप्यमाणम्, भेददृष्ट्या सर्वेषां प्रकृत्याश्रितत्वम्, अभेददृष्ट्या तु अन्योन्याश्रितत्वमित्युपपन्नम्। क्रियावस्थायां पूर्वमारब्धा लघ्वीक्रियैव क्रमेण वेगरूपतामग्रे क्रियान्तरेण प्रतिबद्धोपरूद्धतां गच्छतीत्यन्योन्यजननमपि कारिकायामाख्यातम्। यत्तु "अन्योन्यजननम्", अन्यापेक्षयान्यस्य जनकत्वम्, सत्वं हि रजस्तमसी अपेक्ष्येव प्रकाशं जनयति, रजोऽपि सत्वतमसी अपेक्ष्यैव प्रवृत्तमित्यादि रूपेण महद्भिर्व्याख्यायते—तत्रेदमेव वक्तव्यम्-यद् अन्योन्य

मिथुनवृत्तित्वकथनेनैवेदं सिद्धमित्यन्योन्यजननकथनं पुनरुक्तं स्यात्। "अन्योन्य मिथुनवृत्तयः" इत्यविनाभाववासिनः इत्यर्थकतया यदा तत्त्वकौमुद्यां व्याख्यातम्, तदा परस्परमविनाभूतानां स्वकार्यजनने परापेक्षेति नैव वक्तव्यमपेक्षते। यत्तु स्त्रीपुंसयोरिवान्योन्यमिथुनवृत्तिता व्याख्यायते—तत्रोक्तानि पुराणवचनानि नोपपद्यन्ते—तत्र हि द्वयोर्द्वयोरपि तृतीयेण मिथुनत्वमुक्तम्—"नैषामादिः संप्रयोगो वियोगो वोपलभ्यते" इत्यपि चोक्तम् तदेतद्भिन्नयोर्नैवोपपद्यते—भिन्नयोः संयोगस्यानादित्वासंभवात् वियोगाभावस्याप्यसंभवाच्च। तस्मादविनाभावरूपेणैव व्याख्यानं युक्ततरम्। देवीभागवतोक्तः स्त्रीपुंसदृष्टान्तस्तु यथा पुत्रशरीरे स्त्रीपुंसयोरवयवानां परस्परमविनाभूतत्वेन मिथुनीभावः, तथैव गुणानामविनाभावः इत्येव व्याख्येयः। पद्यस्यान्ते 'युग्मभावम्' इति स्वारस्यात्, अग्रे पठितानां पद्यानां स्वारस्याच्चेति। अन्योन्याश्रया इत्यपि च "यदपेक्षा यस्य क्रिया स तस्याश्रयः" इत्येव तत्त्व-कौमुद्यां व्याख्यातम्। ततश्चान्योन्याश्रयाः, अन्योन्यजननाः, अन्योन्यमिथुनाः, इति त्रीण्यपि विशेषणानि एकस्यैवार्थस्य बोधकानीति पुनरुक्तानि स्युः। "त्रिगुणमविवेकिविषयः" इति साधर्म्यकथनेन अविवेकित्वमपीत्थमेव व्याख्यायते, अन्योन्याश्रयवृत्तय इति विसदृशपरिणामे परस्परापेक्षोक्ता। अन्योन्यजननवृत्तयः इति तु सदृशपरिणामेऽपि परस्परापेक्षेत्यादि" व्याख्यानमपि "स्थितस्य गतिश्चिन्तनीया" इति न्यायमेवानुसरति, न तु मनस्तोषकरम्, एकेनैव विशेषणेन सर्वत्रापेक्षायां बोधितायां पौनरुक्त्यस्य दुष्परिहरत्वात्, कारिकाक्षरैस्तादृशार्थस्य सर्वथाप्यसिद्धत्वाच्चेत्यस्मदुक्तप्रक्रियैव कारिकायाः पुराणवचनानां च व्याख्यानम् न्याय्यमिति विवेचयन्तु सुधियः। तत्त्वकौमुद्यामपि च 'अन्यतमोऽन्यतमं जनयति' इतिपाठः क्वचिदुपलभ्यत इति टीकाकृद्भिः श्रीबालरामस्वामिभिरुक्तम्। तैः स पाठो अनादृत इत्यन्यदेतत्। एवं परस्परजनने गुणानां नित्यत्वं भज्येत, गुणरूपैव च सांख्यमते प्रकृतिरिति तस्या अप्यनित्यत्वं प्रसज्जेतेति तु न शंकनीयम्। प्रवाहनित्यताया एव प्रकृतौ गुणेषु चेष्टत्वात्। उद्भवतिरोभावशालिन्याः कूटस्थनित्यत्वासंभवात्। अन्योन्यमुत्पादकत्वेऽपि प्रवाहनित्यताया न क्षतिः सततमेकोऽपरमुत्पादयन्नेवास्त इत्येव हि प्रवाहनित्यता। यथा चास्माभिः क्रियायाः शक्तेर्वा अवस्थाविशेषा गुणा आख्याताः तथा प्रवाहनित्यता स्फुटैवेत्यालोच्यं सुसूक्ष्मम्। क्रियावस्थायामपि च सर्वमेतदुपपद्यते। यद्यपि 'कर्म-कर्म साध्यं न विद्यते' इत्यादिना भगवता कणादेन वैशेषिकसूत्रेषु क्रियायाः क्रियान्तरजनकत्वं क्रियान्तराश्रयत्वं च निराकृतम्, तदेतत्पृथक् पृथगवस्थितस्य कर्मण एव स्वाभाव्यं तेन विवृतम्, आश्रये स्थिता

धारावाहित्वं प्राप्ता तु क्रिया क्रियान्तरं जनयत्यपि आश्रयाश्रयिभावं परस्परविरोधित्वेन परस्पराभिभावकतामपि च प्रयातीति स्फुटं पूर्वोपदर्शिते समबलपुरुषाकृष्ट-रज्जुदृष्टान्तेऽनुभूयते। क्रियया वेग उत्पाद्यते, वेगस्तु पुनः क्रियान्तरं जनयति इति तेनापि भगवता तत्रैवोररीकृतम्। वेगश्चायं क्रियाया न पृथग्भूतः, अपि तु क्रियाया एव धारावाहिकतेत्यनुपदं विशदीकरिष्यामः। ततश्च धारावाहिकतां गतायां क्रियायामन्योन्यजनकता क्रियया वेगः, वेगेन क्रियेत्यादिरूपा, समबलाकृष्टरज्जुदृष्टान्ते पूर्वोक्तेऽन्योन्याभिभवः। वस्तुत एकत्रैव धारावाहित्वेन स्थितत्वाच्चान्योन्यमिथुनत्वमिति सर्वं बुद्धावुपारोहति।

## ज्ञानसुखादीनां क्रियारूपता

"प्रीत्यप्रीतिविषादात्मका" इति च सांख्यकारिकायामध्यात्मं रूपं गुणानां सर्वसंवेद्यमुक्तम्। ज्ञानेच्छासुखदुःखाद्याः सर्वा अपि मनोवृत्तयो मनोव्यापाररूपा मानस्यः क्रिया एव। वर्तनम्—तत्तद्रूपेणाविर्भवनमेव वृत्तिरिति न क्रियात्वमतिक्रामति। मनसो व्यापार एव मनः परिणामः, सैव च मनोवृत्तिरूपं ज्ञानम् इच्छाद्याश्च सर्वा अपि मानस्यः क्रियाः। यद्यपि समन्वयाधिकरणे श्रीशंकरभगवत्पादैः ननु ज्ञानं नाम मानसी क्रिया, न, वैलक्षण्यात्। क्रिया नाम सा, यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते, पुरुषव्यापाराधीना च। यथा—"यस्मै देवतायै हविर्गृहीतं स्यात्, तां मनसा ध्यायेद् वषट् करिष्यन्" इति सन्ध्यां मनसा ध्यायेद्। इति चैवमादिषु। ध्यानं चिन्तनं यद्यपि मानसम्, तथापि पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यम्। पुरुषतन्त्रत्वात्। ज्ञानं तु प्रमाणजन्यम्। प्रमाणं च यथाभूतवस्तुविषयम्, अतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यम्। केवलं वस्तुतन्त्रमेव तत्, न चोदनातन्त्रम्। नापि पुरुषतन्त्रम्, तस्मान्मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यम्। यथा च "पुरुषोवाव गौतमाग्निः" योषावाव गौतमाग्निः। इत्थं योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति, केवलं चोदना जन्यत्वात्तु क्रियैव सा, पुरुषतन्त्रा। तर्हि प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेव तत्, न क्रिया। एवं सर्वप्रमाणवस्तुषु वेदितव्यम्, इति ज्ञानस्य क्रियारूपता सयुक्ति सुस्पष्टं निराकृता, तथापि वस्तुयाथात्म्यज्ञानस्य पुरुषाधीनत्वाभावेन न विधेयता सम्भवतीति ज्ञानस्य विधेयतां ये वदन्ति पूर्वमीमांसकाः, तच्छेषतया च ब्रह्मणः क्रियाशेषत्वमेवातिष्ठन्ते, तेषां निराकरण एवाचार्याणामाशयः, न तु ज्ञानस्य क्रियारूपताखण्डने। चित्तवृत्तिरूपस्यैवोपासनस्य क्रियात्वं तु तैरप्यभ्युपगतमेव। तथा च मनोवृत्तिरूपत्वाविशेषेऽपि

ध्यानमुपासनम् वा क्रिया, वस्तुयाथात्म्यज्ञानं तु न क्रियेति वक्तुमशक्यमेवेति। तस्मात्पुरुषतन्त्रत्वाभावबोधन एव तात्पर्यमवसेयम्। तावतैव विधिविषयत्वं निराकृतमिति। व्याख्यातं च तत्रैव मान्यतमैः सर्वैर्व्याख्याकृद्भिः। "ऊतोवस्तुविषयस्य ज्ञानस्य क्रियात्वेऽपि न चोदना जन्यत्वम्, न वा पुरुषतन्त्रत्वम्, अपितु प्रमाणवस्तुपरतन्त्रत्वम्" इति पञ्चपादिकायां श्रीपद्मपादा मानसक्रियात्वेनाविशेषेऽपि ज्ञानध्यानयोर्गोबलीवर्दन्यायेन भेद इत्यभिप्रायः इति भाष्यभावप्रकाशिकायां श्रीचित्सुखमुनयः। सत्यं ज्ञानं मानसी क्रिया, नत्वियं ब्रह्मणि फलं जनयितुमर्हति, तस्य स्वप्रकाशतया विदिक्रियाकर्मत्वानुपपत्तेरित्युक्तम्। तस्माद् ब्रह्मज्ञानं मानसीक्रियापि न विधिगोचरः इति भामत्यां श्रीवाचस्पतिमिश्राः। यदि तावत् प्रमाणजन्यज्ञानस्य कामादेरिव मनः परिणाममात्रत्वात् मानसक्रियात्वमधीयते, तदिष्टमेव, अस्माकमपि ब्रह्माकारान्तःकरणवृत्तेस्तत् परिणामत्वाभ्युपगमात्। न त्वेतावता भवदभीष्टसिद्धिः, तस्याः कामादिवदपुरुषतन्त्रत्वेनाविधेयत्वात्, अन्यथा कामादेरपि तत्प्रसंगाच्च इति वार्तिकम्। एतदग्रे वार्तिककृता य उपसनादेर्ज्ञानत्वमेव नेच्छन्ति, तेषां सपरिकरं खण्डनं कृतम्। अन्ते च उभयोरपि 'मनःपरिणामत्वेन क्रियात्वात्' इत्युपसंहृतम्। तस्माद् ज्ञानमेव तत्, न क्रिया इति भाष्याक्षराणां न विधेया क्रिया इत्येव तात्पर्यं सर्वैर्मान्यैर्व्याख्याकृद्भिर्निरूपितम्। "ज्ञानजन्या भवेदिच्छा इच्छाजन्या कृतिर्भवेत्, कृतिजन्यं भवेत् कर्म" इति नैयायिकनिरूपितस्यानुभवसिद्धस्य ज्ञानेच्छाप्रयत्नक्रियाणां कार्यकारणभावक्रमस्य वस्तुयाथार्थ्यज्ञाने नास्ति सम्भवः, क्रियाजनकप्रयत्नजनिकाया इच्छाया अपि जनके ज्ञाने कृतिजन्यक्रियारूपता न स्वप्नेऽपि सम्भावयितुं शक्येति। कृतिजन्यत्वमेव यथार्थज्ञानस्य भाष्यकृद्भि- र्निराकृतम्। कृतिविषय एव च विधिः सम्भवतीति न विधेस्तत्र प्रवेश इत्येतावदेव भाष्यतात्पर्यम्। न तु ज्ञानस्य क्रियात्वमेव नास्तीति। स्वयमेव भाष्यकृद्भिः ईक्षत्यधिकरणावतरणे नहि सर्वदा सर्वविषयज्ञानं कुर्वदेव ब्रह्म वर्तते तथा ज्ञानस्य नित्यत्वे ज्ञानक्रियां प्रति स्वातन्त्र्यं ब्रह्मणो हीयेत। अथानित्यं तदिति ज्ञानक्रियाया उपरमेतापि ब्रह्म, तदा सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वमापतति इति सांख्यपूर्वपक्षोपपादनेन सात्विकवृत्तिरूपस्य ज्ञानस्य क्रियात्वं शक्तित्वं च व्यवहितम्। न च तत्सिद्धान्तोपपादने खण्डितम्, प्रत्युत नासाक्षिका सत्ववृत्तिर्जानाति नाभिधीयते, न चाचेतनस्य प्रधानस्य साक्षित्वमस्ति। असत्यपि कर्मणि सविता प्रकाशते इति कर्तृत्वव्यपदेश दर्शनात्। एवमसत्यपि ज्ञानकर्मणि ब्रह्मणस्तदैक्षतेति कर्तृत्व व्यपदेशोपपत्तेर्न वैषम्यम् इत्यादिना

ज्ञाननिरूपितकर्तृत्वकर्मत्वाद्याचक्षाणैर्वृत्तिरूपज्ञानस्य क्रियात्वमुररीकृतमेव, नहि क्रियात्वाभावे तन्निरूपितकर्तृत्व-कर्मत्वाद्युच्येत। यत्सम्बन्धाच्च ब्रह्मण्यपि वृत्तिसम्भवः, सा मायाग्रिमे समुपन्यस्तेति। यद्वा प्रमाणेन जनिता मनोवृत्तिः सत्येति तत्र मुख्यं ज्ञानं ब्रह्मरूपं झटिति प्रतिबिम्बति-सत्यस्वरूपत्वाद् ब्रह्मणः। तथा च इयं मनःपरिणतिरूपावृत्तिः, अयं चेदानीं तत्प्रकाश इति भेदग्रहस्य न तत्र सम्भवः, सूक्ष्मत्वात् कालस्य, सत्यपक्षपातित्वाच्च धियाम्। तेन ज्ञानरूपेणात्मना भेदाग्रहात् इदं ज्ञानमेव, न वृत्तिरूपा क्रिया तत्र पृथग् भासत इत्यपि भाष्य-तात्पर्यमुन्नेतुं शक्यम्। उपासनादौ तु पूर्वं विधिजन्ययथार्थं ज्ञानम्, तदनु एवं कुर्यामितीच्छा, ततः प्रयत्नेन तथाविधवृत्तिसम्पादनम्, ततस्तत्र मुख्यज्ञान-प्रतिबिम्बनमिति, तत्र क्रियात्वमव्याहतमेव। मुख्यं हि ज्ञानमात्मस्वरूपमेवेति मूलतत्त्वस्य ज्ञानरूपनिरूपणे प्राक्प्रत्यपीपदाम। तदेव यथार्थज्ञाने झटिति भासत इति मनोवृत्तेरपि तत्पार्थक्याग्रहणान्न क्रियात्वमवधीयते। इदमपि ईक्षत्यधिकरणे "नासाक्षिका सत्ववृत्तिर्जानाति नाभिधीयते, न चाचेतनस्य प्रधानस्य साक्षित्वमस्तीति" भाष्यकारैरभिव्यञ्जितमेव। साक्षिचैतन्यं तत्र झटिति प्रतिबिम्बतीति तात्पर्यात्। इदमेवाभिलक्ष्यागमशास्त्रीये वरिवस्यारहस्ये 'इच्छामि, जानामि', इत्यादावुत्तमपुरुषान्तर्भासमानं स्फुरणान्वयिज्ञानमेव प्रकाशविधं ब्रह्म इति श्रीभास्करायैः "स जयति माहान् प्रकाशः" इति प्रथमपद्यव्याख्यान एवोपन्यस्तम्। वैयाकरणनैयायिकोक्तदिशा ज्ञानेच्छानुकूलो व्यापारः, तदनुकूलाकृतिर्वा आख्यातार्थे ज्ञाधाताविषुधातौ वा न सम्भवति, ज्ञानेच्छयोः कृतिजनकत्वेन कृतेर्व्यापारस्य वा तज्जनकत्वासम्भवात्। विशेषतश्चोत्तमपुरुषे, नहि पचामीत्यादौ पाकानुकूलं व्यापारमनुतिष्ठामीत्यादिवज्ज्ञानायेच्छायै वा व्यापारमारभे–इति कस्याप्यनुभवोऽस्ति, ज्ञानस्येच्छाया वा आविर्भावानन्तरमेव 'जानामि', 'इच्छामि' इत्याद्यनुभवो जायते। न चाकर्तृके एव ज्ञानेच्छे प्रतीयेते इत्यपि वक्तुं शक्यते, आख्यातान्तशब्दप्रयोगस्यानुपपत्तिप्रसंगाद्, अनुभवविरोधाच्च। अनुभवेऽपि हि ज्ञानस्येच्छाया वा कश्चिदवलम्बः प्रतीयत एव। तस्मात्प्रकाशरूपो मुख्य आत्मेवात्राश्रयरूपेण भासते, तत्रैव च शब्देन भासमाना व्यापारकृत्यादय उपचारेण कथञ्चिदुपपाद्या इत्यपि स्वीकरणीयं स्यात्। अलमतिप्रसक्तानुप्रसक्त्या। मुख्यं ज्ञानमात्मस्वरूपं नित्यम्, मनोवृत्यात्मकन्तु ज्ञानं मनसः परिणतिरिति क्रियात्वं नातिक्रामति, मुख्यामुख्यशक्तिरूपमनोवृत्तिरूपा तु क्रियैवेति स्फुटमुपपादितम्, मान्यानां ग्रन्थकृतां सम्मतिश्चापि तत्र प्रदर्शितेति।

ननु कृतिजन्यत्वनिराकरणेन क्रियात्वमपि निराकृतप्रायमितिचेन्न शरीरक्रियाणामपि निश्वासादीनामनन्तरं परिपाकादीनां कृतिजन्यत्वाभावेऽपि क्रियात्वं न केनापि निराकर्तुं शक्यमिति तद्वदेव मानसानामपि ज्ञानेच्छादीनां वृत्तिरूपाणां क्रियासामान्ये प्रवेशो न निवारयितुं शक्यः। नैयायिका हि देशत्यागमेव क्रियालक्षणमुपगच्छन्तीति ते ज्ञानादीनां क्रियात्वं नाचक्षते, तथापि क्रियापर्यायान् क्षणिकत्वादींस्तत्राप्युपयन्त्येव। ये त्वन्ये दार्शनिकाः परिणतिमपि क्रियामेव मन्यन्ते—तन्मते मनोवृत्तीनां हर्षसुखादीनामपि च मनःपरिणतिरूपाणां क्रियात्वमव्याहतमेव। ततश्च हर्षदुःखविषादादीनामपि मानसक्रियात्वम्, त एव च कारिकायां सत्वादिगुणरूपतया व्याख्याता इति तेनापि सत्वादीनां क्रियात्वम्, क्रिया प्रागवस्थारूपशक्तित्वमेव वा सिध्यति, प्रीतिपदवाच्यं सुखं यद्यपि वेदान्तेष्वात्मस्वरूपतयाम्नायते, आनन्दस्य तत्र ब्रह्मरूपतया विवरणात्, तस्यैव च सुखपदवाच्यत्वात्, तथापि ज्ञानेच्छादाविवात्रापि अनुकूलप्राप्त्या सुखाकारान्तःकरणवृत्तिः पूर्वमुदेति, तत्र चानन्द आत्मा प्रतिबिम्बत इत्येव क्रम उररीक्रियते दार्शनिकैः। रजसा चाञ्चल्यमाप्ते मनसि आत्मानन्दो न प्रतिबिम्बतीति आनन्दप्रतिरोधकत्वाद् रजसो दुःखरूपताख्यायते। उत्कटायां च क्रियायां पूर्वोक्तप्रकारेण रजोरूपं दुःखमपि न भासते, आनन्दप्रतिबिम्बस्य तु कथैव केति तत्रावसादो गुरुत्वं मनसा भवति। तत्तमोविषादरूपम्। सत्वे तु प्रारम्भिकी अत्यल्पा क्रियेति तत्रात्मरूप आनन्दः प्रतिबिम्बति, ततः सत्वस्य सुखरूपताख्यायते, वृत्तिरूपसुखं वेद्यं भवति, स्वरूपभूत आत्मानन्दस्तु न वेद्यः, स केवलं सुखरूपवृत्तिप्रकाशक इत्याद्या दार्शनिकी प्रक्रियाऽनुसन्धेया। एताः सुखदुःखविषादरूपा वृत्तयो बाह्यानां येषां विषयाणां सम्बन्धेनाविर्भवन्ति, तेषु विषयेष्वपि सुखदुःखमोहादित्रयमनुस्यूतं सांख्याः मन्यन्ते।

सर्वेऽपि विषयाः सुखदुःखमोहेतित्रैगुण्येन समनुविद्धाः। तत्र कञ्चित् पुरुषं प्रति कस्यचित् विषयस्य कदाचित् सुखरूपेण समुद्भवः। अपरं प्रति तस्यैव दुःखरूपेण, कञ्चित् प्रति च मोहरूपेण समुद्भवः इति। यथा काचित् सुन्दरी स्त्री स्वपतिं सुखयति, सपत्नीर्दुःखयति, पुरुषान्तरं तामविन्दमानं च मोहयति इति श्रीवाचस्पतिमिश्रैः "अनयास्त्रिया सर्वे भावव्याख्याता" इति तत्त्वकौमुद्यामुक्तम्। अत्र तामविन्दमानं पुरुषान्तरं सा मोहयतीत्युक्त्या मोहस्य दुःखजनितावसादरूपता दुःखातिशयरूपता, तथा चोत्कटरूपता तैरभिव्यञ्जिता, तेनास्मदुक्ता प्रक्रिया प्रमाणीभवति। एवं सुखाद्यन्तरवृत्तिजनकत्वाज्जन्यजनकयोश्चाभेदाध्यवसायेन विषयाणामपि सुखादिरूपता सांख्यग्रन्थेषु व्याख्यायते। पुराणेषु तु प्रायेणान्तर-

वृत्तितयैव सुखादीनां व्याख्यानं दृश्यते, श्रीमद्भगवद्गीतायामपि च। वेदान्तिनश्च विषयाणां सुखादिरूपतां निराकृत्य सुखादीनामान्तरत्वेन मनोवृत्तितामेवाचक्षते। लघुत्वचलत्वगुरुत्वादिधर्मैस्तु बाह्येषु वस्तुषु सत्वादिगुणानुस्यूतता तद्रीत्या व्याख्येया। अहंकार एव सांख्यमते मनस इन्द्रियाणां बाह्यानां विषयाणां च मूलमिति मनसो बाह्यैर्विषयैरेकमूलता तु सिद्ध्यत्येव, ततश्चान्तःकरणवृत्तिरूपाः सुखाद्या यथा अहंकारस्यैव परम्परया जन्या इति मूलेऽहंकारे तन्मूले महत्यपि च तेषां स्वीकारः सांख्यैः कृतः कार्यकारणयोरभेदात्, ततश्च तत्कार्येषु बाह्येषु भूतादिष्वपि सुखाद्यनुविद्धता तद्रीत्या सिद्ध्यत्येवेत्यास्तां तावत्। सांख्यप्रवचनभाष्योद्धृते (1 अध्या., 127 सू. भाष्ये) श्रीपञ्चशिखाचार्यवचने अन्या अपि मनोवृत्तयः सत्वादिरूपतयोक्ताः, "सत्वं नाम प्रसादलाघवाभिष्वंगप्रीतितितिक्षासन्तोषादि-रूपानन्तभेदम् समासतः सुखात्मकं, एवं रजोऽपि शोकादिनानाभेदं समासतो दुःखात्मकम्, एवं तमोऽपि निद्रादिनानाभेदं समासतो मोहात्मकमिति"। एवं च मनोवृत्तिरूपतया क्रियारूपत्वं सत्वादीनां स्फुटं भवतीति।

यत्तु विद्वत्प्रवरैः श्रीबालरामस्वामिभिस्तत्त्वकौमुदीव्याख्यायाम् "प्रीत्यप्रीति-विषादात्मकाः" इति कारिकापदम्—आत्मशब्दस्य स्वभावमर्थमङ्गीकृत्य प्रीत्यप्रीति-विषादस्वभावा तद्धर्मकाः सत्वादिगुणाः, अर्थात् सुखादिमन्तो धर्मिरूपा इति प्रसाधितम्, तदेतदनवधानात्। आत्मशब्दो हि मुख्यतया स्वरूपबोधक एव, तत एव ईक्षत्यधिकरणे 'गौणश्चेन्नात्मशब्दात्' इति वादरायणीयसूत्रं भगवत्पादकृतं तद्भाष्यं च संगच्छते "तदैक्षत एकोऽहं बहुस्याम" इत्यादौ श्रुतमीक्षितृत्वं गौणम्—औपचारिकम्, अतः प्रधानमेव जगत्कारणमिति सांख्यानां पूर्वपक्षं निराकर्तुमिदं सूत्रं प्रवर्तते। "अनेन जीवेनात्मनानुप्रविश्य" इति श्रुतौ पूर्वोक्तेनेक्षण-कर्त्रा जीवस्य स्वात्मकत्वमुक्तम्, तदेतन्नोपपद्यते, ईक्षणस्य गौणत्वमङ्गीकृत्य प्रधानस्य जगन्मूलत्वसाधने सूत्राशयः। "आत्मा हि नाम स्वरूपम्, न चाचेतनस्य प्रधानस्य चेतनो जीवः स्वरूपं भवितुर्महति", इति तत्र भाष्यम्। उक्तरीत्या तु "आत्मना सत्वगुणपरिणामरूपतया स्वभावेनस्वधर्मेण चैतन्यरूपेण जीवेनानुप्रविश्य" इति सांख्यमतेऽपि श्रुति व्याख्यानसम्भवेन सूत्रं तद्भाष्यं च सर्वथा व्याकुप्येत। तस्मान्मुख्यतया-स्वरूपबोधक एवात्मशब्दः। श्रीबालारामोद्धृते विश्वकोशे तु क्रमेण लोके प्रसिद्धिं गता लाक्षणिका आप्यर्थाः संगृहीताः। देहस्यापि हि तत्रात्मशब्दार्थत्वमुक्तम्-तच्चैकान्तत आस्तिकदर्शनशास्त्रविरुद्धमिति न स कोशो दार्शनिकनिरूपण उपयोगमावहति। तेन सुखादिरूपतया धर्मत्वमेव सत्वादीनां

गुणानां सम्भवति, न तु धर्मित्वम्। व्याख्याता च धर्मरूपतैव तेषां पुराणेषु आगमेषु आप्तैर्ग्रन्थकृद्भिश्च। यथा हि–

**पावकस्योष्णतेवेयमुष्णांशोः पूर्वदीधितिः।**
**चन्द्रस्य चन्द्रिकेवेत्थं मायेयं सहजा ध्रुवा॥**

इति शक्तिप्रकरण उदाहृतपूर्वम्। देवीभागवते च मायाधर्मरूपतया उष्णतादिदृष्टान्तेन स्फुटैरक्षरैरुक्तमायाप्रकृत्योस्तत्रैकत्वमेवेति च तस्मिन्नेव प्रकरणे साधितम्। एवं पुराणान्तरेष्वपि तत्रोदाहृतेषु अग्नेर्दाहकतेवेत्यादि शक्तिदृष्टान्त उक्तो धर्मरूपतामेव शक्तेः साधयति, सैव च शक्तिरग्रे प्रकृतिरूपेण पुराणेषु विवृतेति तस्या अपि धर्मरूपत्वमेव पुराणाभिमतं सिद्ध्यति। आगमशास्त्रेऽपि शक्तिरूपैव प्रकृतिः सर्वत्राख्यायते। यथोक्तं प्रपञ्चसारे–

**प्रधानमिति यामाहुर्या शक्तिरिति कथ्यते।**
**(1 पटले, 26 श्लो.)।**

शक्तिश्च धर्मरूपैव भवतीति न कस्याप्यत्र विवादः स्यात्। योगदर्शनेऽपि– "दृग् दर्शनशक्त्योरेकात्मतेषास्मिता" (योगसू. पा. 2 सू. 6)। "स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः" (यो. पा. 2, 23 सू.) इति सूत्रयोः शक्तिपदेनैव प्रकृतिस्तत्परिणतिभूता बुद्धिश्चोक्ता। पुरुषो दृक्शक्तिः, बुद्धिर्दर्शनशक्तिः, अनयोरेकाकारतापत्तिरेवास्मिताक्लेश उच्यते" इति प्रथमसूत्रभाष्यम्। "पुरुषः, स्वामी दृश्यते, स्वेन दर्शनार्थं संयुक्तः, तस्मात्, संयोगाद् दृश्यस्योपलब्धिर्या स भोगः" इति च द्वितीयसूत्रे। अत्र प्रथमसूत्रे बुद्धेः, द्वितीयसूत्रे प्रकृतेः शक्तिपदेन ग्रहणं स्पष्टमेव। पुरुषोऽपि स्वयं निर्धर्मकः, प्रकृत्योत्पादितेषु धर्मितया भासमानेषु सांसारिकेषु तत्त्वेषु जीवादिषु "चैतन्यं धर्मरूपेणैव भासत" इति तस्यापि शक्तिपदेनैव योगसूत्रेषु व्यवहारः कृतः। पुरुषो ज्ञानशक्तिः, स एव मुख्यज्ञानमिति बहुशो निरूपितं प्राक्। प्रकृतिस्तु क्रियाशक्तिरित्युभयोः सम्मेलनमेव जगद्रूपेण विजृम्भत इति सांख्ययोगयोर्मतम्। तेन धर्मा एव धर्मितां गच्छन्तीति तन्मतसारः। शक्तिभूतायां प्रकृतौ तु न धर्मान्तरकल्पनावकाश इति प्रकृत्यंशभूतानां सत्वादीनां कथं धर्मित्वं स्यात् अथ "विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि, इति (यो. सू. 2।19) गुणानामेव स्वरूपमाख्यातुं प्रवृत्ते सूत्रे चत्वारि पर्वाणि सत्वादीनां गुणानां व्याख्यातानि। अत्र स्थूलाज्जगतः सूक्ष्मदशायां प्रवेशयितुं कार्यरूपं प्रथममुदाहृतम्, अन्तिमं तु रूपमत्रमुख्यम्। तन्त्रान्तिमतयाख्यातमलिङ्गं गुणानां स्वरूपम्,

निःसत्तासत्तमिति भाष्यकृता व्याख्यातम्। तद्धि सत्वेन, असत्वेन वा वक्तुमशक्यम्, अग्राह्यत्वात्। बुद्धिरूपेण परिणतमेव तद् ग्राह्यं भवति, न तु प्रकृतिः स्वस्वरूपेण ग्राह्या भवति, केवलं बुद्धिजनकत्वेनानुमेया सेति तदभिप्रायः। तदेव गुणानां मुख्यं रूपम्। तद्यदि धर्मिस्यात्, कथमग्राह्यं निःसत्तासत्तं चोच्येत, धर्मिणो धर्मैः सदैव ग्राह्यत्वसम्भवात्। द्वितीयं रूपं यत्सूत्रे तृतीयपर्वतया लिङ्गपदेनोक्तम्, तृतीयं च रूपं द्वितीयपर्वतया अविशेषपदेन सूत्रोक्तं तदेतत् शब्दस्पर्शादितन्मात्राः, अहंकारश्चेति भाष्ये व्याख्यातम्। ते एते द्वे अपि रूपे स्वयं धर्मरूपे निर्धर्मके इत्यपि स्फुटम्। प्रथमपर्वतया विशेषपदेनोक्तम् स्थूलं रूपमेव धर्मितया लोके प्रतीयते। तेन प्रकृतेरंशाः सत्वादिगुणा मुख्यैस्त्रिभी रूपैर्धर्मरूपा एव भवन्ति।

त एव स्थूलतायां धर्मितया व्यवह्रियन्ते इति सुस्पष्टीभवतीति। तत्प्रकृतिरूपतायां धर्मित्वेन निरूपणं न कथमपि संगच्छते। एवमेव स्थूलभूतानां पञ्चरूपतया व्याख्यायते, "स्थूलस्वरूपसूक्ष्मान्वयार्थवत्वसंयमाद् भूतजयः (यो. सू. 3।44) इति सूत्रेऽपि भूतानां प्रथममेव स्थूलं रूपं धर्मितया व्याख्यातं भाष्यकृता। द्वितीयाद्यानिरूपाणि तु धर्मा एव, चतुर्थं रूपमन्वयपदेनोक्तम् ज्योतिःक्रिया-स्थितिशीलागुणाः कार्यस्वभावानुपातिनोन्वयशब्देनोक्ताः, इति भाष्यकृता व्याख्यातम्। तेनापि धर्मरूपतैव गुणानां स्फुटीभवति। किं च प्रकृतेः प्रथमः परिणामो बुद्धिरिति सांख्ये ख्याप्यते। तस्याश्च स्वरूपम् धर्मो ज्ञानं विराग ऐश्वर्यमिति सात्विकम्, अधर्मः, अज्ञानम् अवैराग्यम्, अनैश्वर्यम्, इति च तामसमुक्तं सांख्यकारिकायाम्। त एते सर्वेऽपि धर्मरूपा एव, तमसोरूपचतुष्टयं यदुक्तम्-तदेव अवैराग्यं रागद्वेषपदाभ्यां द्विधा व्याख्याय, अनैश्वर्यमस्मितापदेनोक्त्वा, अधर्मं चाभिनिवेशपदेन परिवर्त्य अविद्या-अस्मिता-राग-द्वेषाभिनिवेशा इति पञ्चक्लेशतया योगदर्शने निरूप्यते। तेषां चैषां पञ्चानां क्लेशानां प्रसुप्त तनुविच्छिन्नो-दाराख्याश्चतस्रो वृत्तय आख्याता योगसूत्रे, ता एव वृत्तयो विचार्यमाणा न केवलं धर्मत्वमेव, प्रत्युत क्रियात्वमपि क्लेशानां व्यञ्जयन्ति, क्रियाया एव प्रसुप्ततनु-विच्छिन्नतादिवृत्तिसम्भवादिति बुद्धिरूपाणां क्लेशानां सिद्धे क्रियात्वे तत्प्रकृतेः क्रियात्वं केन वार्यताम्? एवं तेऽव्यक्तसूक्ष्मा गुणात्मानः (यो. सू. 4।13) इति सूत्रभाष्ये "ते खल्वमीत्र्यध्वानो धर्मा वर्तमाना व्यक्तात्मानः—सर्वमिदं गुणानां सन्निवेशविशेष इति परमार्थतो गुणात्मानः" इति गुणानां धर्मरूपता कण्ठत एव भाष्यकृतोक्ता। सांख्यकारिकास्वपि प्रधानानुमानकथने "भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च, 'कारणमस्त्यव्यक्तम्' (सां. का. 15-16) इति

कारिकाया शक्तितः प्रवृत्तेः इति योऽयं हेतुरुपात्तः, स इत्थमेव व्याख्यातुं युक्तः यत्सर्वाणि कार्याणि शक्त्या प्रवर्तन्ते, स्वकार्यजननसमर्थानि भवन्ति इति सर्वैरेवाभ्युपगन्तव्यम्। अशक्तस्य कार्योत्पादनानुपपत्तेः। सा च शक्तिर्न सांख्यमतेऽतिरिक्तं तत्त्वम्, अपितु कारणं यत्कार्येऽनुस्यूतं तदेव कार्ये शक्तिरूपं भवति तदाश्रित्यैव च कार्यं प्रवर्तते। नह्युपादानकारणं परित्यज्य कार्यस्य किमपि स्वरूपमवतिष्ठते, यत्स्वकार्यं जनयेत्। नहि तन्तून् परित्यज्य पटः प्रवृणुयात्। कार्यस्यानागतावस्था च कारणे शक्तिः, तैलमनागतावस्थं तिलेषु वर्तत इत्येव तिलेषु तैलोत्पादनशक्तिः, न सिकतासु अनागतावस्थं तैलं विद्यते, इति न तत्र तैलोत्पादनशक्तिः।

तदित्थं कार्यकारणयोरेव मिथः शक्तित्वे स्थिते बुद्धिरूपं महत्तत्त्वं यत्स्वकार्यमहंकारं जनयितुं प्रवर्तते, तत्र का नाम भवेत् कारणरूपा शक्तिः, यया तत्प्रवर्तेत, तच्च शक्तिरूपेणानुस्यूतम्। यदि प्रधानं न स्यात्, तर्हि महत्तत्त्वस्य शक्तित्वमपि न स्यात्, कारणस्य कस्यापि तत्रानुप्रवेशाभावाच्छक्तत्वमपि न स्यादिति तत्प्रवृत्तेरनुपपत्तिः प्रसज्जेत्। ततश्च तत्कारणत्वेन प्रधानमवश्यं कल्पनीयम्। तदेव शक्तिरूपेण महत्तत्त्वेऽनुप्रविष्टमितितत्प्रवृत्तिरुपपद्यते। नन्वेवं प्रकृतेरपि कारणान्तरं सिद्ध्येत्, अन्यथा तस्या महत्तत्त्वजनकता न सिद्ध्येदिति-चेन्मैवम्—प्रकृतेः स्वयं शक्तिरूपत्वेन तत्र शक्त्यन्तरान्वेषणं न प्रसज्जत इति। अथ महत एव शक्तित्वं कुतो न स्वीक्रियते-येन प्रधानकल्पनापि न कर्त्तव्या भवेदिति शंकापरिहाराय तत्र 'परिमाणात्', 'समन्वयात्' इत्यादिहेत्वन्तरोपादन-मित्यास्तामप्रकृतम्। प्रकृतेः शक्तिरूपत्वमत्र स्वीकृतम्-तेन धर्मित्वं नोपपद्यते-इत्येवास्माकमभिप्रायः। सांख्यप्रवचनभाष्येऽपि च 'प्रकृतिवास्तवे च पुरुषाध्यास-सिद्धिः' इति (अ. 2, सू. 5)।

**शक्तिशक्तिमतोर्भेदं पश्यन्ति परमार्थतः।**
**अभेदं चानुपश्यन्ति योगिनस्तत्त्वचिन्तकाः॥**

इति कूर्मपुराणवाक्यं विवृण्वता भाष्यकृता विज्ञानभिक्षुणा स्वशक्तौ प्रकृतौ वर्तमानं स्रष्टृत्वादिकं शक्तिमत्सु पुरुषेषूपचर्यते' इति प्रकृतेः शक्तित्वमुपगतम्। श्रीवाचस्पतिमिश्रैरपि तत्त्वकौमुद्यां 'प्रीत्यप्रीतिविषादात्मकाः' इति पूर्वोक्तकारिका-व्याख्याने प्रीतिः—सुखम्, प्रीत्यात्मकः सत्वगुणः इत्यादिना सुखादिरूपतैव सत्वादीनामुक्ता, न तु सुखादिमत्ता। अग्रेऽपि च तैरेव विषयेषु सुखादिरूपाणां व्याकर्तुमुपात्ते पूर्वोदाहृते स्त्रीदृष्टान्ते एकैव स्त्री रूपयौवनकुलसम्पन्ना स्वामिनं सुखीकरोति, तत्कस्य हेतोः, स्वामिनं प्रति तस्याः सुखरूपसमुद्भवात्। सैव स्त्री

सपत्नीर्दुःखीकरोति, तत्कस्य हेतोः, ताः प्रति तस्या दुःखरूपसमुद्भवादित्यादिना त्रिगुणात्मिकायाः स्त्रियाः सुखदुःखरूपेण समुद्भवो नाम परिणाम उक्त इति सुखादिरूपतैव सत्वादीनां व्याख्याता। अत्र च श्रीबालरामस्वामिभिरपि व्याचक्षणैः कान्ताचेतोद्भूतधर्मरूपनिमित्तवशात् कान्तं प्रति कान्तायाः सुखात्मकसत्त्व-गुणात्मकत्वेन प्रादुर्भावादित्यर्थः, एवमग्रेऽपि, इति सत्वादिगुणस्य सुखात्मकत्वम्, त्रिगुणाया स्त्रियाश्चापि सुखरूपेण प्रादुर्भावो व्याख्यातः, न तु सुखवत्वं सत्वस्य व्याकृतम्। एवम्—'सत्वं रजस्तमसी अभिभूय शान्तामात्मनो वृत्तिं प्रतिलभते' इति द्वादशकारिकाव्याख्यानरूपां तत्त्वकौमुदीं व्याचक्षाणैरपि स्वामिभिः 'सुखादिरूपां शान्तां वृत्तिं प्रतिलभते—प्राप्नोति, सुखादिरूपेण परिणमते इति यावद्, इति सुखरूपेण, परिणामः सत्वस्योक्तः। तस्मात् 'प्रीत्यप्रीतिविषादात्मकाः', इत्यस्य व्याख्याने सुखादिधर्मकत्वकथनं तेषां धर्मधर्म्यभेदाभिप्रायेणैव नेयम् वस्तुतो धर्मरूपतैव गुणानामनुसन्धेया।

अथ सांख्यसूत्रभाष्यकृद्भिः श्रीविज्ञानभिक्षुमहाभागैस्तु 'सत्वरजस्तमसां साम्यावस्था प्रकृतिः' इत्यादिसूत्रभाष्ये (1 अं. 16 सू.) तदग्रे च सत्वादीनां स्पष्टतया द्रव्यत्वं व्यवस्थापितम्। सत्वादीनि द्रव्याणि, न वैशेषिका गुणाः, संयोगविभागवचनात्, लघुत्वचलत्वगुरुत्वादिधर्मकत्वाच्चेत्यादिना। अग्रे च लघ्वादिधर्मैः साधर्म्यं गुणानामिति (1 अ. 128 सूत्रभाष्ये) सत्वादीनां प्रत्येकं व्यक्तिरूपेण परिच्छिन्नत्वमुक्त्वा, वैशेषिकोक्तपरमाणुवादादत्र को भेद इत्याशंक्य मूलकारणस्य शब्दस्पर्शादिमत्वमस्माभिर्नोपेयते। वैशेषिकैस्तु परमाणुष्वपि मूलकारणभूतेषु स्पर्शादिमत्वमभ्युपगम्यते-इत्येव भेदो व्यवस्थापितः। नन्वेवं मूलकारणस्य परिच्छिन्नासंख्यव्यक्तिकत्वे वैशेषिकमतादत्र को विशेष इति चेत्, कारणद्रव्यस्य शब्दस्पर्शादिराहित्यमेव—इति तदेतत्सर्वमविचारमूलकमेव। वैशेषिकाणामारम्भवादः, ते हि लघोर्महत आरम्भं प्रथमभूमिकायां शिक्षयन्ति, सांख्यानान्तु परिणामवादः, ते शक्तेरेव मूलतत्त्वतां विकासरूपां तत्परिणतिमेव च द्रव्यादिसर्वं जगद् वैज्ञानिकप्रक्रियया प्रतिजानते। अतएव शब्दस्पर्शादिगुणविरहिताया एवं शक्तेर्विकासरूपेण शब्दस्पर्शाद्युत्पत्तिमाचक्षते। यदि तु शक्तेर्विकासो नाभ्युपगम्यते, तर्हि स्पर्शादिरहितात्कारणात् स्पर्शादीनामुत्पत्तिः कथं सम्भवेत्। कथं च मूलकारणस्य शब्दस्पर्शादिराहित्यं भाष्योक्तमुपपादयितुं शक्येत, आरम्भवादे हि "कारणगुणाः कार्यगुणानारभन्ते" इति प्रक्रियया कार्यद्रव्येषु गुणान् दृष्ट्वा कारणेऽपि तेषामनुमानं स्यादिति वैशेषिका एव विजयेरन्। तस्मात् परिणामवादरूपे

सांख्यदर्शने प्रक्रियैव भिन्ना, नारम्भवादेन तुलयितुमर्हा, हन्त, भाष्यकृद्भिरपि विज्ञानभिक्षुभिराचार्यैरारम्भपरिणामवादयोर्भेदेऽपि नावधानं कृतमित्याश्चर्यम्। भवतु नाम, नास्माकं परदोषनिरीक्षणे प्रवृत्तिः, महतामुक्तिमालोच्य सत्वादिषु द्रव्यरूपतासंदेहो जिज्ञासूनां नोदियादिति तन्मतचर्चात्र कृता। शक्तिरूपैव प्रकृतिरिति तु प्रागेवोपपादितं दृढैः प्रमाणैः। साधर्म्यं वैधर्म्यञ्च सत्वादिगुणानां महदादिभिः पुरुषैश्च यथासांख्यकारिकासु व्याख्याते, ते अपि द्रव्यत्वोपगमे न संगच्छेते।

**हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।**
**सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्॥ (सां. का. 10)**

**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।**
**व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्॥ (11)**

इति कारिकाभ्यां व्यक्तमहदादिवैपरीत्येन अहेतुमत्वम्, नित्यत्वम्, व्यापकत्वम्, अक्रियत्वम्, एकत्वम्, अनाश्रितत्वम्, अलिङ्गत्वम्, निरवयवत्वम्, स्वातन्त्र्यं चाव्यक्तभूतायाः प्रकृतेस्तदात्मभूतानां सत्वादीनां च सिद्ध्यति। द्वितीयकारिकया च व्यक्तेषु महदादिषु प्रकृत्यात्मसु गुणेषु च त्रैगुण्यम्, अविवेकिता (पृथगनुपलभ्यमानता) विषयत्वम्, सर्वान् पुरुषान् प्रति साधरणत्वापरपर्यायं सामान्यम्, अचेतनत्वम्, प्रसवधर्मिता च सिद्ध्यति।

अत्रेदं विचार्यम्, एकत्वं त्रिगुणत्वं चोभयं कथमुपपद्यताम्। त्रयोगुणा एव प्रकृतिरिति सांख्यानामभ्युपगमः। यदि त्रयोगुणाः, तर्हि त्रिगुणरूपे अव्यक्ते एकत्वं कथं स्यात्। त्रित्वमेकत्वं विरोधि, संख्याकृतव्यवहारस्य परस्परपरिहारेणैव प्रवृत्तिरित्यभियुक्ता आहुः। यद्यपि त्रित्वसंख्यायामप्येकत्वमनुप्रविष्टम्, चतुष्ट्वादिष्वपि त्रित्वाद्यनुप्रविष्टम्, परं त्रयं दृष्ट्वा एकोऽयमिति न केनापि व्यवह्रियते, न वा चतुर्षु त्रय इमे इति क्वचिदपि व्यवहारो दृष्टः। तस्माद्विज्ञाता परो संख्या पूर्वां बाधते-इति वक्तव्यमेव भवेत्। इत्थं च त्रित्वं दृष्ट्वा एकत्वं न व्यवहर्तुं शक्येत। प्रत्येकं गुणानामेकत्वमिति चेद् व्याख्यायेत, तदा महदहंकारादि पदबोध्यासु व्यक्तिष्वपि प्रत्येकं त्वेकत्वमेवेति व्यक्तम्, अनेकम्-अव्यक्तं त्वेकमिति वैधर्म्यकथनानुपपत्तिः। एतत्समाधानाय श्रीबालरामस्वामिभिस्तत्त्वकौमुदीव्याख्यायां सजातीभेदशून्यत्वमेकत्वं प्रकृतौ व्याख्यातम्। द्वितीया काचन प्रकृतिर्नास्ति, यामाधारीकृत्य सजातीयभेदः प्रकृतौ व्यपदिश्येत्। सत्वाद्या गुणा अपि प्रत्येकमेकव्यक्तिरूपा एवेति परस्परभिन्नत्वेन विजातीयभेदसत्वेऽपि सजातीय-

भेदस्तत्रापि नास्तीति तादृशमेकत्वमेकत्राव्याहतम्। महदादिषु तु व्यक्तीनामानन्त्यमिति एकः सजातीयभेदोऽस्त्येवेति वैधर्म्यमुपपादितं तैः। विज्ञानभिक्षुमहाभागस्तु सत्वादिगुणेष्वपि व्यक्तेर्भेदमिच्छति, अनन्तानि सत्वानि अनन्तानि रजांसि, तमांसि च, तत्र धर्मैकत्वादेकत्वव्यपदेशः। अतः सर्गभेदेन भिन्नत्वाभाव एकत्वमिति तेन सूत्रभाष्ये एकत्वमुपपादितम्। सर्वमिदमाचार्यैरुपदिष्टस्यैकत्वस्यैव कल्पनया कदर्थितमेव, न तु वास्तविकमेकत्वमनया दिशोपपादितं भवति। किं च त्रिगुणसमुदायरूपायां प्रकृतौ निरवयवत्वं कथमित्यपि विचारयितुमापतति, त्रयो गुणास्तदवयवाः इति कथं निरवयवत्वं स्यात्—प्रत्येकं गुणा निरवयवा इति चेत्—न प्रत्येकं गुणस्याव्यक्तपदेन प्रकृतिपदेन वाभिधानं सांख्ये, अपि तु त्रिगुणसमुदायस्यैव। इह चाव्यक्तस्यैव, वैधर्म्यमुक्तम्। न तु प्रत्येकं गुणानामिति नानुगुण्यं वैधर्म्यस्य। यदि च प्रत्येकं गुणेषु साधर्म्यं वैधर्म्यं समन्वीयेयाताम्—तर्हि त्रिगुणमिति साधर्म्यं कथमुपपद्येत्। न हि प्रत्येकं गुणानां त्रैगुण्यमस्ति भवदभिमतं पार्थक्यानुपपत्तेः। तदर्थमवयवानां संयोगः, स गुणानां नास्ति—अप्राप्तिपूर्विका प्राप्तिः संयोग उच्यते गुणास्तु न कदापि परस्परमप्राप्ता-अर्थादसंयुक्ताः, तेषां नित्ययुक्तत्वादिति संयोगाभावस्तत्रोपपद्यत इति श्रीवाचस्पतिमिश्रैरनवयवत्वं व्याख्यातम्। परमग्रे "परस्परं गुणानां न संयोगः—अप्राप्तेरभावात् पुरुषेण तु संयोगोभवत्येवेति श्रीवाचस्पतिभिरेवोक्तम्, 'पुरुषस्य दर्शनार्थम्' इति (सां. का. 21) इति कारिकाव्याख्यानेऽपि च "अनादित्वाच्च संयोगपरम्परायाः" इति मिश्रैरेव व्याख्यातम्। यद्यपि प्रकृतिपुरुषयोः संयोगोऽनादिरिति न वक्तुं शक्यते, प्रलये संयोगानभ्युपगमात्, पुरुषसंयोग एव प्रकृतेः स्रष्टृत्वमिति सांख्यानामभ्युपगमः, अन्येषामीश्वरकालादीनां तत्रानभ्युपगमात्। ततश्च प्रलयकालेऽपि यदि संयोगः स्यात् तदा सृष्टिरपि प्रवर्तेत, भोगश्चापि भवेदिति। तथापि प्रलयात् पूर्वमपि संयोग आसीदिति संयोगपरम्परानादिभूतेति श्रीवाचस्पतेराशयः। ततश्चाप्राप्तिपूर्वकरूपोऽपि संयोगस्तैरभ्युपगत इति तदुक्तार्थानुसारेणापि अनवयवत्वं प्रधानस्य न सिद्ध्यति। असंयोगित्वमेवानवयवत्वं तैरुक्तम्, पुरुषसंयोगेऽपि असंयोगित्वं नास्तीति। "चलं च गुणवृत्तिमिति धर्मादिनिमित्तापेक्षं चित्तेरभिसम्बध्यते" इत्यादिना बहुत्र योगभाष्ये, "स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः" (योग सू. 2।23) इति बहुत्रयोगसूत्रेष्वपि च संयोग उपपादितः। "न शुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते" (सां सू. 1।19) इति सूत्रभाष्ये श्रीविज्ञानभिक्षुभिस्तु "प्रकृतेः परिच्छिन्नापरिछिन्नविविधगुणसमुदायरूपतया परिच्छिन्नगुणावच्छेदेन पुरुष-

संयोगोत्पत्तेः संभवात्, इति क्रियापूर्वकोऽपि संयोगोऽभ्युपगतः। परिच्छिन्नासु गुणव्यक्तिषु क्रियया अन्यतरक्रियाजन्यो नित्यः संयोगोऽपि संभवतीत्येव तदाशयवर्णनसंभवात्। "वाङ्मात्रं न तु तत्त्वं चित्तस्थितेः"। (सां. सू. 1।58) इति सूत्र भाष्येऽपि "अस्मै पुरुषाय प्रकृतिरविवेकेनात्मानं दर्शितवती, तद्वासनावत्वात् तमेव संयोगद्वारा बध्नाति नान्यम्। तथा यस्मै विवेकेनात्मानं दर्शितवती, तमेव स्ववियोगद्वारा मोचयति नान्यम्" इति भाष्यकृद्भिः संयोगविभागः स्पष्टमभ्युपगम्यतः। ततश्च परस्परं गुणानां संयोगाभाव एवानवयवशब्दार्थ इति वा, अवयवसंयोगजन्यत्वाभावोऽनवयवत्वमिति वा व्याख्यायेत। तदिदं सर्वमनवयव-शब्दस्य कदर्थनमेव, परस्परसंयोगाभावस्य शब्दार्थे कथमप्यप्रवेशात्, सांख्ये नारम्भप्रक्रिया, अपितु परिणामप्रक्रियेतिपूर्वमुक्तम्, ततश्च महदहंकारावपि गुणानां क्रमिकौ परिणामाविति तत्राप्यवयवसंयोगजन्यत्वं नास्तीति सावयत्वं व्यक्तसाधर्म्यं कारिकायामुक्तमनया दिशा न निर्वहेत्। अथैवं द्रव्यत्वस्वीकारे त्रिगुणसमुदायरूपायाः प्रकृतेर्व्यापकत्वमपि कथं स्यात्। द्रव्येष्वेकस्य स्थाने परो न निविशते—इति हि स्फुटं दृश्यते, ततश्च सत्वस्थाने न रजः, रजस्तमः स्थाने च न सत्वमिति चालनोन्यायेनैकस्यापि व्यापकत्वं न सिद्ध्येत्। परिच्छिन्नानां समुदायोऽपि न व्यापको भवितुमर्हति, समुदायस्यावयवानतिरिक्तत्वादिति कथं प्रकृते-र्व्यापकतोपपाद्येत। अन्यदपि दृश्यताम्, प्रत्येकं गुणा एकैकव्यक्तिरूपाः, न तत्र व्यक्तिभेद इति श्रीवाचस्पतिमिश्राणामाशयः प्रतीयते, विज्ञानभिक्षुभिस्तु प्रत्येकं गुणानामनन्तव्यक्तिरूपत्वं मुखत एवानेकत्र स्पष्टमुद्घुष्टम्। अनन्तासु व्यक्तिषु एकजातीयत्वात् सत्वादिपदव्यवहार इति तेऽभिप्रयन्ति। तत्राद्यपक्षे गुणानां परस्परमविवेकित्वापरपर्यायमपार्थक्यं नोपपद्यते, परस्परं तादात्म्याद् विवेको नास्तीति हि मिश्रैर्व्याख्यातम्। एकस्मिन् द्रव्ये अन्ययोस्तादात्म्यमस्ति, तथापि च तानि द्रव्याणि पृथग् भूतानि। किमेवंविधमिन्द्रजालं क्वचिद् दृष्टचरम्? तथैवैकव्यक्तिकत्वे सत्वमिदानीं प्रवृद्धम्, रजस्तु ह्रसितम्, इति वृद्धिह्रासावपि कथमुपपाद्यौ-द्रव्यत्वोपगमे, न हि वृद्धिर्नाम परिपोषस्तेषु रूपस्पर्शादिरहितेषूपपद्येत, ह्रासो वा कृशता, "एकश्च यदि परिपुष्टः परस्यापि स्थानमाक्रामेत्तर्हि परः क्व गच्छेत्" परेण संकोचमासाद्य वर्धते स्थानं दत्तम्, तर्हि तादात्म्यं दूरमपास्तम्। एवमनन्तव्यक्ति-कत्वमिति द्वितीये पक्षे प्रत्येकं गृणानामनन्तास्तन्तवः परस्परं संबद्धाः सर्वत्र व्याप्ता इति प्रतिफलति, तत्र सजातीयोपष्टम्भादिना वृद्धिह्रासादिकं युक्तमिति विज्ञानभिक्षुराह। स्वसजातीयसंमेलनेन वृद्धिः वियोगेन च ह्रास उपपन्न इति

तदाशयः स्यात्। परं किं नाम संमेलनम् को वा ह्रास इति निर्वक्तव्यम् भवेत्। आत्मसात् करणं नाम स्वस्मिन् प्रवेशनम् सम्मेलनमित्युक्ते प्रसक्तमनित्यत्वम् यच्च स्वस्मिन् प्रवेशितस्य रिक्तं स्थानं तत् केन पूर्यतामित्याद्यापत्तिस्तदवस्था परस्परसंयोग एव संमेलनमिति चेत्तत्तु सदैवास्ति—इति वृद्धिह्रासव्यवहारः कुतस्त्यः। विजातीयैः संयोगमपहाय सजातीयैः संयोगे वृद्धिः। विजातीयैः संयोगे तु ह्रास इति चेद्-विचार्यतां मनाक्। एकः सत्वस्य तन्तु, तदव्यवहितो रजसः, ततस्तदव्यवहितस्तु तमस इति रीत्या तेषां सन्निवेश एष्टव्यो भवद्भिः। अन्यथा सर्वावकाशव्यापनरूपस्य विभुत्वस्यासंभवात्। ततश्च पूर्वसंयुक्तौ द्वौ तन्तू अतिक्रम्य सजातीयेन तन्तुना कथमयं सत्वतन्तुः संबध्नातु, मध्ये स्थितौ च तौ तन्तू कथमस्मा अवकाशं दद्याताम्। तावपसार्य संबध्नातीति चेत्-सर्वत्र व्याप्तेषु तन्तुषु कथमपसारणं संभवेदित्यादि विचारे वृद्धिह्रासौ नोपपद्येते एव। अविवेकिपदाभिधेयं तादात्म्यन्तु न संभवत्येव, भिन्नानां द्रव्यव्यक्तीनां तादात्म्योपगमस्यासंबद्धत्वात्। संभूयकारित्वमेव मया अविवेकित्वमुच्यत इति-चेत्, तत्तु अन्योन्याश्रय-पदेनैवोपात्तमित्यविवेकित्वकथनं पुनरुक्तं स्यात्। अभिभाव्याभिभावकभावोऽपि च सर्वैरुपगतः कथमुपपद्यताम्। एकः परमभिभवतीत्यस्य किं तात्पर्यं स्यात्। आत्मसात्करोति-निगिलतीति चेत्सर्वेषामपि समये समये निगीर्यमाणत्वान्नित्यत्वानुपपत्तिः, स्वस्मात् स्थानादपसारयतीति चेत्-अपसृतः स क्व गच्छतु? सर्वत्रापि विभवो गुणा व्याप्ता इति कुत्राप्यवकाशस्याभावात्? तेन त्यक्ते च स्थाने आगच्छतु-अतिरिक्तव्यक्तीनामुत्पत्तेरभावात्। उत्पत्यभ्युपगमे वा नित्यत्वायोगात्। अभिभावक एव तद्देशमाक्रम्य तिष्ठतीति चेद्, प्रदेशवृद्धिह्रासयोगिनस्तस्याप्यनित्यत्वं प्रसज्जेत। अभिभवति नाम कार्यजननासमर्थं तं करोति इति चेत्? कार्यजननशक्तिस्तस्य परेण नाशितेत्यायातम्। ततश्च पूर्वोपपादितरीत्या शक्तिरूपत्वेन शक्त्येकसारत्वेन च सर्वैर्व्याख्यातानां गुणानां शक्तिनाशे स्वरूपनाश एव प्रसक्तः।

सांख्याभ्युपगते सत्कार्यवादसिद्धान्ते च नाशो न संभवतीति कुत्र शक्तिर्गता? कुतो वा पुनरागमिष्यति? स्वसंबद्धेऽन्यस्मिन् गुणे तादृशशक्तेरभावात्। न शक्तिर्नाशिता, अपित्वभिभूता-शक्त्यभिभव एव गुणानां परस्परमभिभव उच्यत इति चेदायातोऽसि मार्गे, शक्तिरूपा एव तर्हि गुणा इति शब्दान्तरेण भवता स्वीकृतम्, गुणेषु द्रव्यरूपेषु शक्तिरतिरिक्ता, साभिभूतेति पक्षे तु शक्तेरतिरिक्तपदार्थताभ्युपगमप्रसंगः। न हि सांख्ये शक्तिर्नाम कश्चिदतिरिक्तः पदार्थः पञ्चविंशतो

पठ्यते। कार्यस्यानागतावस्थैव शक्तिः, सैवाभिभूतेति चेदुच्येत्, तदपि न संभवति, अनागतस्याभिभवासंभवात्। वर्तमानमेव हि अभिभूयतेनानागतम्, तस्य स्वयमेवाभिभूतत्वेन अभिभूतेऽभिभवासंभवात्, चिरावस्थानं तस्याः संपादितमित्यपि नोचितम्चिरावस्थानस्याभिभवपदार्थतायाः क्वाप्यदृष्टश्रुतचरत्वात्। परिच्छिन्न-व्यक्तीनां समुदायस्य विभुत्वं न संभवतीति त्वत्रापि प्रश्नोऽवशिष्यत एव। एतत् समाधातुं दैशिकाभावप्रतियोगितावच्छेदकावच्छिन्नत्वं परिच्छिन्नत्वम्, तदभावश्च व्यापकत्वमिति विज्ञानभिक्षुभिः परिच्छिन्नं न सर्वोपादानम् (सा. सू. 1।76) इति सूत्रभाष्ये उक्तम्। तथा च जगत्कारणत्वस्य दैशिकाभावप्रतियोगितान-वच्छेदकत्वमेवेति प्रकृतेर्व्यापकत्वमेव पर्यवसन्नम् इति च निष्कर्षस्तैरेवोक्तः। सत्यं जगत् कारणस्य दैशिकाभावप्रतियोगितानवच्छेदकत्वं युक्तम्, सर्वत्रैव जगदवयवभूतानां पदार्थानामुत्पत्तिदर्शनात्। परं यादृशं जगत्कारणं भवद्भिरभ्युपगम्यते तादृशस्य विभुत्वं न संभवति-परिच्छन्नद्रव्यसमुदायस्य विभुत्वायोगात्-समुदायसमुदायिनोर्विभिन्नत्वासिद्धेरित्यक्षेपो न भवद्भिः समाहित इति, सत्वादीनां क्रियारूपत्वोपगमे क्रियापूर्वावस्थारूपशक्तित्वोपगमे वा सर्वमेतत् सूपपादम्। तथा हि क्रियाया मन्दमध्यतीव्रावस्थारूपा एव गुणा इत्यवस्थाभेदेन त्रित्वमस्माभिः पूर्वं व्याख्यातम्। तेन क्रियारूपत्वेन शक्तिरूपत्वेन वैकत्वम्, अवस्थारूपेण व्याख्याने तु त्रित्वमित्युभयमुपपन्नमेव। क्रियायां शक्तौ वा अवयवव्यवहारो न भवति—न वा सावयवत्वं तस्या उपपद्यत इति अनवयवत्वमपि न विरुद्धम्, व्यक्तिभेदेन शक्तयः क्रिया वा अत्यल्पप्रदेशाः संख्याकृतेनानन्त्येन दैशिकप्रवाहरूपतां गता वा व्यापिकाः। परिच्छिन्नानां समुदायोऽपि-अपरिच्छिन्नो न संभवतीति नियमोऽपि स्थानावरोधकेषु द्रव्येष्वेव स्थानं लभते, क्रियास्तु नित्यमाश्रित्तस्वभाव इत्याश्रयभूते मुख्ये आत्मनि रसे व्यापके सर्वत्र विद्यमानानां तासां विभुत्व शक्यत एव वस्तुम्। अवस्थाविशेषाणां गुणानां शक्त्या तादात्म्यम् अवस्थानामवस्थावता भेदाभावात्परस्परमपि तादात्म्यं व्यवह्रियते-तद्भिन्नाभिन्नस्य तदभिन्नत्वमिति न्यायात्। मन्दतया तीव्रतया च वर्तमानानां क्रियाणां वृद्धिह्रासावपि व्यवहारे प्रसिद्धौ। एका चावस्थोद्भूता परामभिभवतीति परस्परम-भिभाव्याभिभावकभावोऽपि सुतरामुपपन्नः, इत्येवं विधे साधर्म्यवैधर्म्य उच्यमाने स्वोपपादनार्थं क्रियारूपतां क्रियाशक्तिरूपतामेव वा गुणानामभिव्यञ्जयन्ति। किं च व्यक्तं सक्रियम् अतद्वैधर्म्येणाव्यक्तन्तु निष्क्रियमित्यपि पूर्वोक्तकारिकायामुक्तम्। तत्राप्यक्रियस्य प्रसवधर्मित्वम्, पुरुषेण संयोगविभागौ च कथमुपपद्येयाताम्। संयोगविभागौ च

सर्वैर्व्याख्याताविल्युक्तमेवाधस्तात्। तत्र श्रीवाचस्पतिमिश्रैरेवं समाहितम्-यदत्र स्पन्दरूपैव क्रिया गृह्यते-सा च विभुषु गुणेषु नास्ति, परिणामरूपा तु क्रिया तत्राभ्युपगम्यत एवेति प्रसवधर्मित्वं न विरुद्ध्यते, परिणाम एव हि गुणानां प्रसवः, तत्सत्वेऽपि स्पन्दो नास्तीति प्रवृत्तेरक्रियत्वमुक्तमिति। संयोगविभागौ चापि तत्पुरुषसंबन्धित्वाभिमानरूपावेवेति न तत्रापि स्पन्दापेक्षेत्यपि केचन समादधते। परं "प्रकाशप्रवृत्तिनियमार्थाः" (सां. त. कौ. 12 का.) इति कारिकांशव्याख्यानावसरे यन्मिश्रमहाभागैरेव "रजप्रवर्तकत्वात् सर्वत्र लघु सत्वं प्रवर्तयेत्, यदि तमसा गुरुणा न नियम्येत, तमो नियतं तु क्वचिदेव प्रवर्तयतीति भवति तमो नियमार्थम्" इति व्याख्यातम्, तत्तु स्पन्दमप्यभिव्यनक्त्येव। कथं स्पन्दं विना प्रवर्तकत्वं नियामकत्वं चोपपद्येतेति। चलं च गुणवृत्तम्, चलं च रजः, इत्यादिषूद्धृतपूर्वेषु संयोगसाधनायोद्धृतेषु च वचनेषु बहुत्र स्पन्दः स्फुटं प्रतिभासत एव। परिच्छिन्नैर्गुणैः संयोगविभागावुपपद्येते इति पूर्वोदाहृतवचने प्रतिपादितवता श्रीविज्ञानभिक्षुणा तु स्पष्टमेव स्पन्दरूपापि क्रियाभ्युपगता। एतत्समाधानार्थम् नियतकार्यकारित्वं सक्रियत्वम्, प्रधानस्य तु सर्वकार्यसाधारण्यान्न सक्रियत्वम्, इति तेन महाभागेन सक्रियत्वं परिष्कृतम्। परमेतत्सर्वमाचार्योक्तनिष्क्रियत्वकदर्थनमेव। नियत-कार्यकारी सक्रियः, सर्वकार्यकारी तु निष्क्रिय इति कियदुपहासास्पदमिदमिति विद्वांस एव विदांकुर्वन्तु। सत्वादीनां क्रियाशक्तित्वाभ्युपगमे तु निष्क्रियत्वं सम्यगुपपन्नमेव। न हि क्रिया क्रियावती भवति, तत्रापरस्याः क्रियाया अभावात् "गुणादिर्निर्गुणक्रियः" इति तार्किका अपि गुणकर्मादीनां निष्क्रियत्वमाचक्षते। अलमति विस्तरेण। सांख्याचार्यणामेव सत्वादिगुणनिरूपणं तेषां द्रव्यरूपत्वे धर्मिरूपत्वे वा नोपपद्यते। तस्मात् क्रियाशक्तिरूपैव प्रकृति; क्रियाशक्तिरूपा एव च सत्वाद्या गुणास्तदंशा इति स्वीकारेणैव सर्वा प्रक्रिया निर्वहति। तत्र पृथक् पृथक् शक्तिरूपाः सत्वादिगुणाः, तत्समष्टिरूपा तु त्रिगुणात्मिका प्रकृतिरिति समष्टिव्यष्ट्योः कथञ्चिद् व्यावहारिकं भेदमुररीकृत्य गुणत्रयवती प्रकृतिरिति अभेददृष्ट्या तु त्रयो गुणा एव प्रकृतिरित्युभयमप्युपपद्यते। श्रीभगवद्गीतास्वपि यत्—

**सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः।**
**निबध्नन्ति महाबाहो देहे देहिनमव्यम्॥** (अ. 14।5)

इत्युपदिष्टम्। तत्र समष्टिरूपायां सुप्तदशायां भेदविरहेण वर्तमाना प्रकृतिः, जागरणे तु तत्र कार्यानुगुणतया पृथक् पृथक् शक्तिरूपेणाविर्भवन्त सत्वाद्या गुणास्तत्प्रभवा उक्ताः। समष्टिशक्तेर्व्यष्टिरूपेण कार्यकरणाय पृथक् पृथक् भवनमेव

संभवः। स च प्रसुप्तावस्थायाः प्रकृतेरेवेति तज्जन्यत्वापरपर्यायं तत्संभवत्वं व्यवहारदशायां स्पष्टीकरणायोपात्तम्। तदनुशक्तेः क्रियारूपेण परिणतिस्तु "निबध्नन्ति" इति आत्मनो बन्धकतयोपात्ता। पृथक् पृथक् शक्तिभिः केन केन रूपेण बन्धनमिति चाग्रे विवृतम्।

**तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।**
**सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥14।6।**

**रजो रागात्मकं विद्धि तृष्णासङ्ग समुद्भवम्।**
**तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥14।7।**

**तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।**
**प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥14।8।**

इति। सत्वस्य यथा मन्दक्रियत्वान्नैर्मल्यम्, अनावरकत्वाच्च पुरुषप्रकाशग्रहणात् प्रकाशकत्वं तथा आरम्भ एव सत्वस्य रूपविवरणे विशदीकृतमस्माभिः। सैव प्रक्रियात्र "निर्मलत्वात्, प्रकाशकम्" इत्युपदेशेन भगवताभिव्यञ्जिता, स्वयं प्रकाशरूपस्यापि यथा प्रकाशकत्वमुच्यते तदपि व्याख्यातपूर्वं तत्रैव। सुखं ज्ञानं च तद्वृत्तिरूपम्, तस्यैव क्रियारूपा परिणतिरिति यावत्। ताभ्यामात्मनो बन्धः, स्वाभिमुखीकरणेन स्वस्वरूपतामिवापाद्य यत्स्वस्मिन्नासक्तिजननं स एव बन्ध इत्युच्यत इतिभावः, एवमेवाग्रेऽपि रागो रजसो वृत्तिः क्रियारूपा, सैव तृष्णायाः समुद्भवरूपा, रागादेव तृष्णा जायते, तृष्णारूपः स राग एव कर्म कारयति, इति कर्मण्यासक्तिरेव रजःकृतो बन्ध आत्मनः। क्रियाया उत्कटतया ज्ञानस्यावरणाद् अज्ञानरूपं ज्ञानविरोधि यदावरणं तस्मात्तम इति संज्ञा तस्य जायते, तत्प्राणिनो मोहयति-अर्थान् मोहरूपा तद्वृत्तिः। प्रमादालस्यनिद्रादीनि तद्रूपाणि आत्मनो बन्धकानीति। वृत्तिवृत्तिमतोर्भेदविवक्षया अन्यजनकभावस्तत्र तत्र नेयः। तदग्रे चैषां बाह्यैर्व्यवहारैर्यथा परिचयो जायते गुणानाम्, तत्सर्वं भगवता व्याख्यातम्। एवं विकारांश्च गुणांश्च विद्धिप्रकृतिसंभवान्—इत्यादावपि गुणानां प्रकृतिसंभवता व्याख्येया। कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते, इत्युपदिशता च भगवता क्रियाशक्तिरूपता प्रकृतेः स्फुटीकृतप्राया। ननु प्रकृतेः क्रियारूपत्वाभ्युपगमे शक्तिरूपत्वाभ्युपगमे वा क्रियायाः शक्तेर्वा निराश्रयावस्थानासंभवेन तस्या आश्रयः कश्चन कल्पनीयो भवेत्, पुरुषस्याश्रयत्वं तु सांख्या नेच्छन्त्येवेत्यतिरिक्त-तत्त्वकल्पनाप्रसंग आपततीति चेत्, सत्यम्। शक्तिः स्वतन्त्रा निराधारा च

जगदुत्पादयतीत्येव सांख्यानां प्रक्रिया। तत एव ते तदाश्रयमन्यं न प्रकल्पयन्ति, पुरुषं चौदासीन्यभङ्गभिया तदाश्रयं न मन्यन्त इति तन्मते शक्तेः स्वातन्त्र्योपगम इव निराश्रयत्वोपगमोऽपि न विरुद्ध्यते। क्रिया च तत्परिणतिभूता स्वरचितानेव द्रव्यादीनाश्रित्य तिष्ठतीति तन्त्रक्रियामनुसृत्य न कश्चिद्विरोधः। ततः परभूमिकायां तु वेदान्तिनः पुरुषबहुत्वं शक्तिस्वातन्त्र्यं च निराकृत्यैकं ब्रह्मैव शक्त्यपरपर्याय-मायाश्रयं मन्यन्त एव। "आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवला।" इति तत्सिद्धान्तात्, तत्सिद्धान्ते शक्त्याश्रयत्वे तत्परिणतिभूतक्रियाश्रयत्वेऽपि च ब्रह्मणो नौदासीन्यहानिः, विवर्तवादस्याविकृतपरिणामवादस्य वाभ्युपगमादिति न तत्रापि कोऽपि विरोधः।

श्रीशंकरभगवत्पादैर्विवर्तवाद आश्रितः, आगमेषु श्रीभगवद्वल्लभाचार्याणां मते चाविकृतपरिणामवाद एवाभ्युपगतः। अनयोरपि वादयोः केवलं दृष्टिभेद एव, न तु वास्तविकः कोऽपि विरोधः। "ब्रह्म सत्यम्, जगन्मिथ्या" इत्युक्तौ विकाररूपेण जगन्मिथ्या, ब्रह्मरूपेण तु सत्यम्, इत्युक्तौ च केवलं वचनमात्रभेदः, न तु वास्तविको भेदः, श्रीशंकराचार्यैरपि विकारस्यैव मिथ्यात्वं प्रतिपाद्यते, ब्रह्मणि जगद्रूपा विकृतिः केवलं प्रतीयते न तु कापि विकृतिरस्तीत्येव तेषामुद्घोषः, "सर्वं खल्विदं ब्रह्म" इति श्रुत्युक्तब्रह्मरूपेण तु मिथात्व कथं तैरभ्युपगम्यताम्, श्रीवल्लभाचार्या आगमिकाश्चापि ब्रह्मणस्तदपरपर्यायस्य परमशिवस्य वा निर्विकारतामुपयान्त्येवेति न कोऽपि भेदो विरोधो वा, अविकृतपरिणामः, विवर्तश्चेति नाममात्रमेव भिन्नम्। तदिदं पुरस्तादप्युक्तम्। दर्शनेष्वपि च क्रमिकशिक्षासौकर्याय तास्ता भूमिका उपादीयन्ते, न तु वास्तविकः कोऽपि विरोधस्तत्रापीति स्थाने स्थाने सङ्केत्यते। "चेतनस्य पुरुषस्य सान्निध्यं प्रकृतिरपेक्षते जगद्रूपेण तु सैव परिणमति, पुरुषो निर्विकारः" इति सांख्यानां प्रक्रिया। चेतनस्य ब्रह्मणः परमशिवस्य वेच्छामात्रेण तच्छक्तिर्जगद्रूपेण विकासमाप्नोति, ब्रह्म परशिवो वा निर्विकार इति अविकृतपरिणामवादप्रक्रिया। सा च मूलतत्त्वस्येच्छापि जीवेच्छावन्नान्तः-करणपरिणतिभूता, परिणतिभूतात्विच्छा उपाधिभूतायां मायायामेव स्यात्। इयं प्रकृतिप्रेरिका त्विच्छा तस्य स्वातन्त्र्यरूपा तद्रूपैव वेति सन्निधानेनैव प्रेरकत्वमत्रापि फलितम्।

यत्र तत्त्वं न विहन्यते, निर्विकारतेव मूलतत्त्वे सदा तिष्ठति, स न परिणामः, अपि तु वाचारम्भणं नाममात्र विकार इति विवर्तवादप्रक्रिया। लौकिकानामस्माकं दृष्टौ परिणामः स एव मन्यते, यत्र तत्त्वं परिवर्तितं स्यात्। यथा दुग्धस्य

दधिभावः, बीजस्य वाङ्कुरभावः। स्वयमविकृतस्य परिणामस्तु न लोके दृष्ट इति न लोकिकानां बुद्धावुपारोहति, तस्मात्सामान्यदृष्टौ विवर्तस्याविकृतपरिणामस्य च न कोऽपि भेदः। ततश्च शब्दभेदातिरिक्तः कोऽत्र भेद इति विचारकैरेव विचार्यताम्। आश्रयतायामपि नास्ति भेदो विरोधो वा। पुरुषबहुत्वं तु लौकिकानुभव-मनुसृत्य सांख्यैरुपगतम्, तदग्रिमभूमिकायां निराकृत्यैक एव पुरुषो वेदान्तिभिरङ्गी क्रियते। अस्तु नाम। नात्र दार्शनिकीं सर्वामपि प्रक्रियामनुवदितुमस्त्यवकाशो न वा तदवसर इति यावदुपयुक्तं तावदेवात्र प्रसङ्गप्राप्तं वदामः।

पुराणेष्वपि प्रकृतिस्वातन्त्र्यं न क्वापि निरूप्यत इति प्रागेवावोचाम। तस्माद् वेदान्तिप्रक्रियैव तेषामभिमता प्रतीयते। न्यायशास्त्रन्तु प्रथमभूमिकायामारम्भवादं शिक्षासौकर्यायोपादत्त इत्यसकृदुक्तमेव।

द्रव्यगुणक्रियायां वास्तविकाभेदप्रतिपादनम्। वस्तुतो द्रव्यगुणकर्मपरिभाषापीयं वैशेषिकदर्शने पूर्वभूमिकायां शिक्षणार्थमेवोपादीयते, गुणक्रिये परस्परं भिन्ने, द्रव्यं च तदाश्रयीभूतं ततः पृथगेवेत्यादि। अग्रिमभूमिकामाश्रयत्सु दर्शनान्तरेषु तु नेयं परिभाषोपयुज्यते। तत्र हि क्रियैव धारावाहिकतां गता गुणपदवाच्या भवति, गुणसमष्टिरेव च द्रव्यामिति पौराणिक्याँ सृष्टावप्यस्ति विचारस्यास्योपयोग इत्येतदपि मनाग् विविच्यते। बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, यत्नः, इति षट् ते मनःपरिणतिरूपा इति क्रियायामेव तदन्तर्भावः प्रागेव विस्तरेण व्याख्यातः। मनसः क्रियैव मनःपरिणतिर्नाम। क्रियापदेन च क्षणिकत्वमेषां नैयायिकैरप्युच्यते-इति क्रियासमानधर्मतया क्रियात्वं तैरपि स्वीकृतप्रायम्। अहं जानामि, इच्छामि, इत्यादिलौकिकानुभवमनुसृत्यात्मधर्मत्वमेषां नैयायिकैरुपात्तम्। आत्मनि च विभौ क्रिया नोपपद्यत इत्येव हेतोर्गुणत्वस्वीकार एषां तैः कृतः।

अन्तःकरणवृत्तित्वमेषामभ्युपगच्छतां सांख्यादीनां क्रियात्वाभ्युपगमे न काप्यापत्तिः। एवमेव रतिहासशोकक्रोधाद्या या वृत्तयः स्थायिभावनाम्ना व्यभिचारिभावनाम्ना च साहित्यशास्त्रेऽभ्युपगताः, या नैयायिकैः कृच्छ्रेण स्वाभिमतेषु षट्स्वात्मगुणेष्वन्तर्भाव्यन्ते, ता अपि मनोवृत्तिविशेषा धारावाहिकतां गता इति स्थायितया प्रतीयमानाः क्रिया एव। भवन्तु वा शक्तिरूपाः, शक्तेरपि क्रिया-पूर्वावस्थारूपतया क्रियानतिरेकात्। सांख्यैर्बुद्धिरेका स्थिरा मन्यते, ज्ञानेच्छाद्यास्त-द्वृत्तय इति सा बुद्धिरपि धारावाहिकौ क्रिया, क्रियाशक्तिर्वा नातिरिच्यते क्रियात्वात्। भावनाख्यः संस्कारोऽपि धाराबाहिकतां गता ज्ञानस्य सूक्ष्मावस्थैवेति ज्ञानवत् सोऽपि क्रियारूपः। एवं धर्माधर्मौ, कृतस्य शुभाशुभकर्मणः सूक्ष्मावस्थारूपौ

धारावाहिनाविति कथं क्रियात्वमतिवर्तेयाताम्। क्रियायाः पूर्वावस्था उत्तरावस्था च क्रियारूपैव विचारेण पर्यवस्यतीति।

तदित्थम्-आत्मनो नवापि गुणाः स्फुटं क्रियारूपतां नातिक्रामन्ति। संस्कारस्य यौ द्वावन्यौ प्रभेदौ भूतगतौ न्यायेऽभ्युपेयेते-वेगः स्थितिस्थापकश्च, तत्र वेगः क्रियाया धारावाहिन्यवस्थेति स्फुटमेव। क्रिया हि धारावाहिनी क्रमेण तीव्रतामुपगच्छतीति सत्त्वादिनिरूपणे प्रागुक्तम्। सैव तीव्रता वेग इत्युच्यते। स्थितिस्थापकोऽपि प्रतिबन्धकापनयने धारावाहिन्याः क्रियाया पुनः प्रादुर्भावः। पार्श्वस्थितसजातीयवस्तुनः आकर्षणस्य प्रतिफलनं वेति स्फुटं क्रियैव। गुरुत्वमाकर्षणग्रहणयोग्यतेति प्राक् प्रतिपादितमेव। आकर्षणं क्रिया, तद्ग्रहणमपि क्रिया, तर्हि तद्योग्यतापि तस्याः पूर्वावस्था क्रियैव। वस्तु स्वरूपमेव वा भवतु सा योग्यता न त्वतिरिक्तः कोऽपि गुणः स सिध्यति।

इत्थं गुणानां क्रियारूपता द्रव्यस्य च गुणः समूहरूपत्वं व्याख्यातम्।

□